शौचेप्सुः सर्वदाचामेदेकान्ते प्रागुदङ्मुखः ॥ ६१
हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः ।
वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः ॥ ६२

उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः।
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने ॥ ६३

मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥६४

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥६५

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥६६

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥६७

एष प्रोक्तो द्विजातीनामौपनायनिको विधिः।
उत्पत्तिव्यञ्जकः पुण्यः कर्मयोगं निबोधत ॥६८

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः।
आचारमग्निकार्यं च सन्ध्योपासनमेव च ॥६९

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥७०

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥७१

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ॥७२

अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ॥७३

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यति ॥७४

प्राक्कूलान् पर्युपासीनः पवित्रैश्चैव पावितः ।
प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति ॥७५

अकारश्चाप्युकारश्च मकारश्च प्रजापतिः ।
वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च ॥७६

त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥७७

एतदक्षरमेतांश्च जपन् व्याहृतिपूर्विकां ।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥७८

सहस्रकृत्वस्त्वभ्यस्य वहिरेतत्त्रिकं द्विजः ।
महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥७६

एतयर्चा विसंयुक्तः काले च क्रियया स्वया ।
ब्रह्मक्षत्रियविट्योनिर्गर्हणां याति साधुषु ॥८०

ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥८१

योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः ।
स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान् ॥८२

एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः ।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते ॥८३

क्षरन्ति सर्वा वैदिक्यो जुहोति यजतिक्रियाः ।
अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः ॥८४

विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥८५

ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥८६

जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥८७

इन्द्रियाणां विचरतां विषयेष्वपहारिषु।
संयमे यत्नमातिष्ठेद्विद्वान् यन्तेव वाजिनाम् ॥८८

एकादशेन्द्रियाण्याहुर्यानि पूर्वे मनीषिणः।
तानि सम्यक् प्रवक्ष्यामि यथावदनुपूर्वशः ॥८९

श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पंचमी।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥९०

बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः।
कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥९१

एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्।
यस्मिञ्जिते जितावेतौ भवतः पंचकौ गणौ ॥९२

इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयं।
संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ॥९३

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥९४

यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत्।
प्रापणात्सर्वकामानां परित्यागो विशिष्यते ॥९५

न तथैतानि शक्यन्ते संनियन्तुमसेवया ।
विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ॥९६
वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छति कर्हिचित् ॥९७
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥९८
इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम् ॥९९
वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा ।
सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुम् ॥१००
पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कदर्शनात् ।
पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ॥१०१
पूर्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति ।
पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम् ॥१०२
न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम् ।
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥१०३
अपां समीपे नियतो नैत्यकं विधिमास्थितः ।
सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ॥१०४
वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥१०५
नैत्यके नास्त्यनध्यायो ब्रह्म सत्रं हि तत् स्मृतम् ।
ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतम् ॥१०६

यःस्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः।
तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु ॥१०७
अग्नीन्धनं भैक्षचर्यामधःशय्यां गुरोर्हितम्।
आ समावर्तनात्कुर्यात् कृतोपनयनो द्विजः ॥१०८
आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः।
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः ॥१०६
नापृष्टः कस्यचिद्ब्रूयात् न चान्यायेन पृच्छतः।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥११०
अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति ॥१११
धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा।
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ॥११२
विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना।
आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् ॥११३
विद्या ब्राह्मणमेत्याह सेवधिस्तेऽस्मि रक्ष माम्।
असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा ॥११४
यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणम्।
तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने ॥११५
ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात्।
स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ॥११६
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ॥११७

सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी ११८
शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् ।
शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत् ॥११९
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥१२०
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि संप्रवर्द्धन्ते आयुर्विद्या यशो बलम् ॥१२१
अभिवादात् परं विप्रो ज्यायांसमभिवादयन् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥१२२
नामधेयस्य ये केचिदभिवादं न जानते ।
तान्प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च ॥१२३
भोः शब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः ॥१२४
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवाने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥१२५
यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥१२६
ब्राह्मणं कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥१२७
अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भो-भवत्-पूर्वकं त्वेनमभिभाषेत धर्मवित् ॥१२८

परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः ।
तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च ॥१२९
मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।
असावहमिति ब्रूयात् प्रत्युत्थाय यवीयसः ॥१३०
मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा ।
संपूज्या गुरुपत्नीवत् समास्ता गुरुभार्यया ॥१३१
भ्रातुर्भार्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥१३२
पितुर्भगिन्यां मातुश्च ज्यायस्यांश्च स्वसर्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥१३३
दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम् ।
त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु ॥१३४
ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम् ।
पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता ॥१३५
वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद् यदुत्तरम् ॥१३६
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥१३७
चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः ।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च ॥१३८
तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ ।
राजस्नातकयोश्चैव स्नातको नृपमानभाक् ॥१३९

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते ॥१४०
एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥१४१
निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥१४२
अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान् ।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ॥१४३
य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ ।
स माता स पिता ज्ञेयस्तं न द्रुह्येत् कदाचन ॥१४४
उपाध्यायान् दशाचार्य आचार्याणां शतं पिता ।
सहस्रं तु पितृन्माता गौरवेणातिरिच्यते ॥१४५
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥१४६
कामान्माता पिता चैनं यदुत्पादयतो मिथः ।
संभूतिं तस्य तां विद्याद्यद्योनावभिजायते ॥१४७
आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः ।
उत्पादयति सावित्र्या सा सत्या साऽजराऽमरा ॥१४८
अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥१४९
ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता ।
बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः ॥१५०

अध्यापयामास पितॄञ्छिशुराङ्गिरसः कविः ।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥१५१
ते तमर्थमपृच्छंत देवानागतमन्यवः ।
देवाश्चैतान् समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ॥१५२
अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ॥१५३
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥१५४
विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः ।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥१५५
न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥१५६
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ।
यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति ॥१५७
यथा षण्डोऽफलः स्त्रीषु यथा गौर्गवि चाफला ।
यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥१५८
अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ॥१५९
यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा ।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम् ॥१६०
नारुन्तुदः स्यादार्तोऽपि न परद्रोहकर्मधीः ।
ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत् ॥१६१

सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव ।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा ॥१६२
सुखं ह्यवमतः शेते सुखञ्च प्रतिबुद्ध्यते ।
सुखं चरति लोकेऽस्मिन्नवमन्ता विनश्यति ॥१६३
अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः ।
गुरौ वसन् सञ्चिनुयाद्ब्रह्माधिगमिकं तपः ॥१६४
तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥१६५
वेदमेव सदाभ्यस्येत्तपस्तप्स्यन् द्विजोत्तमः ।
वेदाभ्यास्यो हि विप्रस्य तपः परमिहोच्यते ॥१६६
आ हैव स नखाग्रेभ्यः परमं तप्यते तपः ।
यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥१६७
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥१६८
मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने ।
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् ॥१६९
तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम् ।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥१७०
वेदप्रदानादाचार्यं पितरं परिचक्षते ।
न ह्यस्मिन् युज्यते कर्म किञ्चिदामौञ्जिबन्धनात् ॥१७१
नाभिव्याहारयेद्ब्रह्म स्वधा निनयनादृते ।
शूद्रेण हि समस्तावद्यावद्वेदे न जायते ॥१७२

कृतोपनयनस्यास्य व्रतादेशनमिष्यते ।
ब्रह्मणो ग्रहणञ्चैव क्रमेण विधिपूर्वकम् ॥१७३
यद्यस्य विहितं चर्म यत् सूत्रं या च मेखला ।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि ॥१७४
सेवेतेमांस्तु नियमान् ब्रह्मचारी गुरौ वसन् ।
संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः ॥१७५
नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् ।
देवताभ्यर्चनञ्चैव समिदाधानमेव च ॥१७६
वर्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः ।
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् ॥१७७
अभ्यङ्गमञ्जनाञ्चक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधञ्च लोभञ्च नर्तनं गीतवादनम् ॥१७८
द्यूतं च जनवादं च परिवादं तथानृतम् ।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च ॥१७९
एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित् ।
कामाद्धि स्कन्दयन रेतो हिनस्ति व्रतमात्मनः ॥१८०
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ।
स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ॥१८१
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ।
आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत् ॥१८२
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥१८३

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ॥१८४
सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसम्भवे ।
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत् ॥१८५
दूरादाहृत्य समिधः संनिदध्याद्विहायसि ।
सायम्प्रातश्च जुहुयात् ताभिरग्निमतन्द्रितः ॥१८६
अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ॥१८७
भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती ।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥१८८
व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् ।
काममभ्यर्थितोऽश्नीयात् व्रतमस्य न लुप्यते ॥१८९
ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः ।
राजन्यवैश्ययोस्त्वेवं नैतत् कर्म विधीयते ॥१९०
चोदितो गुरुणा नित्यमप्रचोदित एव वा ।
कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च ॥१९१
शरीरं चैव वाचञ्च बुद्धीन्द्रियमनांसि च ।
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ॥१९२
नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥१९३
हीनान्नवस्त्रवेषः स्यात् सर्वदा गुरुसन्निधौ ।
उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत् ॥१९४

प्रतिश्रवणसम्भाषे शयानो न समाचरेत्।
नासीनो न च भुञ्जानो न तिष्ठन् न पराङ्मुखः ॥१९५
आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः ॥१९६
पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम्।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥१९७
नीचं शय्यासनं चास्य सर्वदा गुरुसन्निधौ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥१९८
नोदाहरेदस्य नाम परोक्षमपि केवलम्।
न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ॥१९९
गुरोर्यत्र परीवादो निन्दावापि प्रवर्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥२००
परीवादात् खरो भवति श्वा वै भवति निन्दकः।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥२०१
दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ॥२०२
प्रतिवातेऽनुवाते च नासीत गुरुणा सह।
असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्तयेत् ॥२०३
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥२०४
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्।
न चानिसृष्टो गुरुणा स्वान्गुरूनभिवादयेत् ॥२०५

विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु।
प्रतिषेधत्सु चाधर्मान्हितं चोपदिशत्स्वपि ॥२०६

श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत्।
गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबन्धुषु ॥२०७

बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि।
अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति ॥२०८

उत्सादनं च गात्राणां स्नापनोच्छिष्टभोजने।
न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम् ॥२०९

गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥२१०

अभ्यंजनं स्नापनं च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् ॥२११

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥२१२

स्वभाव एष नारीणां नराणामिह दूषणम्।
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः ॥२१३

अविद्वांसमलं लोके विद्वांसमपि वा पुनः।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥२१४

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥२१५

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि।
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् ॥२१६

विप्रोष्य पादग्रहणमन्वहं चाभिवादनम ।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् ।।२१७
यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ।।२१८
मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः ।
नैनं ग्रामेऽभिनिम्लोचेत् सूर्यो नाभ्युदियात् क्वचित् ।।२१९
तं चेदभ्युदियात् सूर्यः शयानं कामचारतः ।
निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम् ।।२२०
सूर्येण ह्यभिनिर्मुक्तःशयानोऽभ्युदितश्च यः ।
प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा ।।२२१
आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः ।
शुचौ देशे जपं जप्यमुपासीत यथाविधि ।।२२२
यदि स्त्री यद्यवरजः श्रेयः किंचित् समाचरेत् ।
तत् सर्वमाचरेद्युक्तो यत्र वास्य रमेन्मनः ।।२२३
धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ।।२२४
आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ।।२२५
आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः ।।२२६
यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ।।२२७

तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥२२८
तेषां त्रयाणां शुश्रूषा परमंतप उच्यते।
न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् ॥२२९
त एव हि त्रयो लोकास्त एव त्रय आश्रमाः।
त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः ॥२३०
पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः।
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥२३१
त्रिष्वप्रमाद्यन्नेतेषु त्रीन् लोकान् विजयेद्गृही।
दीप्यमानः स्ववपुषा देववद्दिवि मोदते ॥२३२
इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्।
गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते ॥२३३
सर्वेतस्यादृता धर्मा यस्यैते त्रय आदृताः।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥२३४
यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत्।
तेष्वेव नित्यं शुश्रूषां कुर्यात् प्रियहिते रतः ॥२३५
तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत्।
तत्तन्निवेदयेत्तेभ्यो मनोवचन कर्मभिः ॥२३६
त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते।
एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते ॥२३७
श्रद्दधानः शुभां विद्यामाददीतावरादपि।
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥२३८

विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ॥२३९

स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम् ।
विविधानि च शिल्पानि समादेयानि सर्वतः ॥

अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥२४१

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् ।
ब्राह्मणे चाननूचाने काङ्क्षन् गतिमनुत्तमाम् ॥२४२

यदि त्वात्यन्तिकं वासं रोचयेत गुरोः कुले ।
युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥२४३

आ समाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम् ।
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम् ॥२४४

न पूर्वं गुरवे किञ्चिदुपकुर्वीत धर्मवित् ।
स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्वर्थमाहरेत् ॥२४५

क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम् ।
धान्यं शाकञ्च वासांसि गुरवे प्रीतिमावहेत् ॥२४६

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥२४७

एतेष्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥२४८

एवञ्चरति यो विप्रो ब्रह्मचर्यमविप्लुतः ।
सगच्छत्युत्तमस्थानं न चेहा जायते पुनः ॥२४९

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां द्वितीयोऽध्यायः ॥

## तृतीयोऽध्यायः ।

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥१
वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥२
तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः ।
स्रग्विणं तल्प असीनमर्हयेत् प्रथमं गवा ॥३
गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि ।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥४
असपिण्डा च या मातुरसगोत्रा च या पितुः ।
द्विजातीनां सा प्रशस्ता दारकर्मण्य मैथुनी ॥५
महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः ।
स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ॥६
हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ।
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥७
नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ।
नालोमिकां नातिलोमां न वाचालां न पिङ्गलाम् ॥८
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ।
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् ॥९
अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम् ॥१०

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥११
सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्मणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः ॥१२
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते।
ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः ॥१३
न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः।
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते ॥१४
हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥१५
शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च।
शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः ॥१६
शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते ॥१७
दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु।
नाश्नन्ति पितृदेवास्तन्न च स्वर्गं स गच्छति ॥१८
वृषलीफेनपीतस्य निःश्वासोपहतस्य च।
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥१९
चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान्।
अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत ॥
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥२१

यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ ।
तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणाऽगुणान् ॥२२

षडानुपूर्व्या विप्रस्य क्षत्त्रस्य चतुरोऽवरान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यान्न राक्षसान् ॥२३

चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः ।
राक्षसं क्षत्त्रियस्यैकमासुरं वैश्यशूद्रयोः ॥२४

पंचानांतु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह ।
पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन ॥२५

पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ ।
गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्त्रस्य तौ स्मृतौ ॥२६

आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयं ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥२७

यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते ।
अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते ॥२८

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ।
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥२९

सहोभौ चरतां धर्ममिति वाचानुभाष्य च ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥३०

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।
कन्याऽऽप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥३१

इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः ॥३२

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥३३

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः ॥३४

अद्भिरेव द्विजाग्र्याणां कन्यादानं विशिष्यते।
इतरेषां तु वर्णानामितरेतरकाम्यया ॥३५

यो यस्यैषां विवाहानां मनुना कीर्तितो गुणः।
सर्वं शृणुत तं विप्राः सम्यक् कीर्तयतो मम ॥३६

दश पूर्वान् परान् वंश्यानात्मानं चैकविंशकम्।
ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् ॥३७

दैवोढाजः सुतश्चैव सप्त सप्त परावरान्।
आर्षोढाजः सुतस्त्रींस्त्रीन् षट् षट् कायोढजः सुतः ॥३७

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः ॥३९

रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥४०

इतरेषु तु शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥४१

अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत् ॥४२

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ॥४३

शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया ।
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ॥४४

ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा ।
पर्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया ॥४५

ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः ।
चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः ॥४६

तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या ।
त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः ॥४७

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्रार्थी संविशदार्तवे स्त्रियम् ॥४८

पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः ।
समेऽपुमान् पुंस्त्रियो वा क्षीणेऽल्पे च विपर्ययः ॥४९

निन्द्यास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयन् ।
ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् ॥५०

न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि ।
गृह्णञ्छुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी ॥५१

स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः ।
नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् ॥५२

आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ।
अल्पोऽप्येवं महान् वाऽपि विक्रयस्तावदेव सः ॥५३

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः ।
अर्हणं तत् कुमारीणामानृशंस्यञ्च केवलम् ॥५४

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥५५
यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥५६
शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् ।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा ॥५७
जामयो यानि गेहानि शपन्त्यप्रति पूजिताः
तानि कृत्याहतानीव विनश्यंति समन्ततः ॥५८
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥५९
सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥६०
यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् ।
अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्तते ॥६१
स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ।
तस्यां त्वरोचमानायां सर्वमेव न रोचते ॥६२
कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥६३
शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः ।
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥६४
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणाम् ।
कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः ॥६५

मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि ।
कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः ॥६६

वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधिः ।
पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही ॥६७

पंच सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥६८

तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ।
पंचक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥६९

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥७०

पंचैतान् यो महायज्ञान्न हापयति शक्तितः ।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते ॥७१

देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ।
न निर्वपति पंचानामुच्छ्वसन्न स जीवति ॥७२

अहुतं च हुतं चैव तथा प्रहुतमेव च ।
ब्राह्म्यं हुतं प्राशितं च पञ्चयज्ञान् प्रचक्षते ॥७३

जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः ।
ब्राह्म्यं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणम् ॥७४

स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि ।
दैवकर्मणि युक्तो हि बिभर्तीदं चराचरम् ॥७५

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥७६

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ॥७७
यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही ॥७८
स सन्धार्यः प्रयत्नेन स्वर्गमक्षयमिच्छता।
सुखं चेहेच्छता नित्यं योऽधार्यो दुर्बलेन्द्रियैः ॥७९
ऋषयः पितरो देवा भूतान्यतिथयस्तथा।
आशासते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता ॥८०
स्वाध्यायेनार्चयेतर्षीन्होमैर्देवान्यथाविधि।
पितॄञ्छ्राद्धैश्च नॄनन्नैर्भूतानि बलिकर्मणा ॥८१
कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ॥८२
एकमप्याशयेद्विप्रं पित्रर्थे पांचयज्ञिके।
न चैवात्राशयेत् कंचिद्वैश्वदेवं प्रति द्विजम् ॥८३
वैश्यदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम्।
आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ॥८४
अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः।
विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च ॥८५
कुह्वै चैवानुमत्यै च प्रजापतय एव च।
सहद्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः ॥८६
एवं सम्यग्घविर्हुत्वा सर्वदिक्षु प्रदक्षिणम्।
इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत् ॥८७

मरुद्भ्य इति तु द्वारि क्षिपेदप्स्वद्भ्य इत्यपि ।
वनस्पतिभ्य इत्येवं मुसलोलूखले हरेत् ॥८८
उच्छीर्षके श्रियै कुर्याद्भद्रकाल्यै च पादतः ।
ब्रह्मवास्तोष्पतिभ्यां तु वास्तुमध्ये बलिं हरेत् ॥८९
विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत् ।
दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च ॥९०
पृष्ठवास्तुनि कुर्वीत बलिं सर्वान्नभूतये ।
पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत् ॥९१
शुनां च पतितानां च श्वपचां पापरोगिणाम् ।
वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि ॥९२
एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति ।
स गच्छति परं स्थानं तेजोमूर्तिः पथर्जुना ॥९३
कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत् ।
भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ॥९४
यत् पुण्यफलमाप्नोति गां दत्वा विधिवद्गुरोः ।
तत् पुण्यफलमाप्नोति भिक्षां दत्वा द्विजो गृही ॥९५
भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम् ।
वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत् ॥९६
नश्यन्ति हव्यकव्यानि नराणामविजानताम् ।
भस्माभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ॥९७
विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु ।
निस्तारयति दुर्गाच्च महतश्चैव किल्विषात् ॥९८

संप्राप्ताय त्वतिथये प्रदद्यादासनोदके ।
अन्नं चैव यथाशक्ति संस्कृत्य विधिपूर्वकम् ॥९९
शिलानप्युञ्छतो नित्यं पंचाग्नीनपि जुह्वतः ।
सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन् ॥१००
तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥१०१
एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः ।
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥१०२
नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा ।
उपस्थितं गृहे विद्याद्भार्या यत्राऽग्नयोऽपि वा ॥१०३
उपासते ये गृहस्थाः परपाकमबुद्धयः ।
तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनाम् ॥१०४
अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना ।
काले प्राप्तास्त्वकाले वा नास्यानश्नन् गृहे वसेत् ॥१०५
न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं वाऽतिथिपूजनम् ॥१०६
आसनावसथौ शय्यामनुव्रज्यामुपासनम् ।
उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम् ॥१०७
वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् ।
तस्याप्यन्नं यथाशक्ति प्रदद्यान्न वलिं हरेत् ॥१०८
न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् ।
भोजनार्थं हि ते शंसन्वान्ताशीत्युच्यते बुधैः ॥१०९

न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते ।
वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च ॥११०
यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् ।
भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् ॥१११
वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ ।
भोजयेत् सह भृत्यैस्तावानृशंस्यं प्रयोजयन् ॥११२
इतरानपि सख्यादीन् संप्रीत्या गृहमागतान् ।
प्रकृत्यान्नं यथाशक्ति भोजयेत् सह भार्यया ॥११३
सुवासिनीः कुमारीश्च रोगिणो गर्भिणीःस्त्रियः ।
अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन् ११४
अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः ।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः ॥११५
भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैवहि ।
भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पति ॥११६
देवानृषीन्मनुष्यांश्च पितॄन् गृह्याश्च देवताः ।
पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् ॥११७
अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् ।
यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते ॥११८
राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान् ।
अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः ॥११९
राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थिते ।
मधुपर्केण संपूज्यौ न त्वयज्ञ इति स्थितिः ॥१२०

सायंत्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत्।
वैश्वदेवं हि नामैतत् सायं प्रातर्विधीयते ॥१२१
पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥१२२
पितॄणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः।
तच्चामिषेण कर्तव्यं प्रशस्तेन प्रयत्नतः ॥१२३
तत्र ये भोजनीयाः स्युर्ये च वर्ज्या द्विजोत्तमाः।
यावन्तश्चैव यैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः ॥१२४
द्वौ दैवे पितृकार्ये त्रिनेकैकमुभयत्र वा।
भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे ॥१२५
सत्क्रियां देशकालौ च शौचं ब्राह्मण सम्पदः।
पञ्चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् ॥१२६
प्रथिता प्रेतकृत्यैषा पित्र्यं नाम विधुक्षये।
तस्मिन् युक्तस्यैति नित्यं प्रेतकृत्यैव लौकिकी ॥१२७
श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥
एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्।
पुष्कलं फलमाप्नोति नामन्त्रज्ञान्बहूनपि ॥१२६
दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्।
तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः ॥१३०
सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते।
एकस्तान् मन्त्रवित् प्रीतः सर्वानर्हति धर्मतः ॥१३१

ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च ।
न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुद्ध्यतः ॥१३२
यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित् ।
तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुडान् ॥१३३
ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथापरे ।
तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथापरे ॥१३४
ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः ।
हव्यानि तु यथान्यायं सर्वेष्वेव चतुर्ष्वपि ॥१३५
अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः ।
अश्रोत्रियो वा पुत्रः स्यात् पिता स्याद्वेदपारगः ॥१३६
ज्यायांसमनयोर्विद्यात् यस्य स्याच्छ्रोत्रियः पिता ।
मन्त्रसंपूजनार्थं तु सत्कारमितरोऽर्हति ॥१३७
न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः ।
नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विजम् ॥१३८
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ।
तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च ॥१३९
यः सङ्गतानि कुरुते मोहाच्छ्राद्धेन मानवः ।
स स्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रो द्विजाधमः ॥१४०
सम्भोजनी साभिहिता पैशाची दक्षिणा द्विजैः ।
इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनि ॥१४१
यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् ।
तथाऽनृचे हविर्दत्त्वा न दाता लभते फलम् ॥१४२

दातॄन् प्रतिग्रहीतॄंश्च कुरुते फलभागिनः।
विदुषे दक्षिणां दत्त्वा विधिवत् प्रेत्य चेह च ॥१४३
कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिम्।
द्विषिता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥१४४
यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेद पारगम्।
शाखान्तगमथाध्वर्युं छन्दोगन्तु समाप्तिकम् ॥१४५
एषामन्यतमो यस्य भुञ्जीत श्राद्धमर्चितः।
पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी ॥१४६
एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ॥१४७
मातामहं मातुलञ्च स्वस्त्रीयं श्वशुरं गुरुम्।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥१४८
न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित्।
पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः ॥१४९
ये स्तेनपतितक्लीवा ये च नास्तिकवृत्तयः।
तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥१५०
जटिलं चानधीयानं दुर्बलं कितवं तथा।
याजयन्ति च ये पूगां स्तांश्च श्राद्धे न भोजयेत् ॥१५१
चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा।
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः १५२
प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः।
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥१५३

यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः ।
ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च ॥१५४
कुशीलवोऽवकीर्णी च वृषलीपतिरेव च ।
पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥१५५
भृतकाध्यापको यश्च भृतकाध्यापितस्तथा ।
शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥१५६
अकारणे परित्यक्ता मातापित्रोर्गुरोस्तथा ।
ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः ॥१५७
अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥१५८
पित्रा विवदमानश्च कितवो मद्यपस्तथा ।
पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥१५९
धनुःशराणां कर्ता च यश्चाग्रेदिधिषूपतिः ।
मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥१६०
भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा ।
उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च ॥१६१
हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ।
पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥१६२
स्रोतसां भेदको यश्च तेषां चावरणे रतः ।
गृहसम्वेशको दूतो वृक्षारोपक एव च ॥१६३
श्वक्रीडी श्येनजीवी च कन्यादूषक एव च ।
हिंस्रो वृषलवृत्तिश्च गणानां चैव याजकः ॥१६४

आचारहीनः क्लीवश्च नित्यं याचनकस्तथा ।
कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च ॥१६५
औरभ्रिको माहिषिकः परपूर्वापतिस्तथा ।
प्रेतनिर्या ( प ) तकश्चैव वर्जनीयाः प्रयत्नतः ॥१६६
एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् ।
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥१६७
ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति ।
तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ॥१६८
अपङ्क्त्यदाने यो दातुर्भवत्यूर्ध्वं फलोदयः ।
दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः ॥१६९
अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्त्रादिभिस्तथा ।
अपांक्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते ॥१७०
दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥१७१
परिवित्तिः परिवेत्ता यया च परिविद्यते ।
सर्वे ते नरकं यान्ति दातृयाजकपंचमाः ॥१७२
भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः ।
धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥१७३
परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ ।
पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः ॥१७४
तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् ॥१७५

अपाङ्क्त्यो यावतः पांक्तयान् भुञ्जानाननुपश्यति ।
तावतां न फलं तत्र दाता प्राप्नोति बालिशः ॥१७६

वीक्ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु ।
पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥१७७

यावतः संस्पृशेदङ्गैर्ब्राह्मणाञ्छूद्रयाजकः ।
तावतां न भवेद्दातुः फलं दानस्य पौर्तिकम् ॥१७८

वेदविद्यापि विप्रोऽस्य लोभात् कृत्वा प्रतिग्रहम् ।
विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि ॥१७९

सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम् ।
नष्टं देवलके दत्तमप्रतिष्ठं तु वार्धुषौ १८०

यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् ।
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ॥१८१

इतरेषु त्वपांङ्क्त्येषु यथोद्दिष्टेष्वसाधुषु ।
मेदोऽसृङ्मांसमज्जास्थि वदन्त्यन्नं मनीषिणः ॥१८२

अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः ।
तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान् पङ्क्तिपावनान् ॥१८३

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च ।
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः ॥१८४

त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडङ्गवित् ।
ब्रह्मदेयात्मसन्तानो ज्येष्ठसामग एव च ॥१८५

वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः ।
शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपावनाः ॥१८६

पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते।
निमन्त्रयीत त्र्यवरान्सम्यग्विप्रान्यथोदितान् ॥१८७
निमन्त्रितो द्विजः पित्र्ये नियतात्मा भवेत् सदा।
न च छन्दांस्यधीयीत यस्य श्राद्धं च तद्भवेत् ॥१८८
निमन्त्रितान्हि पितर उपतिष्ठन्ति तान् द्विजान्।
वायुवच्चानुगच्छन्ति तथासीनानुपासते ॥१८९
केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः।
कथञ्चिदप्यतिक्रामन्पापः सूकरतां व्रजेत् ॥१९०
आमन्त्रितस्तु यः श्राद्धे वृषल्या सह मोदते।
दातुर्यद् दुष्कृतं किंचित्तत् सर्वं प्रतिपद्यते ॥१९१
अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।
न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः ॥१९२
यस्मादुत्पत्तिरेतेषां सर्वेषामप्यशेषतः।
ये च यैरुपचर्याः स्युर्नियमैस्तान्निबोधत ॥१९३
मनोर्हिरण्यगर्भस्य ये मरीच्यादयः सुताः।
तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः ॥१९४
विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः।
अग्निष्वात्ताश्च देवानां मारीचा लोकविश्रुताः ॥१९५
दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्।
सुपर्णकिन्नराणां च स्मृता बर्हिषदोऽत्रिजाः ॥१९६
सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः।
वैश्यानामाज्यपा नाम शूद्राणां तु सुकालिनः ॥१९७

सोमपास्तु कवेः पुत्रा हविष्मन्तोऽङ्गिरः सुताः ।
पुलस्त्यस्याज्यपाः पुत्रा वसिष्ठस्य सुकालिनः ॥१९८

अग्निदग्धानग्निदग्धान्काव्यान्बर्हिषदस्तथा ।
अनग्निष्वात्तांश्च सौम्यांश्च बिप्राणामेव निर्दिशेत् ॥१९९

य एते तु गणा मुख्याः पितॄणां परिकीर्तिताः ।
तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम् ॥२००

ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः ।
देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः ॥२०१

राजतैर्भाजनैरेषामथो वा राजतान्वितैः ।
वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते ॥२०२

देवकार्याद्द्विजातीनां पितृकार्यं विशिष्यते ।
दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतम् ॥२०३

तेषामारक्षभूतं तु पूर्वं दैवं नियोजयेत् ।
रक्षांसि हि विलुम्पन्ति श्राद्धमारक्षवर्जितम् ॥२०४

दैवाद्यन्तं तदीहेत पित्राद्यन्तं न तद्भवेत् ।
पित्राद्यन्तं त्वीहमानः क्षिप्रं नश्यति सान्वयः ॥२०५

शुचिं देशं विविक्तं च गोमयेनोपलेपयेत् ।
दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् ॥२०६

अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि ।
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा ॥२०७

आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक् पृथक् ।
उपस्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेशयेत् ॥२०८

उपवेश्य तु तान्विप्रानासनेष्वजुगुप्सितान् ।
गन्धमाल्यैः सुरभिभिरर्चयेद्देवपूर्वकम् ॥२०९
तेषामुदकमानीय सपवित्रांस्तिलानपि ।
अग्नौकुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह ॥२१०
अग्नेः सोमयमाभ्यां च कृत्वाप्यायनमादितः ।
हविर्दानेन विधिवत्पश्चात्सन्तर्पयेत् पितॄन् ॥२११
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ।
यो ह्यग्निः स द्विजोविप्रैर्मन्त्रदर्शिभिरुच्यते ॥२१२
अक्रोधनान्सुप्रसादान्वदन्त्येतान्पुरातनाः ।
लोकस्याप्यायने युक्ताञ्छ्राद्धदेवान्द्विजोत्तमान् ॥२१३
अपसव्यमग्नौ कृत्वा सर्वमावृत्परिक्रमम् ।
अपसव्येन हस्तेन निर्वपेदुदकं भुवि ॥२१४
त्रींस्तु तस्माद्धविःशेषात् पिण्डान्कृत्वा समाहितः ।
औदकेनैव विधिना निर्वपेद्दक्षिणामुखः ॥२१५
न्युप्य पिण्डांस्ततस्तांस्तु प्रयतो विधिपूर्वकम् ।
तेषु दर्भेषु तं हस्तं निमृज्याल्लेपभागिनाम् ॥२१६
आचम्योदक्परावृत्य त्रिरायम्य शनैरसून् ।
षड्ऋतूंश्च नमस्कुर्यात्पितॄनेव च मन्त्रवित् ॥२१७
उदकं निनयेच्छेषं शनैः पिण्डान्तिकेपुनः ।
अवजिघ्रेच्च तान्पिण्डान्यथान्युप्तान्समाहितः ॥२१८
पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः ।
तानेव विप्रानासीनान्विधिवत्पूर्वमाशयेत् ॥२१९

ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् ।
विप्रवद्वापि तं श्राद्धं स्वकं पितरमाशयेत् ॥२२०

पिता यस्य निवृत्तः स्याज्जीवेच्चापि पितामहः ।
पितुः स नाम सङ्कीर्त्य कीर्तयेत्प्रपितामहम् ॥२२१

पितामहो वा तच्छ्राद्धं भुञ्जीतेत्यब्रवीन्मनुः ।
कामं वा समनुज्ञातः स्वयमेव समाचरेत् ॥२२२

तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम् ।
तत्पिण्डाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन् ॥२२३

पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्धितम् ।
विप्रांतिके पितॄन्ध्यायञ्छनकैरुपनिक्षिपेत् ॥२२४

उभयोर्हस्तयोर्मुक्तं यदन्नमुपनीयते ।
तद्विप्रलुम्पन्त्यसुराः सहसा दुष्टचेतसः ॥२२५

गुणांश्च सूपशाकाद्यान् पयो दधि घृतं मधु ।
विन्यसेत्प्रयतः पूर्वं भूमावेव समाहितः ॥२२६

भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च ।
हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥२२७

उपनीय तु तत्सर्वं शनकैः सुसमाहितः ।
परिवेषयेत प्रयतो गुणान्सर्वान्प्रचोदयन् ॥२२८

नास्रमापातयेज्जातु न कुप्येन्नानृतं वदेत् ।
न पादेन स्पृशेदन्नं न चैतदवधूनयेत् ॥२२९

अस्रं गमयति प्रेतान् कोपोऽरीननृतं शुनः ।
पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम् ॥२३०

यद्यद्रोचेत विप्रेभ्यस्तत्तद्द्याद‌मत्सरः।
ब्रह्मोद्याश्च कथाः कुर्यात्पितॄणामेतदीप्सितम् ॥२३१

स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि।
आख्यानानीतिहासांश्च पुराणानि खिलानि च ॥२३२

हर्षयेद्‌ब्राह्मणांस्तुष्टो भोजयेच्च शनैः शनैः।
अन्नाद्येनासकृच्चैतान्गुणैश्च परिचोदयेत् ॥२३३

व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत्।
कुतपं चासनं दद्यात्तिलैश्च विकिरेन्महीम् ॥२३४

त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः।
त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् ॥२३५

अत्युष्णं सर्वमन्नं स्याद्भुञ्जीरंस्ते च वाग्यताः।
न च द्विजातयो ब्रूयुर्दात्रा पृष्टाहविर्गुणान् ॥२३६

यावदुष्णं भवत्यन्नं यावदश्नन्ति वाग्यताः।
पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः॥२३७

यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः।
सोपानत्कश्च यद्भुक्ते तद्वै रक्षांसि भुञ्जते ॥२३८

चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च।
रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान् ॥२३९

होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते।
दैवे हविषि पित्र्ये वा तद्गच्छत्ययथातथम् २४०

घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः।
श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः ॥२४१

खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत् ।
हिनातिरिक्तगात्रो वा तमप्यपनयेत्पुनः ॥२४२

ब्राह्मणं भिक्षुकं वाऽपि भोजनार्थमुपस्थितम् ।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥२४३

सार्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा ।
समुत्सृजेद्भुक्तवतामग्रतो विकिरन् भुवि ॥२४४

असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ।
उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः ॥२४५

उच्छेषणं भूमिगतमजिह्मस्याशठस्य च ।
दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते ॥२४६

आसपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु ।
अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत् ॥२४७

सहपिण्डक्रियायां तु कृतायामस्य धर्मतः ।
अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः ॥२४८

श्राद्धं भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति ।
स मूढो नरकं याति कालसूत्रमवाक्शिराः ॥२४९

श्राद्धभुग् वृषलीतल्पं तदहर्योऽधिगच्छति ।
तस्या पुरीषे तं मासं पितरस्तस्य शेरते ॥२५०

पृष्ट्वा स्वदितमित्येवं तृप्तानाचामयेत्ततः ।
आचान्तांश्चानुजानीयादभितो रम्यतामिति ॥२५१

स्वधाऽस्त्वित्येव तं ब्रूयुर्ब्राह्मणास्तदनन्तरम् ।
स्वधाकारः परा ह्याशीः सर्वेषु पितृकर्मसु ॥२५२

ततो भुक्तवतां तेषामन्नशेषं निवेदयेत् ।
यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्ततो द्विजैः ॥२५३

पित्र्ये स्वदितमित्येवं वाच्यं गोष्ठे तु सुश्रृतम् ।
सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि ॥२५४

अपराह्णस्तथा दर्भा वास्तुसम्पादनं तिलाः ।
सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्मसु सम्पदः ॥२५५

दर्भाः पवित्रं पूर्वाह्णो हविष्याणि च सर्वशः ।
पवित्रं यच्च पूर्वोक्तं विज्ञेया हव्यसम्पदः ॥२५६

मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम् ।
अक्षारलवणं चैव प्रकृत्या हविरुच्यते ॥२५७

विसर्ज्य ब्राह्मणांस्तांस्तु प्रयतो विधिपूर्वकम् ।
दक्षिणां दिशमाकांक्षन्याचेतेमान्वरान्पितॄन् ॥२५८

दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ।
श्रद्धा च नो माव्यगमद्बहुदेयं च नोऽस्त्विति ॥२५९

एवं निर्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम् ।
गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् ॥२६०

पिण्डनिर्वपणं केचित्पुरस्तादेव कुर्वते ।
वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु वा ॥२६१

पतिव्रता धर्मपत्नी पितृपूजनतत्परा ।
मध्यमं तु ततः पिण्डमद्यात्सम्यक् सुतार्थिनी ॥२६२

आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम् ।
धनवन्तं प्रजावन्तं सात्त्विकं धार्मिकं तथा ॥२६३

प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ।
ज्ञातिभ्यः सत्कृतं दत्त्वा बान्धवानपि भोजयेत् ॥२६४

उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः ।
ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः ॥२६५

हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते ।
पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः ॥२६६

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं तृप्यन्ति विधिवत्पितरो नृणाम् ॥२६७

द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु ।
औरभ्रेणाथ चतुरः शाकुनेनाथ पंच वै ॥२६८

षण्मासांश्छागमांसेन पार्षतेन च सप्त वै ।
अष्टावेणेय मांसेन रौरवेण नवैव तु ॥२६९

दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः ।
शशकूर्मयोस्तु मांसेन मासानेकादशैव तु ॥२७०

संवत्सरे तु गव्येन पयसा पायसेन च ।
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥२७१

कालशाकं महाशल्काः खड्गलोहामिषं मधु ।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्वशः ॥२७२

यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च ॥२७३

अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥२७४

यद्यद्ददाति विधिवत् सम्यक् श्रद्धासमन्वितः ।
तत्तत् पितॄणां भवति परत्रानन्तमक्षयम् ॥२७५

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतरा ॥२७६

युक्षु कुर्वन् दिनर्क्षेषु सर्वान्कामान्समश्नुते ।
अयुक्षु तु पितॄन् सर्वान्प्रजां प्राप्नोति पुष्कलाम् ॥२७७

यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ।
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते ॥२७८

प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा ।
पित्र्यमा निधनात्कार्यं विधिवद्दर्भपाणिना ॥२७९

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा ।
सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते ॥२८०

अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् ।
हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञिकमन्वहम् ॥२८१

न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते ।
न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः ॥२८२

यदेव तर्पयत्यद्भिः पितॄन्स्नात्वा द्विजोत्तमः ।
तेनैव कृत्स्नमाप्नोति पितृयज्ञक्रियाफलम् ॥२८३

वसून्वदन्ति वै पितॄन् रुद्रांश्चैव पितामहान् ।
प्रपितामहांस्तथादित्यान् श्रुतिरेषा सनातनी ॥२८४

विघसाशी भवन्नित्यं नित्यं वामृतभोजनः ।
विघसो भुक्तशेषं तु यज्ञशेषं तथामृतम् ॥२८५

एतद्वोऽभिहितं सर्वं विधानं पाञ्चयज्ञिकम् ।
द्विजातिमुख्यवृत्तीनां विधानं श्रूयतामिति ॥२८६

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां तृतीयोऽध्यायः ।

—:०:—

## चतुर्थोऽध्यायः ।

### अथ गृहस्थाश्रम वर्णनम् ।

चतुर्थमायुषो भागमुषित्वाऽऽद्यं गुरौ द्विजः ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥१
अद्रोहेणैव भूतनामल्पद्रोहेण वा पुनः ।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥२
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ॥३
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपिवा न श्ववृत्त्या कदाचन ॥४
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥५
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेत् ॥६
कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
त्र्यहैहिको वाऽपि भवेदश्वस्तनिक एव वा ॥७

चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम् ।
ज्यायान् परःपरो ज्ञेयो धर्मतो लोकजित्तमः ॥८
षट् कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥९
वर्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः ।
इष्टीः पार्वायणान्तीयाः केवला निर्वपेत् सदा ॥१०
न लौकवृत्तंवर्त्तेत वृत्तिहेतोः कथञ्चन ।
अजिह्ममशठां शुद्धां जीवेद्ब्राह्मणजीविकाम् ॥११
सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् ।
सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः ॥१२
अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः ।
स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत् ॥१३
वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् ॥१४
नेहेतार्थान् प्रसङ्गेन न विरुद्धेन कर्मणा ।
न विद्य ( कल्प ) मानेष्वर्थेषु नार्त्यामपि यतस्ततः ॥१५
इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः ।
अतिप्रसक्तिञ्चैतेषां मनसा सन्निवर्त्तयेत् ॥१६
सर्वान्परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः ।
यथा तथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता ॥१७
वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।
वेषवाग् बुद्धिसारूप्यमाचरन्विचरेदिह ॥१८

बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च ।
नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् ॥१९
यथा यथा हि पुरुषः शास्त्रं समधिगच्छति ।
तथा तथा विजानाति विज्ञानं चास्य रोचते ॥२०
ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा ।
नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत् ॥२१
एतानेके महायज्ञान्यज्ञशास्त्रविदो जनाः ।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥२२
वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा ।
वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयाम् ॥२३
ज्ञानेनैवापरे विप्रा यजन्ते तैर्मखैः सदा ।
ज्ञानमूलां क्रियामेषां पश्यन्तो ज्ञानचक्षुषा ॥२४
अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा ।
दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि ॥२५
सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः ।
पशुना त्वयनान्ते तु समान्ते सौमिकैर्मखैः ॥२६
नानिष्ट्वा नवशस्येष्ट्या पशुना चाग्निमान् द्विजः ।
नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः ॥२७
नवेनानर्चिता ह्यस्य पशुहव्येन चाग्नयः ।
प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्धिनः ॥२८
आसनाशनशय्याभिरद्भिर्मूलफलेन वा ।
नास्य कश्चिद्वसेद्गेहे शक्तितोऽनर्चितोऽतिथिः ॥२९

पाषण्डिनो विकर्मस्थान्वैड़ालव्रतिकाञ्छठान्।
हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥३०
वेदविद्याव्रतस्नाताञ्छ्रोत्रियान् गृहमेधिनः।
पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत् ॥३१
शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना।
संविभागश्च भूतेभ्यः कर्तव्योऽनुपरोधतः ॥३२
राजतो धनमन्विच्छेत्संसीदन्स्नातकः क्षुधा।
याज्यान्तेवासिनोर्वाऽपि न त्वन्यत इति स्थितिः ॥३३
न सीदेत्स्नातको विप्रः क्षुधा शक्तः कथंचन।
न जीर्णमलवद्वासा भवेच्च विभवे सति ॥३४
क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः।
स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च ॥३५
वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम्।
यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ॥३६
नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥३७
न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति।
न चोदके निरीक्षेत स्वरूपमिति धारणा ॥३८
मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्।
प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् ॥३९
नोपगच्छेत्प्रमत्तोऽपि स्त्रियमार्तवदर्शने।
समान शयने चैव न शयीत तया सह ॥४०

रजसाऽभिप्लुतां नारीं नरस्य ह्युपगच्छतः ।
प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रहीयते ॥४१
तां विवर्जयतस्तस्य रजसा समभिप्लुताम् ।
प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रवर्धते ॥४२
नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीम् ।
क्षुवतीं जृम्भमाणां वा न चासीनां यथासुखम् ॥४३
नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् ।
न पश्येत्प्रसवन्तीं च तेजस्कामो द्विजोत्तमः ॥४४
नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् ।
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ॥४५
न फालकृष्टे न जले न चित्यां न च पर्वते ।
न जीर्णदेवायतने न वल्मीके कदाचन ॥४६
न ससत्वेषु गर्तेषु न गच्छन्नापि च स्थितः ।
न नदीतीरमासाद्य न च पर्वतमस्तके ॥४७
वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गाः ।
न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनम् ॥४८
तिरस्कृत्योच्चरेत्काष्ठलोष्ठपत्रतृणादि च ।
नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः ॥४९
मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा ॥५०
छायायामन्धकारे वा रात्रावहनि वा द्विजः ।
यथासुखमुखः कुर्यात्प्राणबाधभयेषु च ॥५१

प्रत्यग्निं प्रतिसूर्यं च प्रतिसोमोदकद्विजम्।
प्रतिगां प्रतिवातं च प्रज्ञा नश्यति मेहतः॥५२
नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम्।
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्॥५३
अधस्तन्नोपदध्याच्च न चैनमभिलङ्घयेत्।
न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेत्॥५४
नाश्नीयात् सन्धिवेलायां न गच्छेन्नापि संविशेत्।
न चैव प्रलिखेद्भूमिं नात्मनोऽपहरेत्स्रजम्॥५५
नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत्।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा॥५६
नैकः स्वप्याच्छून्यगेहे श्रेयांसं न प्रबोधयेत्।
नोदक्ययाऽभिभाषेत यज्ञं गच्छेन्न चावृतः॥५७
अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ।
स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्॥५८
न वारयेद्गां धयन्तीं न चाचक्षीत कस्यचित्।
न दिवीन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुधः॥५९
नाधार्मिके वसेद्ग्रामे न व्याधिबहुले भृशम्।
नैकः प्रपद्येताध्वानं न चिरं पर्वते वसेत्॥६०
न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते।
न पाषण्डिगणाक्रान्ते नोपसृष्टेऽन्त्यजैर्नृभिः॥६१
न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत्।
नातिप्रगे नातिसायं न सायं प्रातराशितः॥६२

न कुर्वीत वृथाचेष्टां न वार्यञ्जलिना पिबेत् ।
नोत्सङ्गे भक्षयेद्भक्ष्यान्न जातु स्यात् कुतूहली ॥६३

न नृत्येन्नैव गायेच्च न वादित्राणि वादयेत् ।
नास्फोटयेन्न च क्ष्वेडेन्न च रक्तो विरावयेत् ॥६४

न पादौ धावयेत्कांस्ये कदाचिदपि भाजने ।
न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषते ॥६५

उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च ॥६६

नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः ।
न भिन्नशृङ्गाक्षिखुरैर्न बालधिविरूपितैः ॥६७

विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः ।
वर्णरूपोपसंपन्नैः प्रतोदेनाक्षिपन्भृशम् ॥६८

बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथाऽऽसनम् ।
न च्छिन्द्यान्नखरोमाणि दन्तैर्नोत्पाटयेन्नखान् ॥ ६९

न मृल्लोष्टं च मृद्नीयान्न छिन्द्यात्करजैस्तृणम् ।
न कर्म निष्फलं कुर्यान्नायत्यामसुखोदयम ॥ ७०

लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः ।
स विनाशं व्रजत्याशु सूचकोऽशुचिरेव च ॥ ७१

न विगृह्य कथां कुर्याद्बहिर्माल्यं न धारयेत् ।
गवां च यानं पृष्ठेन सर्वथैव विगर्हितम् ॥ ७२

अद्वारेण च नातीयाद्ग्रामं वा वेश्म वा वृतम् ।
रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत् ॥ ७३

नाक्षैर्दीव्येत्कदाचित्तु स्वयं नोपानहौ हरेत्।
शयनस्थो न भुञ्जीत न पाणिस्थं न चासने॥ ७४
सर्वं च तिलसम्बद्धं नाद्यादस्तमिते रवौ।
न च नग्नः शयीतेह न चोच्छिष्टः क्वचिद्व्रजेत्॥ ७५
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत्।
आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात्॥ ७६
अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हिचित्।
न विण्मूत्रमुदीक्षेत न बाहुभ्यां नदीं तरेत्॥ ७७
अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः।
न कार्पासास्थि न तुषान्दीर्घमायुर्जिजीविषुः॥ ७८
न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कसैः।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः॥ ७९
न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्।
न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत्॥ ८०
यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम्।
सोऽसंवृतं नाम तमः सह तेनैव मज्जति॥ ८१
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः।
न स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः॥ ८२
केशग्रहान् प्रहारांश्च शिरस्येतान् विवर्जयेत्।
शिरःस्नातश्च तैलेन नाङ्गं किञ्चिदपि स्पृशेत्॥ ८३
न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम्॥ ८४

दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमो वेशो दशवेशसमो नृपः ॥ ८५
दशसूनासहस्राणि यो वाहयति सौनिकः ।
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ॥ ८६
यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः ।
स पर्यायेण यातीमान्नरकानेकविंशतिम् ॥ ८७
तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।
नरकं कालसूत्रं च महानरकमेव च ॥ ८८
संजीवनं महावीचिं तपनं सम्प्रतापनम् ।
संहातं च सकाकोलं कुड्मलं पूतिमृत्तिकम् ॥ ८९
लोहशंकुमृजीषं च पन्थानं शाल्मलीं नदीम् ।
असिपत्रवनं चैव लोहदारकमेव च ॥ ९०
एतद्विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः ।
न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकांक्षिणः ॥ ९१
ब्राह्मे मुहूर्ते बुद्ध्येत धर्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥ ९२
उत्थायावश्यकं कृत्वा कृतशौचः समाहितः ।
पूर्वां सन्ध्यां जपंस्तिष्ठेत् स्वकाले चापरां चिरं ॥ ९३
ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः ।
प्रज्ञां यशश्च किर्तिं च ब्रह्मवर्चसमेव च ॥९४
श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपंचमान् ॥ ९५

पुष्ये तु च्छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥ ९६
यथाशास्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः ।
विरमेत् पक्षिणीं रात्रिं तदेवैकमहर्निशं ॥ ९७
अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् ।
वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु सम्पठेत् ॥ ९८
नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ ।
न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत् ॥ ९९
यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत् ।
ब्रह्मछन्दस्कृतं चैव द्विजो युक्तो ह्यनापदि ॥ १००
इमान्नित्यमनध्यायानधीयानो विवर्जयेत् ।
अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकं ॥ १०१
कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥१०२
विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥१०३
एतांस्त्वभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥१०४
निर्घाते भूमिचलने ज्योतिषां चोपसर्जने ।
एतानाकालिकान्विद्यादनध्यायानृतावपि ॥१०५
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने ।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥१०६

नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।
धर्मनैपुण्यकामानां पूतगन्धे च सर्वशः ॥१०७
अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥१०८
उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने ।
उच्छिष्टः श्राद्धभुक्चैव मनसाऽपि न चिन्तयेत् ॥१०६
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टनिकेतनं ।
त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥११०
यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् ॥१११
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ॥
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥११२
नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः ।
अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ॥११३
अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ।
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ॥११४
पांशुवर्षे दिशां दाहे गोमायुविरुते तथा ।
श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥११५
नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ।
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥११६
प्राणि वा यदि वाऽप्राणि यत्किञ्चिच्छ्राद्धिकं भवेत् ।
तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः ॥११७

चौरैरुपप्लुते ग्रामे संभ्रमे चाग्निकारिते।
आकालिकमनध्यायं विद्यात् सर्वाद्भुतेषु च ॥११८
उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतं।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥११९
नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम्।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥१२०
न विवादे न कलहे न सेनायां न सङ्गरे।
न भुक्तमात्रे नाजीर्णे न वमित्वा न शुक्तके ॥१२१
अतिथिं चाननुज्ञाप्य मारुते वाति वा भृशम्।
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ॥१२२
सामध्वनावृग्यजुषी नाधीयीत कदाचन।
वेदस्याधीत्य वाऽप्यन्तमारण्यकमधीत्य च ॥१२३
ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥१२४
एतद्विदन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहम्।
क्रमशः पूर्वमभ्यस्य पश्चाद्वेदमधीयते ॥१२५
पशुमण्डुकमार्जारश्वसर्पनकुलाखुभिः।
अन्तरागमने विद्यादनध्यायमहर्निशम् ॥१२३
द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः।
स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥१२७
अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम्।
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥१२८

न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥१२६
देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा ।
नाक्रामेत् कामतश्छायां बभ्रुणो दीक्षितस्य च ॥१३०
मध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् ।
सन्ध्ययोरुभयोश्चैव न सेवेत चतुष्पथम ॥१३१
उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च ।
श्लेष्मनिष्ठ्यूतवान्तानि नाधिनिष्ठेत्तु कामतः ॥१३२
वैरिणं नोपसेवेत सहायं चैव वैरिणः ।
अधार्मिकं तस्करं च परस्यैव च योषितम् ॥१३३
न हीदृशमनायुष्यं लोके किञ्चन विद्यते ।
यादृशं पुरुषस्येह परदारोपसेवनम् ॥१३४
क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् ।
नावमन्येत वै भूष्णुः कृशानपि कदाचन ॥१३५
एतत्त्रयं हि पुरुषं निर्दहेदवमानितम ।
तस्मादेतत्त्रयं नित्यं नावमन्येत बुद्धिमान् ॥१३६
नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः ।
आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ॥१३७
सत्यं ब्रूयात्प्रियं ब्रूयान्नब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥१३८
भद्रंभद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् ।
शुष्कवैरं विवादं च न कुर्यात्केनचित् सह ॥१३९

नातिकल्यं नातिसायं नातिमध्यं दिने स्थिते।
नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह: ॥१४०
हीनाङ्गानतिरिक्ताङ्गान् विद्याहीनान् वयोऽधिकान्।
रूपद्रविणहीनांश्च जातिहीनांश्च नाक्षिपेत् ॥१४१
न स्पृशेत्पाणिनोच्छिष्टो विप्रो गोब्राह्मणानलान्।
न चापि पश्येदशुचिः स्वस्थो ज्योतिर्गणान्दिवि ॥१४२
स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्।
गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु ॥१४३
अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः।
रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत् ॥१४४
मङ्गलाचारयुक्त स्यात्प्रयतात्मा जितेन्द्रियः।
जपेच्च जुहुयाच्चैव नित्यमग्निमतन्द्रितः ॥१४५
मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥१४६
वेदमेवाभ्यसे ( जपे ) न्नित्यं यथाकालमतन्द्रितः।
तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्य उच्यते ॥१४७
वेदाभ्यासेन सततं शौचेन तपसैव च।
अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम ॥१४८
पौर्विकीं संस्मरन् जातिं ब्रह्मैवाभ्यस्यते द्विजः।
ब्रह्माभ्यासेन चाजस्रमनन्तं सुखमश्नुते ॥१४९
सावित्रान् शान्तिहोमांश्च कुर्यात् पर्वसु नित्यशः।
पितॄंश्चैवाष्टकास्वर्चेन्नित्यमन्वष्टकासु च ॥१५०

दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टान्ननिषेकं च दूरादेव समाचरेत् ॥१५१

मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ।
पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम् ॥१५२

दैवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् ।
ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु ॥१५३

अभिवादयेद्वृद्धांश्च दद्याच्चैवासनं स्वकम् ।
कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात् ॥१५४

श्रुतिस्मृत्युदितं सम्यङ्निवद्धं स्वेषु कर्मसु ।
धर्ममूलं निषेवेत सदाचारमतन्द्रितः ॥१५५

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥१५६

दुराचारो हि पुरुषो लोके भवति निन्दितः ।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च ॥१५७

सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥१५८

यद्यत् परवशं कर्म तत्तद्यत्नेन वर्जयेत् ।
यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ॥१५९

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः ॥१६०

यत् कर्म कुर्वतोऽस्य स्यात् परितोषोऽन्तरात्मनः ।
तद् प्रयत्नेन कुर्वीत बिपरीतं तु बर्जयेत् ॥१६१

आचार्यं च प्रवक्तारं पितरं मातरं गुरुम्।
न हिंस्याद् ब्राह्मणान् गांश्च सर्वांश्चैव तपस्विनः॥१६२
नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम्।
द्वेषं दम्भं (स्तम्भं) च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत्॥१६३
परस्य दण्डं नोद्यच्छेत्क्रुद्धो नैनं (नैव) निपातयेत्।
अन्यत्र पुत्राच्छिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ॥१६४
ब्राह्मणायावगुर्यैव द्विजातिर्वधकाम्यया।
शतं वर्षाणि तामिस्रे नरके परिवर्तते॥१६५
ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम्।
एकविंशतिमाजातीः पापयोनिषु जायते॥१६६
अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः।
दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः॥१६७
शोणितं यावतः पांसून्संगृह्णाति महीतलात्।
तावतोऽब्दानमुत्रान्यैः शोणितोत्पादकोऽद्यते॥१६८
न कदाचिद् द्विजे तस्माद्विद्वानवगुरेदपि।
न ताडयेत्तृणेनापि न गात्रात्स्रावयेदसृक्॥१६९
अधार्मिको नरो यो हि यस्य चाप्यनृतं धनम्।
हिंसारतिश्च यो नित्यं नेहासौ सुखमेधते॥१७०
न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत्।
अधार्मिकाणां पापानामाशु पश्यन् विपर्ययम्॥१७१
नाधर्मश्चरितो लोके सद्यः फलति गौरिव।
शनैरावर्त्यमानस्तु कर्तुर्मूलानि कृन्तति॥१७२

यदि नात्मनि पुत्रेषु न चेत्पुत्रेषु नप्तृषु ।
न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः ॥१७३

अधर्मेणैधते तावत्ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥१७४

सत्यधर्मार्यवृत्तेषु शौचे चैवा रमेत् सदा ।
शिष्यांश्च शिष्याद्धर्मेण वाग्बाहूदरसंयतः ॥१७५

परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ।
धर्मं चाप्यसुखोदर्कं लोकवि ( सं ) क्रुष्टमेव च ॥१७६

न पाणिपादचपलो न नेत्रचपलोऽनृजुः ।
न स्याद्वाक्चपलश्चैव न परद्रोहकर्मधीः ॥१७७

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन्नरिष्यते ॥१७८

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ।
बालवृद्धातुरैर्वैद्यै र्ज्ञातिसम्बन्धिबान्धवैः ॥१७९

मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥१८०

एतैर्विवादान् संत्यज्य सर्वपापैः प्रमुच्यते ।
एभिर्जितैश्च जयति सर्वांल्लोकानिमान्गृही ॥१८१

आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः ।
अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः ॥१८२

जामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः ।
सम्बन्धिनो ह्यपां लोके पृथिव्यां मातृमातुलौ ॥१८३

आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः।
भ्राता ज्येष्ठः समः पित्रा भार्या पुत्र स्वका तनुः॥१८४
छाया स्वो दासवर्गश्च दुहिता कृपणं परम्।
तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा॥१८५
प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत्।
प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति॥१८६
न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे।
प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा॥१८७
हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतम्।
प्रतिगृह्णन्नविद्वांस्तु भस्मीभवति दारुवत्॥१८८
हिरण्यमायुरन्नं च भूर्गौश्चाप्योषतस्तनुम्।
अश्वश्चक्षुस्त्वचं वासो घृतं तेजस्तिलाः प्रजाः॥१८९
अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः।
अम्भस्यश्मप्लवेनेव सह तेनैव मज्जति॥१९०
तस्मादविद्वान्बिभियाद्यस्मात्तस्मात्प्रतिग्रहात्।
स्वल्पकेनाप्यविद्वान् हि पङ्के गौरिव सीदति॥१९१
न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे।
न वक व्रतिके विप्रे ( पापे ) नावेदविदि धर्मवित्॥१९२
त्रिष्वप्येतेषु दत्तं हि विधिनाऽप्यर्जितं धनम्।
दातुर्भवत्यनर्थाय परत्रादातुरेव च॥१९३
यथा प्लवेनौपलेन निमज्जत्युदके तरन्।
तथा निमज्जतोऽधस्तादज्ञौ दातृप्रतीच्छकौ॥१९४

धर्मध्वजी सदालुब्धश्छाद्मिको लोकदम्भकः ।
वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः ॥१९५
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च वकव्रतचरो द्विजः ॥१९६
ये वकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः ।
ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा ॥१९७
न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ।
व्रतेन पापं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदम्भनम् ॥१९८
प्रेत्येह चेदृशा विप्रा गर्ह्यन्ते ब्रह्मवादिभिः ।
छद्मना चरितं यच्च व्रतं रक्षांसि गच्छति ॥१९९
अलिङ्गी लिङ्गिवेषेण यो वृत्तिमुपजीवति ।
स लिङ्गिनां हरत्येनस्तिर्यग्योनौ च जायते ॥२००
परकीयनिपानेषु न स्नायाद्धि कदाचन ।
निपानकर्त्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते ॥२०१
यानशय्यासनान्यस्य कूपोद्यानगृहाणि च ।
अदत्तान्युपयुञ्जान एनसः स्यात्तुरीयभाक् ॥२०२
नदीषु देवखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥२०३
यमान्सेवेत सततं न नित्यं नियमान्बुधः ।
यमान्पतत्यकुर्वाणोनियमान्केवलान् भजन् ॥२०४
नाश्रोत्रियतते यज्ञे ग्रामयाजिकृते तथा ।
स्त्रिया क्लीवेन च हुते भुञ्जीत ब्राह्मणः क्वचित् ॥२०५

अश्लीक ( ल ) मेतत्साधूनां यत्रजुह्वत्यमी हविः।
प्रतीपमेतद्देवानां तस्मात्तत्परिवर्जयेत् ॥२०६

मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन।
केशकीटावपन्नं च पदा स्पृष्टं च कामतः ॥२०७

भ्रूणघ्नावेक्षितं चैव संस्पृष्टं चाप्युदक्यया।
पतत्रिणाऽवलीढं च शुना संस्पृष्टमेव च ॥२०८

गवा चान्नमुपाघ्रातं घुष्टान्नं च विशेषतः।
गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम् ॥२०९

स्तेनगायनयोश्चान्नं तक्ष्णोवार्धुषिकस्य च।
दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च ॥२१०

अभिशस्तस्य षण्ढस्य पुंश्चल्या दाम्भिकस्य च।
शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च ॥२११

चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः।
उग्रान्नं सूतिकान्नं च पर्याचान्तमनिर्दशम् ॥२१२

अनर्चितं वृथामांसमवीरायाश्च योषितः।
द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम् ॥२१३

पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा।
शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च ॥२१४

कर्मारस्य निषादस्य रङ्गावतरकस्य च।
सुवर्णकर्तुर्वेणस्य शस्त्रविक्रयिणस्तथा ॥२१५

श्ववतां शौण्डिकानां च चैलनिर्णेजकस्य च।
रञ्ज ( रज ) कस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥२१६

मृष्यन्ति ये चोपपतिं स्त्रीजितानां च सर्वशः ।
अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च ॥२१७
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥२१८
कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च ।
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति ॥२१९
पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ।
विष्ठावार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥२२०
य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्तिताः ।
तेषां त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः ॥२२१
भुक्त्वाऽतोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् ।
मत्या भुक्त्वाऽऽचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च ॥२२२
नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ।
आददीताममेवास्मादवृत्तावेकरात्रिकम् ॥ २२३
श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः ।
मीमांसित्वोभयं देवाः सममन्नमकल्पयन् ॥२२४
तान् प्रजापतिराहैत्य मा कृढ्वं विषमं समम् ।
श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ॥ २२५
श्रद्धयेष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः ।
श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्द्धनैः ॥ २२६
दानधर्मं निषेवेत नित्यमैष्टिकपौर्तिकम् ।
परितुष्टेन भावेन पात्रमासाद्य शक्तितः ॥ २२७

यत्किंचिदपि दातव्यं याचितेनानसूयया।
उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्वतः॥ २२८
वारिदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्॥ २२९
भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः।
गृहदोऽग्र्याणि वेश्मानि रूप्यदोरूपमुत्तमम्॥२३०
वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः।
अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम्॥ २३१
यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः।
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टिताम्॥ २३२
सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते।
वार्यन्नगोमहीवासस्तिलकांचन सर्पिषाम्॥ २३३
येन येन तु भावेन यद्यद्दानं प्रयच्छति।
तत्तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः॥ २३४
योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव वा।
तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये॥ २३५
न विस्मयेत तपसा वदेदिष्ट्वा च नानृतम्।
नार्तोऽप्यपवदेद्विप्रान्न दत्वा परिकीर्तयेत्॥ २३६
यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात्।
आयुर्विप्रापवादेन दानं च परिकीर्तनात्॥ २३७
धर्मं शनैः संचिनुयाद्वल्मीकमिव पुत्तिकाः।
परलोकसहायार्थं सर्वभूतान्यपीडयन्॥ २३८

नामुत्र हि सहायार्थं पिता माता च तिष्ठतः ।
न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलः ॥ २३९
एकः प्रजायते जन्तुरेक एव प्रलीयते ।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥ २४०
मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥ २४१
तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥ २४२
धर्मप्रधानं पुरुषं तपसा हतकिल्बिषम् ।
परलोकं नयत्याशु भास्वन्तं खशरीरिणम् ॥ २४३
उत्तमैरुत्तमैर्नित्यं सम्बन्धानाचरेत्सह ।
निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ॥ २४४
उत्तमानुत्तमान्गच्छन्हीनान्हीनांश्चवर्जयन् ।
ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम् ॥ २४५
दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन् ।
अहिंस्रो दमदानाभ्यां जयेत्स्वर्गं तथाव्रतः ॥ २४६
एधोदकं मूलफलमन्नमभ्युद्यतं च यत् ।
सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम् ॥ २४७
आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदिताम् ।
मेने प्रजापतिर्ग्राह्यामपि दुष्कृतकर्मणः ॥ २४८
नाश्नन्ति पितरस्तस्य दशवर्षाणि पंच च ।
न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥ २४९

शय्यां गृहान्कुशान्गन्धानपः पुष्पं मणीन्दधि ।
धाना मत्स्यान्पयो मांसं शाकं चैव न निर्णुदेत् ॥२५०
गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् ।
सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ॥ २५१
गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन् ।
आत्मनो वृत्तिमन्विच्छन् गृह्णीयात्साधुतः सदा ॥ २५२
आर्धिकः कुलमित्रं च गोपालो दासनापितौ ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥ २५३
यादृशोऽस्य भवेदात्मा यादृशं च चिकीर्षितम् ।
यथा चोपचरेदेनं तथाऽऽत्मानं निवेदयेत् ॥ २५४
योऽन्यथा संतमात्मानमन्यथा सत्सु भाषते ।
स पापकृत्तमो लोके स्तेन आत्मापहारकः ॥ २५५
वाच्यर्था नियताः सर्वे वाङ्मूला वाग्विनिःसृताः ।
तां तु यः स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः ॥ २५६
महर्षिपितृदेवानां गत्वाऽऽनृण्यं यथाविधि ।
पुत्रे सर्वं समासज्य वसेन्माध्यस्थ्यमास्थितः ॥२५७
एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनि ।
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति ॥२५८
एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ।
स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः शुभः ॥ २५९
अनेन विप्रो वृत्तेन वर्तयन् वेदशास्त्रवित् ।
व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते ॥ २६०

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां चतुर्थोऽध्यायः ॥

## पञ्चमोऽध्यायः ।

### तत्रादौ - अभक्ष्यवर्णनमाह—

श्रुत्वैतानृषयो धर्मान् स्नातकस्य यथोदितान् ।
इदमूचुर्महात्मानमनलप्रभवं भृगुम् ॥ १
एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठताम् ।
कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो ॥ २
स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः ।
श्रूयतां येन दोषेण मृत्युर्विप्राञ्जिघांसति ॥ ३
अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति । ४
लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च ।
अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च ॥ ५
लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ।
शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत् ॥ ६
वृथाकृसरसंयावं पायसापूपमेव च ।
अनुपाकृतमांसानि देवान्नानि हवींषि च ॥ ७
अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा ।
आविकं सन्धिनीक्षीरं विवत्सायाश्च गो पयः ॥८
आरण्यानां च सर्वेषां मृगाणां माहिषं विना ।
स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ॥९
दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसम्भवम् ।
यानि चैवाभिषूयन्ते पुष्पमूलफलैः शुभैः ॥ १०

क्रव्यादः शकुनीन् सर्वांस्तथा ग्रामनिवासिनः।
अनिर्दिष्टांश्चैकशफांष्टिट्टिभं च विवर्जयेत्॥ ११
कलविङ्कं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटम्।
सारसं रज्जुदालं च दात्यूहं शुकसारिके॥ १२
प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्।
निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च॥ १३
बकं चैव बलाकां च काकोलं खंजरीटकम्।
मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्वशः॥ १४
यो यस्य मांसमश्नाति स तन्मांसादउच्यते।
मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत्॥१५
पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः।
राजीवाः सिंहतुण्डाश्च सशल्काश्चैव सर्वशः॥ १६
न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान्।
भक्ष्येष्वपि समुद्दिष्टान् सर्वान् पंचनखांस्तथा॥ १७
श्वाविधं शल्यकं गोधां खड्ग कूर्मशशांस्तथा।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः॥ १८
छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः॥ १९
अमत्यैतानि षड्जग्ध्वा कृच्छ्रं सान्तपनं चरेत्।
यतिचान्द्रायणं वापि शेषेषूपवसेदहः॥ २०
संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः।
अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः॥ २१

यज्ञार्थं ब्राह्मणैर्बध्याः प्रशस्ता मृगपक्षिणः ।
भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरा ॥ २२
वभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणाम् ।
पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥ २३
यत्किंचित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम् ।
तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् ॥२४
चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः ।
यवगोधूमजं सर्वं पयसश्चैव विक्रिया ॥ २५
एतदुक्तं द्विजातीनां भक्ष्याभक्ष्यमशेषतः ।
मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने ॥ २६
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया ।
यथाविधि नियुक्तस्तु प्राणानामेव चात्यये ॥ २७
प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत् ।
स्थावरं जङ्गमं चैव सर्वं प्राणस्य भोजनम् ॥ २८
चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः ।
अहस्ताश्च सहस्तानां शूराणां चैव भीरवः ॥ २९
नात्ता दुष्यत्यदन्नाद्यान् प्राणिनोऽहन्यहन्यपि ।
धात्रैव सृष्टा ह्याद्याश्चप्राणिनोऽत्तार एव च ॥ ३०
यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ।
अतोऽन्यथाप्रवृत्तिस्तु राक्षसोविधिरुच्यते ॥३१
क्रीत्वा स्वयं वाऽप्युत्पाद्य परोपकृतमेव वा ।
देवान् पितॄंश्चार्चयित्वा खादन्मांसं न दुष्यति ॥३२

नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः।
जग्ध्वा ह्यविधिना मांसं प्रेत्य (प्रेतः) तैरद्यतेऽवशः ॥३३
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः।
यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥३४
नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥३५
असंस्कृतान्पशून्मन्त्रैर्नाद्याद्विप्रः कदाचन।
मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः ॥३६
कुर्याद्घृतपशुं सङ्गे कुर्यात्पिष्टपशुं तथा।
नत्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन ॥३७
यावन्ति पशुरोमाणि तावत् कृत्वोह मारणम्।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥३८
यज्ञार्थं पशवः सृष्टाः स्वयमेव सयम्भुवा।
यज्ञस्य भूत्यै सर्वस्य तस्माद्यज्ञे बधोऽबधः ॥३९
ओषध्यः पशवो वृक्षास्तिर्यञ्च पक्षिणस्तथा।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः ॥४०
मधुपर्के च यज्ञे च पितृदैवतकर्मणि।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥४१
एष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद्द्विजः।
आत्मानं च पशुञ्चैवगमयत्युत्तमां गतिम् ॥४२
गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः।
नावेदविहितां हिंसामापद्यपि समाचरेत् ॥४३

या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे ।
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ॥४४
योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया ।
स जीवंश्च मृतश्चैव न क्वचित् सुखमेधते ॥४५
यो बन्धनवधक्लेशान् प्राणिनां न चिकीर्षति ।
स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते ॥४६
यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च ।
तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन ॥४७
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥४८
समुत्पत्तिं च मांसस्य वधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ॥४६
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ॥५०
अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ॥५१
स्वमांसं परमांसेन यो वर्धयितुमिच्छति ।
अनभ्यर्च्य पितॄन्देवांस्ततोऽन्यो नास्त्यपुण्यकृत् ॥५२
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥५३
फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः ।
न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ॥५४

मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥५५

न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ५६॥

प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च ।
चतुर्णामपि वर्णानां यथावदनुपूर्वशः ॥५७

दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ।
अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥५८

दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव च ॥५९

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥६०

यथेदं शावमाशौचं सपिण्डेषु विधीयते ।
जननेऽप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम् ॥६१

सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥६२

निरस्य तु पुमाञ्छुक्रमुपस्पृश्यैव शुध्यति ।
बैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम् ॥६३

अह्ना चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः ।
शवस्पृशो विशुध्यन्ति त्र्यहादुदकदायिनः ॥६४

गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् ।
प्रेताहारैः समं तत्र दशरात्रेण शुध्यति ॥६५

रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ।
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥६६

नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता ।
निर्वृत्तमुण्डकानां तु त्रिरात्राच्छुद्धिरिष्यते ॥६७

ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः ।
अलङ्कृत्य शुचौ भूमावस्थिसंचयनादृते ॥६८

नास्य कार्योऽग्निसंस्कारो न च कार्योदकक्रिया ।
अरण्ये काष्ठवत्त्यक्त्वा क्षपेतत्र्यहमेव च ॥६९

नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया ।
जातदन्तस्य वा कुर्युर्नाम्नि वाऽपि कृते सति ॥७०

सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम् ।
जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते ॥७१

स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः ।
यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः ॥७२

अक्षारलवणान्नाः स्यु र्निमज्जेयुश्च ते त्र्यहम् ।
मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ ॥७३

सन्निधावेष वै कल्पः शावाशौचस्य कीर्तितः ।
असन्निधावयं ज्ञेयो विधिः सम्बन्धिबान्धवैः ॥७४

विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥७५

अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत् ।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति ॥७६

निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥७७
बाले देशान्तरस्थे च पृथक् पिण्डे च संस्थिते ।
सवासा जलमाप्लुत्य सद्य एव विशुध्यति ॥७८
अन्तर्दशाहे चेत्स्यातां पुनर्मरणजन्मनी ।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् ॥७९
त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति ।
तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः ॥८०
श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत् ।
मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ॥८१
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः ।
अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ॥८२
शुद्ध्येद्विप्रोदशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥८३
न वर्द्धयेदघाहानि प्रत्यूहेनाग्निषु क्रियाः ।
न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् ॥८४
दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा ।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति ॥८५
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान्मन्त्रान्यथोत्साहं पावमानीश्च शक्तितः ॥८६
नारं स्पृष्ट्वाऽस्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥८७

आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुध्यति ॥८८
वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया ॥८९
पाषण्डमाश्रितानां च चरन्तीनां च कामतः ।
गर्भभर्तृद्रुहां चैव सुरापीनां च योषिताम् ॥९०
आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् ।
निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ॥९१
दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनः ॥९२
न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणाम् ।
ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा ॥९३
राज्ञो माहात्मिके स्थाने सद्यःशौचं विधीयते ।
प्रजानां परिरक्षार्थमासनं चात्र कारणम् ॥९४
डिम्बाहवहतानां च विद्युता पार्थिवेन च ।
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ॥९५
सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च ।
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥९६
लोकेशाधिष्ठितो राजा नाश्याशौचं विधीयये ।
शौचाशौचं हि मर्त्यानां लोकेभ्यःप्रभवाप्ययौ ॥९७
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च ।
सद्यः सन्तिष्ठते यज्ञस्तथाऽऽशौचमिति स्थितिः ॥९८

विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् ।
वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः ॥९९
एतद्वोऽभिहितं शौचं सपिण्डेषु द्विजोत्तमाः ।
असपिण्डेषु सर्वेषु प्रेतशुद्धिं निबोधत ॥१००
असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥१०१
यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति ।
अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेत् ॥१०२
अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च ।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ॥१०३
न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् ।
अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता ॥१०४
ज्ञानंतपोग्निराहारो मृन्मनो वार्युपाञ्जनम ।
वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम् ॥१०५
सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ।
योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः ॥१०६
क्ष्यान्त्या शुद्ध्यन्ति विद्वांसो दानेनाकार्यकारिणः ।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः ॥१०७
मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुद्ध्यति ।
रजसा स्त्री मनोदुष्टा सन्यासेन द्विजोत्तमः ॥१०८
अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥१०९

एष शौचस्य वः प्रोक्तः शरीरस्य विनिर्णयः ।
नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयम् ॥११०

तैजसानां मणीनां च सर्वस्याश्ममयस्य च ।
भस्मनाऽद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥१११

निर्लेपं कांचनं भाण्डमद्भिरेव विशुध्यति ।
अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ॥११२

अपामग्नेश्च संयोगाद्धैमं रौप्यं च निर्बभौ ।
तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तरः ॥११३

ताम्रायः कांस्यरैत्यानां त्रपुणः सीसकस्य च ।
शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः ॥११४

द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम् ।
प्रोक्षणं संहतानां च दारवाणां च तक्षणम् ॥११५

मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ।
चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ॥११६

चरूणां स्रुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा ।
स्फ्यशूर्पशकटानां च मुसलोलूखलस्य च ॥११७

अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥११८

चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च ।
शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते ॥११९

कौशेयाविकयोरूषैः कुतपानामरिष्टकैः ।
श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः ॥१२०

क्षौमवच्छङ्खशृङ्गाणामस्थिदन्तमयस्य च।
शुद्धिर्विजानता कार्या गोमूत्रेणोदकेन वा॥१२१
प्रोक्षणात्तृणकाष्ठं च पलालं चैव शुध्यति।
मार्जनोपाञ्जनैर्वेश्म पुनः पाकेन मृण्मयम्॥१२२
मद्यैर्मूत्रैः पुरीषैर्वा ष्ठीवनैः पूयशोणितैः।
संस्पृष्टं नैव शुद्ध्येत पुनः पाकेन मृण्मयम्॥१२३
सम्मार्जनोपाञ्जनेन सेकेनोल्लेखनेन च।
गवां च परिवासेन भूमिः शुद्ध्यति पंचभिः॥१२४
पक्षिजग्धं गवा घ्रातमवधूतमवक्षुतम्।
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुद्ध्यति॥१२५
यावन्नापैत्यमेध्याक्ताद्गन्धोलेपश्च तत्कृतः।
तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु॥१२६
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्।
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते॥१२७
आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत्।
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः॥१२८
नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम्।
ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः॥१२९
नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने।
प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः॥१३०
श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत्।
क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः॥१३१

ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः ।
यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः ॥१३२
मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः ।
रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् ॥१३३
विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत् ।
दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि ॥१३४
वसा शुक्रमसृङ्मज्जामूत्रविड्घ्राणकर्णविट् ।
श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः ॥१३५
एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ॥१३६
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणम् ॥१३७
कृत्वा मूत्रं पुरीषं वा खान्याचान्त उपस्पृशेत् ।
वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा ॥१३८
त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततोमुखम् ।
शारीरं शौचमिच्छन्हि स्त्री शूद्रस्तु सकृत्सकृत् ॥१३९
शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनाम् ।
वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं च भोजनम् ॥१४०
नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गे पतन्ति याः ।
न श्मश्रूणि गतान्यास्यं न दन्तान्तरधिष्ठितम् ॥१४१
स्पृशन्ति विन्दवः पादौ य आचामयतः परान् ।
भौमिकैस्ते समा ज्ञेया न तैराप्रयतोभवेत् ॥१४२

उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥१४३
वान्तोविरिक्तः स्नात्वा तु घृतप्राशनमाचरेत्।
आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतम् ॥१४४
सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वाऽनृतानि च।
पीत्वाऽपोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् ॥१४५
एष शौचविधिः कृत्स्नो द्रव्यशुद्धिस्तथैव च।
उक्तो वः सर्ववर्णानां स्त्रीणां धर्मान्निबोधत ॥१४६
बालया वा युवत्या वा वृद्धया वाऽपि योषिता।
न स्वातन्त्र्येण कर्तव्य किंचित्कार्यं गृहेष्वपि ॥१४७
बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने।
पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम् ॥१४८
पित्रा भर्त्रा सुतैर्वाऽपि नेच्छेद्विरहमात्मनः।
एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ॥१४९
सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया।
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥१५०
यस्मै दद्यात्पिता त्वेनां भ्राता वानुमते पितुः।
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥१५१
मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः।
प्रयुज्यते विवाहे तु प्रदानं स्वाम्यकारणम् ॥१५२
अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः।
सुखस्य नित्यं दातेह परलोके च योगितः ॥१५३

विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः।
उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः॥१५४
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥१५५
पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा।
पतिलोकमभीप्सन्ती नाचरेत्किंचिदप्रियम्॥१५६
कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु॥१५७
आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥१५८
अनेकानि सहस्राणि कुमारब्रह्मचारिणाम्।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्॥१५६
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः॥१६०
अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते।
सेह निन्दामवाप्नोति परलोकाच्च हीयते॥१६१
नान्योत्पन्ना प्रजास्तीह न चान्यस्यपरिग्रहे।
न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते॥१६२
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते।
निन्द्यैव सा भवेल्लोके परपूर्वेति चोच्यते॥१६३
व्यभिचारात्तुभर्तुःस्त्री लोके प्राप्नोति निन्द्यताम्।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते॥१६४

पतिं या नाभिचरति मनोवाग्देहसंयता।
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते ॥१६५

अनेन नारीवृत्तेन मनोवाग्देहसंयता।
इहाग्र्यां कीर्तिमाप्नोति पतिलोकं परत्र च ॥१६६

एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम्।
दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥१६७

भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि।
पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ॥१६८

अनेन विधिना नित्यं पंच यज्ञान्न हापयेत्।
द्वियीयमायुषो भागं कृतदारो गृहे वसेत् ॥१६९

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां शौचविधिः
पञ्चमोऽध्यायः ॥

—:❀:—

## षष्ठोऽध्यायः।

### अथादौ— वानप्रस्थवर्णनम्।

एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः।
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः ॥१

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥२

संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् ।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ॥३

अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम् ।
ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः ॥४

मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा ।
एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ॥५

वसीत चर्म चीरं वा सायं स्नायात्प्रगे तथा ।
जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ॥६

यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः ।
अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ॥७

स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्वभूतानुकम्पकः ॥८

वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ।
दर्शमस्कन्दयन्पर्व पौर्णमासं च योगतः ॥९

ऋक्षेष्टयाग्रयणं चैव चातुर्मास्यानि चाहरेत् ।
तुरायणं च क्रमशो दाक्षस्यायनमेव च ॥१०

वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ।
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक् ॥११

देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः ।
शेषमात्मनि भुञ्जीत लवणं च स्वयं कृतम् ॥१२

स्थलजौदकशाकानि पुष्पमूलफलानि च ।
मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवान् ॥१३

वर्जयेन्मधु मांसं च भौमानि कवकानि च।
भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च ॥१४
त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितम्।
जीर्णानि चैव वासांसि शाकमूलफलानि च ॥१५
न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित्।
न ग्रामजातान्यार्तोऽपि मूलानि(पुष्पाणि) च फलानि च ॥१६
अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव वा।
अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा ॥१७
सद्यःप्रक्षालको वा स्यान्मासस्संचयिकोऽपि वा।
षण्मासनिचयो वा स्यात्समानिचय एव वा ॥१८
नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः।
चतुर्थकालिको वा स्यात्स्याद्वाप्यष्टमकालिकः ॥१९
चान्द्रायणविधानैर्वा शुक्लकृष्णे च वर्तयेत्।
पक्षान्तयोर्वाप्यश्नीयाद्यवागूं कथितां सकृत् ॥२०
पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा।
कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः ॥२१
भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम्।
स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः ॥२२
ग्रीष्मे पंचतपास्तु स्याद्वर्षास्वभ्रावकाशिकः।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः ॥२३
उपस्पृशंस्त्रिषवणं पितॄन्देवांश्च तर्पयेत्।
तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः ॥२४

अग्नीनात्मनि वैतानान्त्समारोप्य यथाविधि ।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥२५
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥२६
तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥२७
ग्रामादाहृत्य वाऽश्नीयादष्टौ ग्रासान्वने वसन् ।
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥२८
एताश्चान्याश्च सेवेत दीक्षा विप्रो बने वसन् ।
विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥२९
ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः ।
विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये ॥३०
अपराजितां वाऽऽस्थाय व्रजेद्दिशमजिह्मगः ।
आ निपाताच्छरीरस्य युक्तो वार्यनिलाशनः ॥३१
आसां महर्षिचर्याणां त्यक्त्वाऽन्यतमया तनुम् ।
वीतशोकभयो विप्रो ब्रह्मलोके महीयते ॥३२
वनेषु तु विहृत्यैवं तृतीयं भागमायुषः ।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत् ॥३३
आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ।
भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्धते ॥३४
ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥३५

अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥३६
अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥३७
प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥३८
यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ।
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥३९
यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् ।
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥४०
आगारादभिनिष्क्रान्तः पवित्रो पचितो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥४१
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥४२
अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसङ्कुसुको (सांचयिको) मुनिर्भावसमाहितः ॥४३
कपालं वृक्षमूलानि कुचैलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥४४
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्वेशं भृतको यथा ॥४५
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥४६

अतिवादांस्तितिक्षेत नावमन्येत कञ्चन।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥४७
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्।
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥४८
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥४९
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥५०
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः।
आकीर्णं भिक्षुकैर्वाऽन्यैरागारमुपसंव्रजेत् ॥५१
क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान्।
विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ॥५२
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥५३
अलाबुं दारुपात्रं च मृण्मयं वैदलं तथा।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥५४
एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥५५
विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥५६
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥५७

अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥५८

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥५९

इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च।
अहिंसया च भूतानाममृतत्त्वाय कल्पते ॥६०

अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः।
निरये चैव पतनं यातनाश्च यमक्षये ॥६१

विप्रयोगं प्रियैश्चैव संयोगं च तथाऽप्रियैः।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥६२

देहादुत्क्रमणं चास्मात्पुनर्गर्भे च सम्भवम्।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥६३

अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम्।
धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ॥६४

सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥६५

भूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥६६

फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥६७

संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥६८

अह्ना रात्र्या च याञ्जन्तून्हिनस्त्यज्ञानतो यतिः।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ॥६९

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥७०

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥७१

प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषम्।
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥७२

उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः।
ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः ॥७३

सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥७४

अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥७५

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम्।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥७६

जराशोकसमाविष्टं रोगायतनमातुरम्।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥७७

नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा।
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥७८

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम्।
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥७९

यदा भावेन भवति सर्वभावेषु निष्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥८०
अनेन विधिना सर्वांस्त्यक्त्वा सङ्गाञ्छनैःशनैः ।
सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ॥८१
ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितम् ।
न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ॥८२
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥८३
इदं शरणमज्ञानामिदमेव विजानताम् ।
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥८४
अनेन क्रमयोगेन परिव्रजति यो द्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥८५
एष धर्मोऽनुशिष्टो वो यतीनां नियतात्मनाम् ।
वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥८६
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥८७
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ॥८८
सर्वेषामपि चैतेषां वेदस्मृति (श्रुति) विधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि ॥८९
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥९०

चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥९१

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥९२

दश लक्षणानि धर्मस्य ये विप्राः समधीयते।
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥९३

दशलक्षणकं धर्ममनुतिष्ठन्समाहितः।
वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥९४

संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन्।
नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ॥९५

एवं संन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः।
संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ॥९६

एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः।
पुण्योऽक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ॥९७

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां षष्ठोऽध्यायः।

# सप्तमोऽध्यायः ।

## अथादौ– राज्यशासनधर्मवर्णनम् ।

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
सम्भवश्च यथा तस्य सिद्धिश्च परमा यथा ॥१
ब्राह्मं प्राप्तेन संस्कारं क्षत्त्रियेण यथाविधि ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ॥२
अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥३
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥४
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥५
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥६
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥७
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥८
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥९
कार्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः ।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥१०

यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥११
तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयम् ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥१२
तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥१३
तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥१४
तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ॥१५
तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः ।
यथार्हतः सम्प्रणयेन्नरेष्वन्यायवर्तिषु ॥१६
स राजा पुरुषोदण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ॥१७
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥१८
समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥१९
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥२०
अद्यात्काकः पुरोडाशं श्वाऽवलिह्याद्धविस्तथा ।
स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरम् ॥२१

सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते ॥२२
देवदानवगन्धर्वा रक्षांसि पतगोरगाः।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ॥२३
दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः।
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ॥२४
यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥२५
तस्याहुः सम्प्रणेतारं राजानं सत्यवादिनम्।
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥२६
तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्धते।
कामात्मा (कामान्धो) विषमः क्षुद्रो दण्डेनैव निहन्यते ॥२७
दण्डो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः।
धर्माद्विचलितं हन्ति नृपमेव सबान्धवम् ॥२८
ततो दुर्गं च राष्ट्रं च लोकं च सचराचरम्।
अन्तरिक्षगतांश्चैव मुनीन्देवांश्च पीडयेत् ॥२९
सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ॥३०
शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ॥३१
स्वराष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥३२

एवं वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः।
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥३३

अतस्तु विपरीतस्य नृपतेरजितात्मनः।
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ॥३४

स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः।
वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ॥३५

तेन यद्यत्सभृत्येन कर्तव्यं रक्षता प्रजाः।
तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः ॥३६

ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः।
त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने ॥३७

वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन्।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ॥३८

तेभ्योऽधिगच्छेद्विनयं विनीतात्माऽपि नित्यशः।
विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित् ॥३९

बहवोऽविनयान्नष्टा राजानः सपरि (ग्रहाः) च्छदाः।
वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे ॥४०

वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः।
सुदाः पैजवनश्चैव सुमुखो निमिरेव च ॥४१

पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च।
कुवेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः ॥४२

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ॥४३

इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥४४
दश कामसमुत्थानि तथाऽष्टौ क्रोधजानि च ।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ॥४५
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ।
वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥४६
मृगयाऽक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥४७
पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थ दूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥४८
द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः ।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥४९
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥५०
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ॥५१
सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः ।
पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥५२
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ।
व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः ॥५३
मौलाञ्छास्त्रविदः शूरांल्लब्धलक्षान्कुलोद्गतान् ।
सचिवान्सप्त चाष्टौ वा कुर्वीत सुपरीक्षितान् ॥५४

अपि यत्सुकरं कर्म तदप्येकेन दुष्करम् ।
विशेषतोऽसहायेन किं नु राज्यं महोदयम् ॥५५
तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम् ।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥५६
तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् ।
समस्तानां च कार्येषु विदध्याद्धितमात्मनः ॥५७
सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता ।
मंत्रयेत्परमं मंत्रं राजा षाड्गुण्य संयुतम् ॥५८
नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत् ।
तेन सार्द्धं विनिश्चित्य ततः कर्म समारभेत् ॥५९
अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान् ।
सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ॥६०
निर्वर्ततास्य यावद्भिरितिकर्तव्यता नृभिः ।
तावतोऽतन्द्रितान्दक्षान्प्रकुर्वीत विचक्षणान् ॥६१
तेषामर्थे नियुञ्जीत शूरान्दक्षान्कुलोद्गतान् ।
शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ॥६२
दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥६३
अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित् ।
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥६४
अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया ।
नृपतौ कोषराष्ट्रे च दूते सन्धिविपर्ययौ ॥६५

दूत एव हि सन्धत्ते भिनत्त्येव च संहतान्।
दूतस्तत्कुरुते कर्म भिद्यन्ते येन मानवाः ॥६६

स विद्यादस्य कृत्येषु निगूढेङ्गितचेष्टितैः।
आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम् ॥६७

बुध्वा च सर्वं तत्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेद्यथाऽऽत्मानं न पीडयेत् ॥६८

जाङ्गलं सस्यसम्पन्नमार्यप्रायमनाविलम्।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥६९

धनुर्दुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम् ॥७०

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥७१

त्रीण्याद्यान्याश्रितास्तेषां मृगगर्ताश्रयाप्सराः।
त्रीण्युत्तराणि क्रमशः प्लवङ्गमनरामराः ॥७२

यथा दुर्गाश्रितानेतान्नापहिंसन्ति शत्रवः।
तथाऽरयो न हिंसन्ति नृपं दुर्गसमाश्रितम् ॥७३

एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ॥७४

तत्स्यादायुधसम्पन्नं धनधान्येन वाहनैः।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥७५

तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः।
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम् ॥७६

तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम् ।
कुले महति संभूतां हृद्यां रूपगुणान्विताम् ॥७७

पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजः ।
तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ॥७८

यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः ।
धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ॥७९

सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ।
स्याच्चाम्नायपरो लोके वर्तेत पितृवन्नृषु ॥८०

अध्यक्षान्विविधान्कुर्यात्तत्र तत्र विपश्चितः ।
तेऽस्य सर्वाण्यवेक्षेरन्नृणां कार्याणि कुर्वताम् ॥८१

आवृत्तानां गुरुकुलाद्विप्राणां पूजकोभवेत् ।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते ॥८२

न तं स्तेना न चामित्रा हरन्ति न च नश्यति ।
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥८३

न स्कन्दति न च्यवते न विनश्यति कर्हिचित् ।
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम् ॥८४

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
प्राधीते (आचार्ये) शतसाहस्रमनन्तं वेदपारगे ॥८५

पात्रस्य हि विशेषेण श्रद्दधानतयैव च ।
अल्पं वा बहु वा प्रेत्य दानस्य फलमश्नुते ॥८६

समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः ।
न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन् ॥८७

संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्।
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम् ॥८८
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥८९
न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥९०
न च हन्यात्स्थलारूढं न क्लीवं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ॥९१
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम्।
नायुध्यमानं पश्यन्तं न परेण समागतम् ॥९२
नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतम्।
न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ॥९३
यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः।
भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ॥९४
यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम्।
भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ॥९५
रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून्स्त्रियः।
सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत् ॥९६
राज्ञश्च दद्युरुद्धारमित्येषा वैदकी श्रुतिः।
राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितम् ॥९७
एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः।
अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन्रणे रिपून् ॥९८

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ॥६६

एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनम्।
अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतन्द्रितः ॥१००

अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्धयेद्वृद्ध्या वृद्धं पात्रेषु निक्षिपेत् ॥१०१

नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः।
नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः ॥१०२

नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत्।
तस्मात्सर्वाणि भूतानि दण्डेनैव प्रसाधयेत् ॥१०३

अमाययैव वर्तेत न कथञ्चन मायया।
बुध्येतारिप्रयुक्तां च मायां नित्यं सुसंवृतः ॥१०४

नास्य छिद्रं परोविद्याद्विद्याच्छिद्रं परस्य तु।
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥१०५

बकवच्चिन्तयेदर्थान्सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥१०६

एवं विजयमानस्य येऽस्य स्युः परिपंथिनः।
तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः ॥१०७

यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः।
दण्डेनैवप्रसह्यतां श्छनकैर्वशमानयेत् ॥१०८

सामादीनामुपायानां चतुर्णामपि पण्डिताः।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये ॥१०६

यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति ।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः ॥११०
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ।
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥१११
शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा ।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात् ॥११२
राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् ।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ॥११३
द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम् ।
तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहम् ॥११४
ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा ।
विंशतीशं शतेशं च सहस्रपतिमेव च ॥११५
ग्रामदोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयम् ।
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिने ॥११६
विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् ।
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम् ॥११७
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः ।
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् ॥११८
दशी कुलं तु भुञ्जीत विंशी पञ्च कुलानि च ।
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम् ॥११९
तेषां ग्राम्याणि कार्याणि पृथक्कार्याणि चैव हि ।
राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः ॥१२०

नगरे नगरे चैकं कुर्यात्सर्वार्थचिन्तनम् ।
उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहम् ॥१२१

स तानन्परिक्रामेत्सर्वानेव सदा स्वयम् ।
तेषां वृत्तं परिणयेत्सम्यग्राष्ट्रेषु तच्चरैः ॥१२२

राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः ।
भृत्या भवन्ति प्रायेण तेभ्योरक्षेदिमाः प्रजाः ॥१२३

ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः ।
तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनम् ॥१२४

राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च ।
प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः ॥१२५

पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम् ।
षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः ॥१२६

क्रयविक्रयमध्वानं भक्तं च सपरिव्ययम् ।
योगक्षेमं च सम्प्रेक्ष्य वणिजो दापयेत्करान् ॥१२७

यथा फलेन युज्येत राजा कर्ता च कर्मणाम् ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् ॥१२८

यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः ॥१२९

पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ॥१३०

आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ।
गंधौषधिरसानां च पुष्पमूलफलस्य च ॥१३१

पत्रशाकतृणानां च वैदलस्य च चर्मणाम्।
मृण्मयानां च भाण्डानां सर्वस्याश्ममयस्य च ॥१३२

म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करम्।
न च क्षुधाऽस्य संसीदेच्छ्रोत्रियो विषये वसन् ॥१३३

यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा।
तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति ॥१३४

श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत्।
संरक्षेत्सर्वतश्चैनं पितापुत्रमिवौरसम् ॥१३५

संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहम्।
तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च ॥१३६

यत्किंचिदपि वर्षस्य दापयेत्करसंज्ञितम्।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् ॥१३७

कारुकाञ्छिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः।
एकैकं कारयेत्कर्म मासि मासि महीपतिः ॥१३८

नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया।
उच्छिन्दन्ह्यात्मनो मूलमात्मानं तांश्च पीडयेत् ॥१३९

तीक्ष्णश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः।
तीक्ष्णश्चैव मृदुश्चैव राजा भवति संमतः ॥१४०

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम्।
स्थापयेदासने तस्मिन्खिन्नः कार्येक्षणे नृणाम् ॥१४१

एवं सर्वं विधायेदमितिकर्तव्यमात्मनः।
युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ॥१४२

विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः ।
संपश्यतः सभृत्यस्य मृतः स न तु जीवति ॥१४३

क्षत्रियस्य परो धर्मः प्रजानामेव पालनम् ।
निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ॥१४४

उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम् ॥१४५

तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत् ।
विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः ॥१४६

गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः ।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः ॥१४७

यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः ।
स कृत्स्नां पृथिवीं भुङ्क्ते कोशहीनोऽपि पार्थिवः ॥१४८

जडमूकान्धबधिरांस्तैर्यग्योनान्वयोतिगान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान्मन्त्रकालेऽपसारयेत् ॥१४९

भिन्दन्त्यवमता मन्त्रं तैर्यग्योनास्तथैव च ।
स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतोभवेत् ॥१५०

मध्यन्दिनेऽर्धरात्रे वा विश्रान्तो विगतक्लमः ।
चिन्तयेद्धर्मकामार्थान्सार्धं तैरेक एव वा ॥१५१

परस्परविरुद्धानां तेषां च समुपार्जनम् ।
कन्यानां सम्प्रदानं च कुमाराणां च रक्षणम् ॥१५२

दूतसम्प्रेषणं चैव कार्यशेषं तथैव च ।
अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम् ॥१५३

कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्त्वतः।
अनुरागापरागौ च प्रचारं मण्डलस्य च ॥१५४

मध्यमस्य प्रचारं च विजिगीषोश्च चेष्टितम्।
उदासीनप्रचारं च शत्रोश्चैव प्रयत्नतः ॥१५५

एताः प्रकृतयो मूलं मण्डलस्य समासतः।
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः ॥१५६

अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः।
प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥१५७

अनन्तरमरिं विद्यादरिसेविनमेव च।
अरेरनन्तरं मित्रमुदासीनं तयोः परम् ॥१५८

तान्सर्वानभिसंदध्यात्सामादिभिरुपक्रमैः।
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च ॥१५९

संधिं च विग्रहं चैव यानमासनमेव च।
द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा ॥१६०

आसनं चैव यानं च सन्धिं विग्रहमेव च।
कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च ॥१६१

संधिं तु द्विविधं विद्याद्राजा विग्रहमेव च।
उभे यानासने चैव द्विविधः संश्रयः स्मृतः ॥१६२

समानयानकर्मा च विपरीतस्तथैव च।
तदा त्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः ॥१६३

स्वयंकृतश्च कार्यार्थमकाले काल एव वा।
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ॥१६४

एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया।
संहतस्य च मित्रेण द्विविधं यानमुच्यते ॥१६५

क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा।
मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम् ॥१६६

बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥१६७

अर्थसम्पादनार्थं च पीड्यमानस्य शत्रुभिः।
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः ॥१६८

यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्रयेत् ॥२६६

यदा प्रहृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशम्।
अत्युच्छ्रितं तथाऽऽत्मानं तदा कुर्वीत विग्रहम् ॥१७०

यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्।
परस्य विपरीतं च तदा यायाद्रिपुं प्रति ॥१७१

यदा तु स्यात्परिक्षीणो वाहनेन बलेन च।
तदाऽऽसीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् ॥१७२

मन्येतारिं यदा राजा सर्वथा बलवत्तरम्।
तदा द्विधा बलं कृत्वा साधयेत्कार्यमात्मनः ॥१७३

यदा परबलानां तु गमनीयतमो भवेत्।
तदा तु संश्रयेत्क्षिप्रं धार्मिकं बलिनं नृपम् ॥१७४

निग्रहं प्रकृतीनां च कुर्याद्योऽरिबलस्य च।
उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा ॥१७५

यदि तत्रापि सम्पश्येद्दोषं संश्रयकारितम्।
सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत् ॥१७६

सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः।
यथाऽस्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥१७७

आयतिं सर्वकार्याणां तदात्वं च विचारयेत्।
अतीतानां च सर्वेषां गुणदोषौ च तत्वतः ॥१७८

आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः।
अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते ॥१७९

यथैनं नाभिसन्दध्युर्मित्रोदासीनशत्रवः।
तथा सर्वं संविदध्यादेष सामासिको नयः ॥१८०

यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः।
तदाऽनेन विधानेन यायादरिपुरं शनैः ॥१८१

मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः।
फाल्गुनं वाऽथ चैत्रं वा मासौ प्रति यथाबलम् ॥१८२

अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम्।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः ॥१८३

कृत्वा विधानं मूले तु यात्रिकं च यथाविधि।
उपगृह्यास्पदं चैव चारान्सम्यग्विधाय च ॥१८४

संशोध्य त्रिविधं मार्गं षड्विधं च बलं स्वकम्।
साम्परायिककल्पेन यायादरिपुरं शनैः ॥१८५

शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥१८६

दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥१८७
यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम्।
पद्मेन चैव व्यूहेन निवेशेत सदा स्वयम्॥१८८
सेनापतिबलाध्यक्षौ सर्वदिक्षु निवेशयेत्।
यतश्च भयमाशङ्केत्प्राचीं तां कल्पयेद्दिशम्॥१८९
गुल्मांश्च स्थापयेदाप्तान्कृतसंज्ञान्समन्ततः।
स्थाने युद्धे च कुशलानभीरूनविकारिणः॥१९०
संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून्।
सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह्य योधयेत्॥१९१
स्यन्दनाश्वैः समे युद्ध्येदनूपे नौद्विपैस्तथा।
वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले॥१९२
कौरुक्षेत्रांश्च मत्स्यांश्च पञ्चालाञ्छूरसेनजान्।
दीर्घाल्लँघूंश्चैव नरानग्रानीकेषु योजयेत्॥१९३
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक्परीक्षयेत्।
चेष्टाश्चैव विजानीयादरीन्योधयतामपि।
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत्।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम्॥१९५
भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥१९६
उपजप्यानुपजपेद्बुध्येतैव च तत्कृतम्।
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः॥१९७

साम्ना दानेन भेदेन समस्तैरथवा पृथक्।
विजेतुं प्रयतेतारिं न युद्धेन कदाचन ॥१९८

अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् ॥१९९

त्रयाणामप्युपायानां पूर्वोक्तानामसम्भवे।
तथा युध्येत संपन्नो विजयेत रिपून्यथा ॥२००

जित्वा सम्पूजयेद्देवान्ब्राह्मणांश्चैव धार्मिकान्।
प्रदद्यात्परिहारार्थं ख्यापयेदभयानि च ॥२०१

सर्वेषां तु विदित्वैषां समासेन चिकीर्षितम्।
स्थापयेत्तत्र तद्वंश्यं कुर्याच्च समयक्रियाम् ॥२०२

प्रमाणानि च कुर्वीत तेषां धर्म्यान्यथोदितान्।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥२०३

आदानमप्रियकरं दानं च प्रियकारकम्।
अभीप्सितानामर्थानां कालयुक्तं प्रशस्यते ॥२०४

सर्वं कर्मेदमायत्तं विधाने दैवमानुषे।
तयोर्दैवमचिन्त्यं तु मानुषे विद्यते क्रिया ॥२०५

सह वाऽपि व्रजेद्युक्तः सन्धिं कृत्वा प्रयत्नतः।
मित्रं हिरण्यं भूमिं वा सम्पश्यंस्त्रिविधं फलम् ॥२०६

पार्ष्णिग्राहं च संप्रेक्ष्य तथाऽऽक्रन्दं च मण्डले।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात् ॥२०७

हिरण्यभूमिसंप्राप्त्या पार्थिवो न तथैधते।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् ॥२०८

धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिमेव च।
अनुरक्तं स्थिरारम्भं लघुमित्रं प्रशस्यते॥ २०६
प्राज्ञं कुलीनं शूरं च दक्षं दातारमेव च।
कृतज्ञं धृतिमन्तं च कष्टमाहुररिं बुधाः॥२१०
आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता।
स्थौललक्ष्यं च सततमुदासीनगुणोदयः॥२११
क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन्॥२१२
आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि।
आत्मनं सततं रक्षेद्दारैरपि धनैरपि॥२१३
सह सर्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम्।
संयुक्तांश्च वियुक्तांश्च सर्वोपायान्सृजेद्बुधः॥२१४
उपेतारमुपेयं च सर्वोपायांश्च कृत्स्नशः।
एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये।२१५
एवं सर्वमिदं राजा सह संमन्त्र्य मन्त्रिभिः।
व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत्॥२१६
तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः।
सुपरीक्षितमन्नाद्यमद्यान्मंत्रैर्विषापहैः॥२१७
विषघ्नै(रुदकै)रगदैश्चास्य सर्वद्रव्याणि (शोधयेत्)योजयेत्।
विषघ्नानि च रत्नानि नियतो धारयेत्सदा॥२१८
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः।
वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः॥२१९

एवं प्रयत्नं कुर्वीत यानशय्यासनाशने।
स्नाने प्रसाधने चैव सर्वालङ्कारकेषु च ॥२२०
भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह।
विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत् ॥२२१
अलङ्कृतश्च संपश्येदायुधीयं पुनर्जनम्।
वाहनानि च सर्वाणि शस्त्राण्याभरणानि च ॥२२२
सन्ध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत्।
रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम् ॥२२३
गत्वा कक्षान्तरं त्वन्यत्समनुज्ञाप्य तं जनम्।
प्रविशेद्भोजनार्थं च स्त्रीवृतोऽन्तःपुरं पुनः ॥२२४
तत्र भुक्त्वा पुनः किंचित्तूर्यघोषैः प्रहर्षितः।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥२२५
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः।
अस्वस्थः सर्वमेतत्तु भृत्येषु विनियोजयेत् ॥२२६

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां
राज्यशासनधर्मवर्णनंनाम सप्तमोऽध्यायः ॥ ७

## अष्टमोऽध्यायः

### राजधर्मदण्डविधानवर्णनम्।

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ॥ १
तत्रासीनः स्थितो वाऽपि पाणिमुद्यम्य दक्षिणम्।
विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणाम् ॥२
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः।
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक् ॥३
तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।
सम्भूय च समुत्थानं दत्तस्यानपकर्म च ॥४
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥५
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ॥६
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥७
एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम्।
धर्मं शाश्वतमाश्रित्य कुर्यात्कार्यविनिर्णयम् ॥८

यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम्।
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ॥९
सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः।
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ॥१०
यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः।
राज्ञश्चाधिकृतो विद्वान्ब्रह्मणस्तां सभां विदुः ॥११
धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते।
शल्यं चास्य न कृन्तन्ति विद्धास्तत्र सभासदः ॥१२
सभां वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम्।
अब्रुवन्विब्रुवन्वाऽपि नरो भवति किल्विषी ॥१३
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥१४
धर्म एव हतो हन्ति धर्मोरक्षति रक्षितः।
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ॥१५
वृषो हि भगवान्धर्मस्तस्य यः कुरुते ह्यलम्।
वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् ॥१६
एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ॥१७
पादोधर्मस्य कर्तारं पादः साक्षिणमृच्छति।
पादः सभासदः सर्वान्पादो राजानमृच्छति ॥१८
राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ॥१९

जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः।
धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचन ॥२०

यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम्।
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः ॥२१

यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम्।
विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितम् ॥२२

धर्मासनमधिष्ठाय संवीताङ्गः समाहितः।
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत् ॥२३

अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ।
वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणाम् ॥२४

बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च ॥२५

आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥२६

बालदायादिकं रिक्थं तावद्राजानुपालयेत्।
यावत्स स्यात्समावृत्तो यावद्वाऽतीतशैशवः ॥२७

वशाऽपुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥२८

जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः।
ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः ॥२९

प्रणष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत्।
अर्वाक्त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ॥३०

ममेदमिति यो ब्रुयात्सोऽनुयोज्यो यथाविधि।
संवाद्य रूपसंख्यादीन्स्वामी तद्द्रव्यमर्हति ॥३१
अवेदयानो नष्टस्य देशं कालं च तत्त्वतः।
वर्णं रूपं प्रमाणं च तत्समं दण्डमर्हति ॥३२
आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः।
दशमं द्वादशं वाऽपि सतां धर्ममनुस्मरन् ॥३३
प्रनष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितम्।
यांस्तत्र चौरान्गृह्णीयात्तान्राजेभेन घातयेत् ॥३४
ममायमिति यो ब्रूयान्निधिं सत्येन मानवः।
तस्याददीत षड्भागं राजा द्वादशमेव वा ॥३५
अनृतं तु वदन्दण्ड्यः स्ववित्तस्यांशमष्टमम्।
तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलाम् ॥३६
विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिम्।
अशेषतोऽप्याददीत सर्वस्याधिपतिर्हि सः ॥३७
यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ।
तस्माद्द्विजेभ्यो दत्त्वाऽर्धमर्धं कोशे प्रवेशयेत् ॥३८
निधीनां तु पुराणानां धातूनामेव च क्षितौ।
अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ॥३९
दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम्।
राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्विषम् ॥४०
जातिजानपदान्धर्माञ्छ्रेणीधर्मांश्च धर्मवित्।
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ॥४१

स्वानि कर्माणि कुर्वाणा दूरे सन्तोऽपि मानवाः ।
प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः ॥४२

नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पुरुषः ।
न च प्रापितमन्येन ग्रसेतार्थं कथंचन ॥४३

यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम् ।
नयेत्तथाऽनुमानेन धर्मस्य नृपतिः पदम् ॥४४

सत्यमर्थं च संपश्येदात्मानमथ साक्षिणम् ।
देशं रूपं च कालं च व्यवहारविधौ स्थितः ॥४५

सद्भिराचरितं यत्स्याद्धार्मिकैश्च द्विजातिभिः ।
तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत् ॥४६

अधमर्णार्थसिध्यर्थमुत्तमर्णेन चोदितः ।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥४७

यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः ।
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम् ॥४८

धर्मेण व्यवहारेण छलेनाचरितेन च ।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥४९

यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात् ।
न स राज्ञाऽभियोक्तव्यः स्वकं संसाधयन्धनम् ॥५०

अर्थेऽपव्ययमानं तु कारणेन विभावितम् ।
दापयेद्धनिकस्यार्थं दण्डलेशं च शक्तितः ॥५१

अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि ।
अभियोक्ता दिशेद्देशं कारणं वाऽन्यदुद्दिशेत् ॥५२

अदेशं यश्च दिशति निर्दिश्यापह्नुते च यः ।
यश्चाधरोत्तरानर्थान्विगीतान्नावबुध्यते ॥५३

अपदिश्यापदेशं च पुनर्यस्त्वपधावति ।
सम्यक्प्रणिहितं चार्थं पृष्टः सन्नाभिनन्दति ॥५४

असंभाष्ये साक्षिभिश्च देशे संभाषते मिथः ।
निरुच्यमानं प्रश्नं च नेच्छेद्यश्चापि निष्पतेत् ॥५५

ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च न विभावयेत् ।
न च पूर्वापरं विद्यात्तस्मादर्थात्स हीयते ॥५६

साक्षिणः (ज्ञातारः) सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः ।
धर्मस्थः कारणैरेतैर्हीनं तमिति निर्दिशेत् ॥५७

अभियोक्ता न चेद्ब्रूयाद्बन्ध्यो दण्ड्यश्च धर्मतः ।
न चेत्त्रिपक्षात्प्रब्रूयाद्धर्मं प्रति पराजितः ॥५८

यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत् ।
तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम् ॥५९

पृष्टोऽपव्ययमानस्तु कृतावस्थो धनैषिणा ।
त्र्यवरैः साक्षिभिर्भाव्यो नृपब्राह्मणसन्निधौ ॥६०

यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः ।
तादृशान्सम्प्रवक्ष्यामि यथा वाच्यमृतं च तैः ॥६१

गृहिणः पुत्रिणो मौलाः क्षत्त्रविट्शूद्रयोनयः ।
अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ॥६२

आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः ।
सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत् ॥६३

नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः।
न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः॥६४
न साक्षी नृपतिः कार्यो न कारुककुशीलवौ।
न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः॥६५
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत्।
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः॥६६
नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः।
न श्रमार्तो न कामार्तो न क्रुद्धो नापि तस्करः॥६७
स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः॥६८
अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनाम्।
अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि चात्यये॥६९
स्त्रियाऽप्यसम्भवे कार्यं बालेन स्थविरेण वा।
शिष्येण बन्धुना वाऽपि दासेन भृतकेन वा॥७०
बालवृद्धातुराणां च साक्ष्येषु वदतां मृषा।
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा॥७१
साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च।
वाग्दण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः॥७२
बहुत्वं परिगृह्णीयात्साक्षिद्वैधे नराधिपः।
समेषु तु गुणोत्कृष्टान्गुणिद्वैधे द्विजोत्तमान्॥७३
समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यति।
तत्र सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते॥७४

साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि ।
अवाङ्नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते ॥७५

यत्रानिबद्धोऽपीक्षेत शृणुयाद्वाऽपि किंचन ।
पृष्टस्तत्रापि तद्ब्रूयाद्यथादृष्टं यथाश्रुतम् ॥७६

एको लुब्धस्त्वसाक्षी स्याद्बह्व्यः शुच्योऽपि न स्त्रियः ।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः ॥७७

स्वभावेनैव यद्ब्रूयुस्तद्ग्राह्यं व्यावहारिकम् ।
अतो यदन्यद्विब्रूयुर्धर्मार्थं तदपार्थकम् ॥७८

सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ ।
प्राड्विवाकोऽनुयुञ्जीत विधिनाऽनेन सान्त्वयन् ॥७९

यद्द्वयोरनयोर्वेत्थ कार्येऽस्मिञ्चेष्टितं मिथः ।
तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता ॥८०

सत्यं साक्ष्ये ब्रुवन्साक्षी लोकानाप्नोत्य(पुष्कलान्)निन्दितान् ।
इह चानुत्तमां कीर्त्तिं वागेषा ब्रह्मपूजिता ॥८१

साक्ष्येऽनृतं वदन्पाशैर्बध्यते वारुणैर्भृशम् ।
विवशः शतमाजातीस्तस्मात्साक्ष्यं वदेदृतम् ॥८२

सत्येन पूयते साक्षी धर्मः सत्येन वर्द्धते ।
तस्मात्सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ॥८३

आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथाऽऽत्मनः ।
माऽवमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम् ॥८४

मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः ।
तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ॥८५

द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः।
रात्रिः सन्ध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम्॥८६
देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्।
उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन्॥८७
ब्रूहीति ब्राह्मणं पृच्छेत्सत्यं ब्रूहीति पार्थिवम्।
गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः॥८८
ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा॥८९
जन्मप्रभृति यत्किंचित्पुण्यं भद्र त्वया कृतम्।
तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा॥९०
एकोऽहमस्मीत्यात्मानं यस्त्वं कल्याण मन्यसे।
नित्यं स्थितस्ते हृद्येष पुण्यपापेक्षिता मुनिः॥९१
यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः।
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः॥९२
नग्नो मुण्डः कपाली च भिक्षार्थी क्षुत्पिपासितः।
अन्धः शत्रुकुलं गच्छेद्यः साक्ष्यमनृतं वदेत्॥९३
अवाक्शिरास्तमस्यन्धे किल्विषी नरकं व्रजेत्।
यः प्रश्नं वितथं ब्रूयात्पृष्टः सन्धर्मनिश्चये॥९४
अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह।
यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभां गतः॥९५
यस्य विद्वान्हि वदतः क्षेत्रज्ञो नातिशङ्कते।
तस्मिन्न देवाः श्रेयांसं लोकेऽन्यं पुरुषं विदुः॥९६

यावतो बान्धवान्यस्मिन्हन्ति साक्ष्येऽनृतं वदन्।
तावतः सङ्ख्यया तस्मिन् शृणु सौम्यानुपूर्वशः ॥९७
पंच पश्वनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥९८
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन्।
सर्वं भूम्यनृते हन्ति मास्म भूम्यनृतं वदीः ॥९९
अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने।
अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च ॥१००
एतान्दोषानवेक्ष्य त्वं सर्वाननृतभाषणे।
यथाश्रुतं यथादृष्टं सर्वमेवाञ्जसा वद ॥१०१
गोरक्षकान्वाणिजिकांस्तथा कारुकुशीलवान्।
प्रैष्यान्वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् ॥१०२
तद्वदन्धर्मतोऽर्थेषु जानन्नप्यन्यथा नरः।
न स्वर्गाच्च्यवते लोकाद्दैवीं वाचं वदन्ति ताम् ॥१०३
शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः।
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते ॥१०४
वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सरस्वतीम्।
अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम् ॥१०५
कुष्माण्डैर्वाऽपि जुहुयाद्घृतमग्नौ यथाविधि।
उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वा ॥१०६
त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः।
तदृणं प्राप्नुयात्सर्वं दशबंधं च सर्वतः ॥१०७

यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः ।
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः ॥१०८
असाक्षिकेषु त्वर्थेषु मिथो विवदमानयोः ।
न विन्दंस्तत्त्वतः सत्यं शपथेनापि लम्भयेत् ॥१०६
महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः ।
वशिष्ठश्चापि शपथं शेपे पैजवने नृपे ॥११०
न वृथा शपथं कुर्यात्स्वल्पेऽप्यर्थे नरो बुधः ।
वृथा हि शपथं कुर्वन्प्रेत्य चेह च नश्यति ॥१११
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥११२
सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥११३
अग्निं वाऽऽहारयेदेनमप्सु चैनं निमज्जयेत् ।
पुत्रदारस्य वाऽप्येनं शिरांसि स्पर्शयेत्पृथक् ॥११४
यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च ।
न चार्त्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः ॥११५
वत्सस्य ह्यभिशस्तस्य पुरा भ्राता यवीयसा ।
नाग्निर्ददाह रोमापि सत्येन जगतः स्पृशः ॥११६
यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत् ।
तत्तत्कार्यं निवर्त्तेत कृतं चाप्यकृतं भवेत् ॥११७
लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च ।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ॥११८

एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत्।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः ॥११९
लोभात्सहस्रं दण्ड्यस्तु मोहात्पूर्वं तु साहसम्।
भयाद्द्वौ मध्यमौ दण्ड्यौ मैत्रात्पूर्वं चतुर्गुणम् ॥१२०
कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्।
अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु ॥१२१
एतानाहुः कौटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः।
धर्मस्याव्यभिचारार्थमधर्मनियमाय च ॥१२२
कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः।
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥१२३
दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् ॥१२४
उपस्थमुदरं जिह्वा हस्तौ पादौ च पंचमम्।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥१२५
अनुबन्धं परिज्ञाय देशकालौ च तत्वतः।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ॥१२६
अधर्मदण्डनं लोके यशोघ्नं कीर्त्तिनाशनम्।
अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत् ॥१२७
अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकं चैव गच्छति ॥१२८
वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डं तु बधदण्डमतःपरम् ॥१२९

बधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात्।
तदैषु सर्वमप्येतत्प्रयुञ्जीत चतुष्टयम् ।।१३०

लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि।
ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्यामशेषतः ।।१३१

जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ।।१३२

त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ।।१३३

सर्षपाः षट् यवो मध्यस्त्रियवं त्वेककृष्णलम्।
पञ्चकृष्णलिको माषस्ते सुवर्णस्तु षोडश ।।१३४

पलं सुवर्णाश्चत्वारः पलानि धरणं दश।
द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः ।।१३५

ते षोडश स्याद्धरणं पुराणश्चैव राजतः।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ।।१३६

धरणानि दश ज्ञेयः शतमानस्तु राजतः।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ।।१३७

पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः।
मध्यमः पंच विज्ञेयः सहस्रं त्वेव चोत्तमः १३८

ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ।।१३९

वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्धिनीम्।
अशीतिभागं गृह्णीयान्मासाद्वार्धुषिकः शते ।।१४०

द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन्।
द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी ॥१४१
द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं समम्।
मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः ॥१४२
न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्।
न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ॥१४३
न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत्।
मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेत् ॥१४४
आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः।
अवहार्यौ भवेतां तौ दीर्घकालमवस्थितौ ॥१४५
संप्रीत्या भुज्यमानानि न नश्यन्ति कदाचन।
धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते ॥१४६
यत्किंचिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥१४७
अजडश्चेदपोगण्डो विषये चास्य भुज्यते।
भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति ॥१४८
आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः।
राजस्वं श्रोत्रियस्वं च न भोगेन प्रणश्यति ॥ १४९
यः स्वामिनाऽननुज्ञातमाधिं भुङ्क्तेऽविचक्षणः।
तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः ॥१५०
कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता।
धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम् ॥१५१

कृतानुसारादधिका व्यतिरिक्ता न सिद्ध्यति।
कुसीदपथमाहुस्तं पञ्चकं शतमर्हति ॥१५२
नातिसांवत्सरीं वृद्धिं न चादृष्टां विनिर्हरेत्।
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या ॥१५३
ऋणं दातुमशक्तो यः कर्तुमिच्छेत्पुनः क्रियाम्।
स दत्त्वा निर्जितां वृद्धिं करणं परिवर्तयेत् ॥१५४
अदर्शयित्वा तत्रैव हिरण्यं परिवर्तयेत्।
यावती सम्भवेद्वृद्धिस्तावतीं दातुमर्हति ॥१५५
चक्रवृद्धिं समारूढो देशकालव्यवस्थितः।
अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात् ॥१५६
समुद्रयानकुशला देशकालार्थदर्शिनः।
स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति ॥१५७
यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः।
अदर्शयन्स तं तस्य प्रयच्छे (यतेन) त्स्वधनादृणम् ॥१५८
प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्।
दण्डशुल्कावशेषं च न पुत्रो दातुमर्हति ॥१५९
दर्शनप्रातिभाव्ये तु विधिः स्यात्पूर्वचोदितः।
दानप्रतिभुवि प्रेते दायादानपि दापयेत् ॥१६०
अदातरि पुनर्दाता विज्ञातप्रकृतावृणम्।
पश्चात्प्रतिभुवि प्रेते परीप्सेत्केन हेतुना ॥१६१
निरादिष्टधनश्चेत्तु प्रतिभूः स्यादलंधनः।
स्वधनादेव तद्दद्यान्निरादिष्ट इति स्थितिः ॥१६२

मत्तोन्मत्तार्ताध्यधीनैर्बालेन स्थविरेण वा।
असंबद्धकृतश्चैव व्यवहारो न सिद्ध्यति ॥१६३
सत्या न भाषा भवति यद्यपि स्यात्प्रतिष्ठिता।
बहिश्चेद्भाष्यते धर्मान्नियताद्व्यावहारिकात् ॥१६४
योगाधमनविक्रीतं योगदानप्रतिग्रहम्।
यत्र वाऽप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत् ॥१६५
ग्रहीता यदि नष्टः स्यात्कुटुम्बार्थे कृतो व्ययः।
दातव्यं बान्धवैस्तत्स्यात्प्रविभक्तैरपि स्वतः ॥१६६
कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत्।
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥१६७
बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम।
सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत् ॥१६८
त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्।
चत्वारस्तूपचीयन्ते विप्र आढ्यो वणिङ्नृपः ॥१६९
अनादेयं नाददीत परिक्षीणोऽपि पार्थिवः।
न चादेयं समृद्धोऽपि सूक्ष्ममप्यर्थमुत्सृजेत ॥१७०
अनादेयस्य चादानादादेयस्य च वर्जनात्।
दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति ॥१७१
स्वादानाद्वर्णसंसर्गात्त्वबलानां च रक्षणात्।
बलं सञ्जायते राज्ञः स प्रेत्येह च वर्धते ॥१७२
तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये।
वर्तेत याम्यया वृत्त्या जितक्रोधो जितेन्द्रियः १७३

यस्त्वधर्मेण कार्याणि मोहात्कुर्यान्नराधिपः।
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः ॥१७४

कामक्रोधौ तु संयम्य योऽर्थान्धर्मेण पश्यति।
प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ॥१७५

यः साधयन्तं छन्देन वेदयेद्धनिकं नृपे।
स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनम् ॥१७६

कर्मणापि समं कुर्याद्धनिकायाधमर्णिकः।
समोऽवकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैः ॥१७७

अनेन विधिना राजा मिथोविवदतां नृणाम्।
साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत् ॥१७८

कुलजे वृत्तसम्पन्ने धर्मज्ञे सत्यवादिनि।
महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः ॥१७९

यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः।
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः ॥१८०

यो निक्षेपं याच्यमानो निक्षेप्तुर्न प्रयच्छति।
स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसन्निधौ ॥१८१

साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः।
अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वतः ॥१८२

स यदि प्रतिपद्येत यथान्यस्तं यथाकृतम्।
न तत्र विद्यते किंचिद्यत्परैरभियुज्यते ॥१८३

तेषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि।
उभौ निगृह्य दाप्यः स्यादिति धर्मस्य धारणा ॥१८४

निक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरे।
नश्यतो विनिपाते तावनिपाते त्वनाशिनौ ॥१८५
स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे।
न स राज्ञा नियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥१८६
अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम्।
विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत् ॥१८७
निक्षेपेष्वेषु सर्वेषु विधिः स्यात्परिसाधने।
समुद्रे नाप्नुयात्किंचिद्यदि तस्मान्न संहरेत् ॥१८८
चौरैर्हृतं जलेनोढमग्निना दग्धमेव वा।
न दद्याद्यदि तस्मात्स न संहरति किंचन ॥१८९
निक्षेपस्यापहर्तारमनिक्षेप्तारमेव च।
सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः ॥१९०
योनिक्षेपं नार्पयति यश्चानिक्षिप्य याचते।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् ॥१९१
निक्षेपस्यापहर्तारं तत्समं दापयेद्दमम्।
तथोपनिधिहर्तारमविशेषेण पार्थिवः ॥१९२
उपधाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः।
ससहायः स हन्तव्यः प्रकाशं विविधैर्वधैः ॥१९३
निक्षेपो यः कृतो येन यावांश्च कुलसन्निधौ।
तावानेव स विज्ञेयो विब्रुवन्दण्डमर्हति ॥१९४
मिथो दायः कृतो येन गृहीतो मिथ एव वा।
मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः ॥१९५

निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च ।
राजा विनिर्णयं कुर्यादक्षिण्वन्न्यासधारिणम् ॥१९६

विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसम्मतः ।
न तं नयेत साक्ष्यं तु स्तेनमस्तेनमानिनम् ॥१९७

अवहार्यो भवेच्चैव सान्वयः षट्शतं दमम् ।
निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषम् ॥१९८

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥१९९

सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित् ।
आगमः कारणं तत्र न सम्भोग इति स्थितिः ॥२००

विक्रयाद्यो धनं किंचिद्गृह्णीयात्कुलसन्निधौ ।
क्रयेण स विशुद्धं हि न्यायतो लभते धनम् ॥२०१

अथ मूलमनाहार्यं प्रकाशक्रयशोधितः ।
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम् ॥२०२

नान्यदन्येन संसृष्टरूपं विक्रयमर्हति ।
न चासारं न च न्यूनं न दूरेण तिरोहितम् ॥२०३

अन्यां चेद्दर्शयित्वान्या वोढुः कन्या प्रदीयते ।
उभे त एकशुल्केन वहेदित्यब्रवीन्मनुः ॥२०४

नोन्मत्ताया न कुष्ठिन्या न च या स्पृष्टमैथुना ।
पूर्वं दोषानभिख्याप्य प्रदाता दण्डमर्हति ॥२०५

ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत् ।
तस्य कर्मानुरूपेण देयोंऽशः सह कर्तृभिः ॥२०६

दक्षिणासु च दत्तासु स्वकर्म परिहापयन्।
कृत्स्नमेव लभेतांशमन्येनैव च कारयेत् ॥२०७
यस्मिन्कर्मणि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः।
स एव ता आददीत भजेरन्सर्व एव वा ॥२०८
रथं हरेत चाध्वर्युर्ब्रह्माधाने च वाजिनम्।
होता वापि हरेदश्वमुद्गाता चाप्यनः क्रये ॥२०९
सर्वेषामर्द्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे।
तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥२१०
संभूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः।
अनेन विधियोगेन कर्तव्यांशप्रकल्पना ॥२११
धर्मार्थं येन दत्तं स्यात्कस्मैचिद्याचते धनम्।
पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत् ॥२१२
यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः।
राज्ञा दाप्यः सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिः ॥२१३
दत्तस्यैषोदिता धर्म्या यथावदनपक्रिया।
अत ऊर्ध्वं प्रवक्ष्यामि वेतनस्यानपक्रियाम् ॥२१४
भृतोऽनार्तो न कुर्याद्यो दर्पात्कर्म यथोदितम्।
स दण्ड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनम् ॥२१५
आर्तस्तु कुर्यात्स्वस्थः सन्यथाभाषितमादितः।
सदीर्घस्यापि कालस्य तल्लभेतैव वेतनम् ॥२१६
यथोक्तमार्तः सुस्थो वा यस्तत्कर्म न कारयेत्।
न तस्य वेतनं देयमल्पोनस्यापि कर्मणः ॥२१७

एष धर्मोऽखिलेनोक्तो वेतनादानकर्मणः ।
अत ऊर्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनाम् ॥२१८
यो ग्रामदेशसङ्घानां कृत्वा सत्येन संविदम् ।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥२१९
निगृह्य दापयेच्चैनं समयव्यभिचारिणम् ।
चतुःसुवर्णान् षण्णिष्कांश्छतमानं च राजतम् ॥२२०
एतद्दण्डविधिं कुर्याद्धार्मिकः पृथिवीपतिः ।
ग्रामजातिसमूहेषु समयव्यभिचारिणाम् ॥२२१
क्रीत्वा विक्रीय वा किंचिद्यस्येहानुशयो भवेत् ।
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा ॥२२२
परेण तु दशाहस्य न दद्यान्नापि दापयेत् ।
आददानोददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥२२३
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥२२४
अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् ॥२२५
पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः ।
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः ॥२२६
पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥२२७
यस्मिन्यस्मिन्कृते कार्ये यस्येहानुशयो भवेत् ।
तमनेन विधानेन धर्म्ये पथि निवेशयेत् ॥२२८

पशुषु स्वामिनां चैव पालानां च व्यतिक्रमे ।
विवादं सम्प्रवक्ष्यामि यथावद्धर्मतत्त्वतः ॥२२९
दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे ।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् ॥२३०
गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः ॥२३१
नष्टं विनष्टं कृमिभिः श्वहतं बिषमे मृतम् ।
हीनं पुरुषकारेण प्रदद्यात्पाल एव तु ॥२३२
विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति ।
यदि देशे च काले च स्वामिनः स्वस्य शंसति ॥२३३
कर्णौ चर्म च बालांश्च वस्तिं स्नायुं च रोचनाम् ।
पशुषु स्वामिनां दद्यान्मृतेष्वङ्कानि दर्शयेत् ॥२३४
अजाविके तु संरुद्धे वृकैः पाले त्वनायति ।
यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत् ॥२३५
तासां चेदवरुद्धानां चरन्तीनां मिथो वने ।
यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी ॥२३६
धनुःशतं परीहारो ग्रामस्य स्यात्समन्ततः ।
शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु ॥२३७
तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि ।
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम् ॥२३८
वृतिं तत्र प्रकुर्वीत यामुष्ट्रो न विलोकयेत् ।
छिद्रं च वारयेत्सर्वं श्वसूकरमुखानुगम् ॥२३९

पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः ।
सपालः शतदण्डार्हो विपालान्वारयेत्पशून् ॥२४०
क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति ।
सर्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा ॥२४१
अनिर्दशाहां गां सूतां वृषान्देवपशूंस्तथा ।
सपालान्वा विपालान्वा न दण्ड्यान्मनुरब्रवीत् ॥२४२
क्षेत्रियस्यात्यये दण्डो भागाद्दशगुणो भवेत् ।
ततोऽर्धदण्डो भृत्यानामज्ञानात्क्षेत्रिकस्य तु ॥२४३
एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः ।
स्वामिनां च पशूनां च पालानां च व्यतिक्रमे ॥२४४
सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः ।
ज्येष्ठे मासि नयेत्सीमां सुप्रकाशेषु सेतुषु ॥२४५
सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थकिंशुकान् ।
शाल्मलीन्शालतालांश्च क्षीरिणश्चैव पादपान् ॥२४६
गुल्मान्वेणूंश्च विविधाञ्छमीवल्लीस्थलानि च ।
शरान्कुब्जकगुल्मांश्च तथा सीमा न नश्यति ॥२४७
तडागान्युदपानानि वाप्यः प्रस्रवणानि च ।
सीमासन्धिषु कार्याणि देवतायतनानि च ॥२४८
उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् ।
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम् ॥२४९
अश्मनोऽस्थीनि गोबालांस्तुषान्भस्मकपालिकाः ।
करीषमिष्टकाङ्गारांश्छर्करा बालुकास्तथा ॥२५०

यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत्।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत् ॥२५१

एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः।
पूर्वभुक्त्या च सततमुदकस्यागमेन च ॥२५२

यदि संशय एव स्याल्लिङ्गानामपि दर्शने।
साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णयः ॥२५३

ग्रामेयककुलानां च समक्षं सीम्नि साक्षिणः।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥२५४

ते पृष्टास्तु यथा ब्रूयुः समस्ता सीम्नि निश्चयम्।
निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ॥२५५

शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः।
सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम् ॥२५६

यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम् ॥२५७

साक्ष्यभावे तु चत्वारो ग्रामसीमान्तवासिनः।
सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ ॥२५८

सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्।
इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान् ॥२५९

व्याधाञ्छाकुनिकान्गोपान्कैवर्तान्मूलखानकान्।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः ॥२६०

ते पृष्टास्तु यथा ब्रूयुः सीमासन्धिषु लक्षणम्।
तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः ॥२६१

क्षेत्रकूपतडागानामारामस्य गृहस्य च ।
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः ॥२६२

सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम् ।
सर्वे पृथक्पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥२६३

गृहं तडागमारामं क्षेत्रं वा भीषया हरन् ।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः ॥२६४

सीमायामविषह्यायां स्वयं राजैव धर्मवित् ।
प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः ॥२६५

एषोऽखिलेनाभिहितो धर्मः सीमाविनिर्णये ।
अत ऊर्ध्वं प्रवक्ष्यामि वाक्पारुष्य विनिर्णयम् ॥२६६

शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ।
वैश्योऽप्यर्धशतं द्वे वा शूद्रस्तु बधमर्हति ॥२६७

पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ।
वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥२६८

समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे ।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥२६९

एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन् ।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः ॥२७०

नामजातिग्रहं त्वेषामभिद्रोहेण कुर्वतः ।
निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥२७१

धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः ।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥२७२

श्रुतं ( श्रुतं ) देशं च जातिं च कर्म शारीरमेव च।
वितथेन ब्रुवन्दर्पाद्दाप्यः स्याद्द्विशतं दमम् ॥२७३
काणं वाऽप्यथ वा खञ्जमन्यं वाऽपि तथाविधम्।
तथ्येनापि ब्रुवन्दाप्यो दण्डं कार्षापणावरम् ॥२७४
मातरं पितरं जायां भ्रातरं तनयं गुरुम्।
आक्षारयञ्छतं दाप्यः पन्थानं चाददद्गुरोः ॥२७५
ब्राह्मणक्षत्रियाभ्यां तु दण्डः कार्यो विजानता।
ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः ॥२७६
विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः।
छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः ॥२७७
एष दण्डविधिः प्रोक्तो वाक्पारुष्यस्य तत्त्वतः।
अत ऊर्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् ॥२७८
येन केनचिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥२७९
पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति।
पादेन प्रहरन्कोपात्पादच्छेदनमर्हति ॥२८०
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः।
कट्यां कृताङ्को निर्वास्यः स्फिचं वास्यावकर्तयेत् ॥२८१
अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः।
अवमूत्रयतो मेढ्रमवशर्धयतो गुदम् ॥२८२
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्।
पादयोर्दाढिकायां च ग्रीवायां वृषणेषु च ॥२८३

त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः।
मांसभेत्ता तु षण्णिष्कान्प्रवास्यस्त्वस्थिभेदकः २८४
वनस्पतीनां सर्वेषामुपभोगो यथा यथा।
तथा तथा दमः कार्यो हिंसायामिति धारणा ॥२८५
मनुष्याणां पशूनां च दुःखाय प्रहृते सति।
यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा ॥२८६
अङ्गावपीडनायां च प्राणशोणितयोस्तथा।
समुत्थानव्ययं दाप्यः सर्वदण्डमथापि वा ॥२८७
द्रव्याणि हिंस्याद्यो यस्य ज्ञानतोऽज्ञानतोऽपि वा।
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम् ॥२८८
चर्मचार्मिकभाण्डेषु काष्ठलोष्ठमयेषु च।
मूल्यात्पञ्चगुणो दण्डः पुष्पमूलफलेषु च ॥२८९
यानस्य चैव यातुश्च यानस्वामिन एव च।
दशातिवर्तनान्याहुः शेषे दण्डो विधीयते ॥२९०
छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥२९१
छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च।
आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत् ॥२९२
यत्रापवर्तते युग्यं वैगुण्यात्प्राजकस्य तु।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥२९३
प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति।
युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतम् ॥ २९४

स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा।
प्रमापयेत्प्राणभृतस्तत्र दण्डोऽविचारितः ॥२९५

मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषं भवेत् ।
प्राणभृत्सु महत्स्वर्धं गोगजोष्ट्रहयादिषु ॥२९६

क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥ २९७

गर्दभाजाविकानां तु दण्डः स्यात्पाञ्चमाषिकः ।
माषिकस्तु भवेद्दण्डः श्वसूकरनिपातने ॥२९८

भार्या पुत्रश्च दासश्च शिष्यो (प्रेष्यो) भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥२९९

पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथंचन ।
अतोऽन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्विषम् ॥३००

एषोऽखिलेनाभिहितो दण्डपारुष्यनिर्णयः ।
स्तेनस्यातः प्रवक्ष्यामि विधिं दण्डविनिर्णये ॥ ३०१

परमं यत्नमातिष्ठेत्स्तेनानां निग्रहे नृपः ।
स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्धते ॥ ३०२

अभयस्य हि यो दाता स पूज्यः सततं नृपः ।
सत्रं हि वर्धते तस्य सदैवाभयदक्षिणम् ॥३०३

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः ।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः ॥३०४

यदधीते यद्यजते यद्ददाति यदर्चति ।
तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात् ॥३०५

रक्षन्धर्मेण भूतानि राजा बध्यांश्च घातयन् ।
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥३०६

योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः ।
प्रतिभागं च दण्डं च स सद्यो नरकं व्रजेत् ॥ ३०७

अरक्षितारमत्तारं बलिषड्भागहारिणम् ।
तमाहुः सर्वलोकस्य समग्रमलहारकम् ॥३०८

अनवेक्षितमर्यादं नास्तिकं विप्रलुम्पकम् ।
अरक्षितारमत्तारं नृपं विद्यादधोगतिम् ॥३०९

अधार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः ।
निरोधनेन बन्धेन विविधेन बधेन च ॥३१०

निग्रहेण हि पापानां साधूनां संग्रहेण च ।
द्विजातय इवेज्याभिः पूयन्ते सततं नृपाः ॥३११

क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणाम् ।
बालवृद्धातुराणां च कुर्वता हितमात्मनः ॥३१२

यः क्षिप्तोमर्षयत्यार्तैस्तेन स्वर्गे महीयते ।
यस्त्वैश्वर्यान्न क्षमते नरकं तेन गच्छति ॥३१३

राजा स्तेनेन गन्तव्यो मुक्तकेशेन (धीमता) धावता ।
आचक्षाणेन तत्स्तेयमेवङ्कर्मास्मि शाधि माम् ॥३१४

स्कन्धेनादाय मुशलं लगुडं वापि खादिरम् ।
शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा ॥३१५

शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते ।
अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषम् ॥३१६

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्॥३१७
राजभिःकृत (धृत) दण्डास्तु कृत्वा पापानि मानवाः।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥३१८
यस्तु रज्जुं घटं कूपाद्धरेद्भिद्याच्च यः प्रपाम्।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन्समाहरेत्॥३१९
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं बधः।
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम्॥३२०
तथा धरिममेयानां शतादभ्यधिके वधः।
सुवर्णरजतादीनामुत्तमानां च वाससाम्॥३२१
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते।
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्॥३२२
पुरुषाणां कुलीनानां नारीणां च विशेषतः।
मुख्यानां चैव रत्नानां हरणे बधमर्हति॥३२३
महापशूनां हरणे शस्त्राणामौषधस्य च।
कालमासाद्य कार्यं च दण्डं राजा प्रकल्पयेत्॥३२४
गोषु ब्राह्मणसंस्थासु छुरिका (खरिका) याश्च भेदने।
पशूनां हरणे चैव सद्यः कार्योऽर्धपादिकः॥३२५
सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च।
दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च॥३२६
वेणुवैदलभाण्डानां लवणानां तथैव च।
मृन्मयानां च हरणे मृदो भस्मन एव च॥३२७

मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च।
मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवम् ॥३२८
अन्येषां चैवमादीनामद्यानामोदनस्य च।
पक्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः ॥३२९
पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च।
अन्येष्वपरिपूतेषु दण्डः स्यात्पञ्चकृष्णलः ॥३३०
परिपूतेषु धान्येषु शाकमूलफलेषु च।
निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः ॥३३१
स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम्।
निरन्वयं भवेत्स्तेयं हृत्वापव्ययते च यत् ॥३३२
यस्त्वेतान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः।
तमाद्यं (तं शतं) दण्डयेद्राजा यश्चाग्निं चोरयेद्गृहात् ॥३३३
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥३३४
पिताऽऽचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः।
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति ॥३३५
कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः।
तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा ॥३३६
अष्टापाद्यं तु शूद्रस्य स्तेये भवाति किल्विषम्।
षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य च ॥३३७
ब्राह्मणस्य चतुःषष्टिः पूर्णं वाऽपि शतं भवेत्।
द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः ॥३३८

वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च ।
तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् ॥३३९

योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम् ।
याजनाध्यापनेनापि यथा स्तेनस्तथैव सः ॥३४०

द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥३४१

असंदितानां संदाता संदितानां च मोक्षकः ।
दासाश्वरथहर्ता च प्राप्तः स्याच्चोरकिल्बिषम् ॥३४२

अनेन विधिना राजा कुर्वाणः स्तेननिग्रहम् ।
यशोऽस्मिन्प्राप्नुयाल्लोके प्रेत्य चानुत्तमं सुखम् ॥३४३

ऐन्द्रं स्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययम् ।
नोपेक्षेत क्षणमपि राजा साहसिकं नरम् ॥३४४

वाग्दुष्टात्तस्कराच्चैव दण्डेनैव च हिंसतः ।
साहसस्य नरः कर्त्ता विज्ञेयः पापकृत्तमः ॥३४५

साहसे वर्तमानं तु यो मर्षयति पार्थिवः ।
स विनाशं व्रजत्याशु विद्वेषंचाधिगच्छति ॥३४६

न मित्रकारणाद्राजा विपुलाद्वा धनागमात् ।
समुत्सृजेत्साहसिकान्सर्वभूतभयावहान् ॥३४७

शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते ।
द्विजातीनां च वर्णानां विप्लवे कालकारिते ॥३४८

आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे ।
स्त्रीविप्राभ्युपपत्तौ च धर्मेण घ्नन्न दुष्यति ॥३४९

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥३५०

नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति ॥३५१

परदाराभिमर्शेषु प्रवृत्तान्नॄन्महीपतिः।
उद्वेजनकरैर्दण्डैश्छिह्नयित्वा प्रवासयेत् ॥३५२

तत्समुत्थो हि लोकस्य जायते वर्णसङ्करः।
येन मूलहरोऽधर्मः सर्वनाशाय कल्पते ॥३५३

परस्य पत्न्या पुरुषः संभाषां योजयन्रहः।
पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाहसम् ॥३५४

यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात्।
न दोषं प्राप्नुयात्किञ्चिन्न हि तस्य व्यतिक्रमः ॥३५५

परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा।
नदीनां वाऽपि संभेदे स संग्रहणमाप्नुयात् ॥३५६

उपकारक्रियाकेलिः स्पर्शो भूषणवाससाम्।
सह खट्वासनं चैव सर्वं संग्रहणं स्मृतम् ॥३५७

स्त्रियं स्पृशेददेशे यः स्पृष्टोवा मर्षयेत्तया।
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम् ॥३५८

अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति।
चतुर्णामपि वर्णानां दारा रक्ष्यतमाः सदा ॥३५९

भिक्षुका वन्दिनश्चैव दीक्षिताः कारवस्तथा।
संभाषणं सह स्त्रीभिः कुर्युरप्रतिवारिताः ॥३६०

न संभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत्।
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ॥३६१
नैष चारणदारेषु विधिर्नात्मोपजीविषु।
सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च ॥३६२
किंचिदेव तु दाप्यः स्यात्संभाषां ताभिराचरन्।
प्रेष्यासु चैकभक्तासु रहः प्रव्रजितासु च ॥३६३
योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति।
सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ॥३६४
कन्यां भजन्तीमुत्कृष्टं न किंचिदपि दापयेत्।
जघन्यं सेवमानां तु संयतां वासयेद्गृहे ॥३६५
उत्तमां सेवमानस्तु जघन्यो वधमर्हति।
शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि ॥३६६
अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः।
तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतम् ॥३६७
सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात्।
द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये ॥३६८
कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः।
शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ॥३६९
या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्ड्यमर्हति।
अङ्गुल्योरेव वा छेदं खरेणोद्वहनं तथा ॥३७०
भर्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ॥३७१

पुमांसं दाहयेत्पापं शयने तप्त आयसे।
अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ॥३७२
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः।
व्रात्यया सह संवासे चाण्डाल्या तावदेव तु ॥३७३
शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्।
अगुप्तमङ्गसर्वस्वी गुप्तं सर्वेण हीयते ॥३७४
वैश्यः सर्वस्वदण्डः स्यात्संवत्सरनिरोधतः।
सहस्रं क्षत्रियोदण्ड्यो मौण्ड्यं मूत्रेण चार्हति ॥३७५
ब्राह्मणीं यद्यगुप्तां तु गच्छेतां वैश्यपार्थिवौ।
वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्रिणम् ॥३७६
उभावपि तु तावेव ब्राह्मण्या गुप्तया सह।
विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥३७७
सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन्।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः ॥३७८
मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते।
इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥३७९
न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम्।
राष्ट्रादेनं बहिःकुर्यात्समग्रधनमक्षतम् ॥३८०
न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि।
तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत् ॥३८१
वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥३८२

सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्।
शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः॥३८३

क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः।
मूत्रेण मौण्ड्यमृच्छेत्तु क्षत्रियो दण्डमेव वा॥३८४

अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन्।
शतानि पञ्च दण्ड्यः स्यात्सहस्रं त्वन्त्यजस्त्रियम्॥३८५

यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक्।
न साहसिकदण्डघ्नो स राजा शक्रलोकभाक्॥३८६

एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके।
साम्राज्यकृत्सजात्येषु लोके चैव यशस्करः॥३८७

ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक्त्यजेद्यदि।
शक्तं कर्मण्यदुष्टं च तयोर्दण्डः शतं शतम्॥३८८

न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति।
त्यजन्नपतितानेत्राज्ञा (ता) दण्ड्यः शतानि षट्॥३८९

आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः।
न विब्रूयान्नृपो धर्मं चिकीर्षन्हितमात्मनः॥३९०

यथार्हमेतानभ्यर्च्य ब्राह्मणैः सह पार्थिवः।
सान्त्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत्॥३९१

प्रतिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे।
अर्हावभोजयन्विप्रो दण्डमर्हति माषकम्॥३९२

श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्वभोजयन्।
तदन्नं द्विगुणं दाप्यो हिरण्यं चैव माषकम्॥३९३

अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च यः ।
श्रोत्रियेषूपकुर्वंश्च न दाप्याः केनचित्करम् ॥३९४

श्रोत्रियं व्याधितार्त्तौ च बालवृद्धावकिंचनम् ।
महाकुलीनमार्यं च राजा सम्पूजयेत्सदा ॥३९५

शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥३९६

तन्तुवायो दशपलं दद्यादेकपलाधिकम् ।
अतोन्यथा वर्तमानो दाप्यो द्वादशकं दमम् ॥३९७

शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः ।
कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ॥३९८

राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च ।
तानि निर्हरतो लोभात्सर्वहारं हरेन्नृपः ॥३९९

शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी ।
मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम् ॥४००

आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ ।
विचार्य सर्वपण्यानां कारयेत्क्रयविक्रयौ ॥४०१

पञ्चरात्रे पञ्चरात्रे पक्षे पक्षेऽथवा गते ।
कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः ॥४०२

तुला मानं प्रतीमानं सर्वं च स्यात्सुलक्षितम् ।
षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत् ॥४०३

पणं यानं तरे दाप्यं पौरुषोऽर्धपणं तरे ।
पादे पशुश्च योषिच्च पदार्धं रिक्तकः पुमान् ॥४०४

भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः।
रिक्तभाण्डानि यत्किंचित्पुमांसश्चापरिच्छदाः ॥४०५
दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्।
नदीतीरेषु तद्विद्यात्समुद्रे नास्ति लक्षणम् ॥४०६
गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः।
ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे ॥४०७
यन्नावि किंचिद्दाशानां विशीर्येतापराधतः।
तद्दाशैरेव दातव्यं समागम्य स्वतोंऽशतः ॥४०८
एष नौयायिनामुक्तो व्यवहारस्य निर्णयः।
दाशापराधतस्तोये दैविके नास्ति निग्रहः ॥४०९
वाणिज्यंकारयेद्वैश्यं कुसीदं कृषिमेव च।
पशूनां रक्षणं चैव दास्यं शूद्रं द्विजन्मनाम् ॥४१०
क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्षितौ।
बिभृयादानृशंस्येन स्वानि कर्माणि कारयेत् ॥४११
दास्यं तु कारयँल्लोभाद्ब्राह्मणः संस्कृतान्द्विजान्।
अनिच्छतः प्राभवत्याद्राज्ञा दण्ड्यः शतानि षट् ॥४१२
शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा।
दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयम्भुवा ॥४१३
न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते।
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति ॥४१४
ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ।
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः ॥४१५

भार्या पुत्रश्च दासश्च त्रय एवाधना स्मृताः ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥४१६

विस्रब्धं ब्राह्मणः शूद्राद् द्रव्योपादानमाचरेत् ।
न हि तस्यास्ति किंचित्स्वं भर्तृहार्यधनो हि सः ॥४१७

वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत् ।
तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदं जगत् ॥४१८

अहन्यहन्यवेक्षेत कर्मान्तान्वाहनानि च ।
आयव्ययौ च नियतावाकरान्कोशमेव च ॥४१६

एवं सर्वानिमान्राजा व्यवहरान्समापयन् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥४२०

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां
अष्टमोऽध्यायः ॥८

—❋::❋—

## नवमोऽध्यायः ।

### अत्रादौ—स्त्रीस्वातन्त्र्यमधर्मवर्णनम् ।

पुरुषस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान् ॥१

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् ।
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥२

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥३
कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः।
मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥४
सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥५
इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम्।
यतन्ते रक्षितुं भार्यां भर्त्तारो दुर्बला अपि ॥६
स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च।
स्वं च धर्मं प्रयत्नेन जायां रक्षन्हि रक्षति ॥७
पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥८
यादृशं भजते हि स्त्री सुतं सूते तथाविधम्।
तस्मात्प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः ॥९
न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम्।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥१०
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्।
शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥११
अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥१२
पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्।
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥१३

नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः ।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥१४
पौंश्चल्याच्चलचित्ताच्च नैःस्नेह्याच्च स्वभावतः ।
रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते ॥१५
एवं स्वभावं ज्ञात्वाऽऽसां प्रजापतिनिसर्गजम् ।
परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति ॥१६
शय्यासनमलङ्कारं कामं क्रोधमनार्यताम् ।
द्रोग्धृभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् ॥१७
नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितिः ।
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः ॥१८
तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि ।
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥१९
यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता ।
तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम् ॥२०
ध्यायत्यनिष्टं यत्किञ्चित्पाणिग्राहस्य चेतसा ।
तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते ॥२१
यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥२२
अक्षमाला वशिष्ठेन संयुक्ताऽधमयोनिजा ।
शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् ॥२३
एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः ।
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः ॥२४

एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा ।
प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधत ॥२५
प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥२६
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥२७
अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा ।
दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह ॥२८
पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ॥२९
व्यभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते ॥३०
पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः ।
विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत ॥ ३१
भर्त्तुः पुत्रं विजानन्ति श्रुतिद्वैधं तु भर्त्तरि ।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ॥३२
क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात्संभवः सर्वदेहिनाम् ॥३३
विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित् ।
उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते ॥३४
बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते ।
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता ॥३५

यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते ।
तादृग्रोहति तत्तस्मिन्बीजं स्वैर्व्यञ्जितं गुणैः ॥३६
इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते ।
न च योनिगुणान्कांश्चिद्बीजं पुष्यति पुष्टिषु ॥३७
भूमावप्येककेदारे कालोप्तानि कृषीबलैः ।
नानारूपाणि जायन्ते बीजानीह स्वभावतः ॥३८
व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः ।
यथाबीजं प्ररोहन्ति लशुनानीक्षवस्तथा ॥३६
अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते ।
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ॥४०
तत्प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना ।
आयुष्कामेन वप्तव्यं न जातु परयोषिति ॥४१
अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥४२
नश्यतीषुर्यथा विद्धः खे विद्धमनुविध्यतः ।
तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे ॥४३
पृथोरपीमां पृथिवीं भार्यां पूर्वविदो विदुः ।
स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगम् ॥४४
एतावानेव पुरुषो यज्जायात्मा प्रजेति ह ।
विप्राः प्राहुस्तथा चैतद्यो भर्त्ता सा स्मृताङ्गना ॥४५
न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्या विमुच्यते ।
एवं धर्मं विजानीमः प्राक्प्रजापतिनिर्मितम् ॥४६

सकृदंशो निपतति सकृत्कन्या प्रदीयते।
सकृदाह ददामीति त्रीण्येतानि सतां सकृत् ॥४७
यथा गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च।
नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि ॥४८
येऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः।
ते वै सस्यस्य जातस्य न लभन्ते फलं क्वचित् ॥४९
यदन्यगोषु वृषभो वत्सानां जनयेच्छतम्।
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ॥५०
तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥५१
फलं त्वनभिसन्धाय क्षेत्रिणां बीजिनां तथा।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्गरीयसी(बलीयसी) ॥५२
क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥५३
ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ॥५४
एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च।
विहङ्गमहिषीणां च विज्ञेयः प्रसवं प्रति ॥५५
एतद्वः सारफल्गुत्वं बीजयोन्योः प्रकीर्तितम्।
अतः परं प्रवक्ष्यामि योषितां धर्ममापदि ॥५६
भ्रातुर्ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा।
यवीयसस्तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ॥५७

ज्येष्ठो यवीयसो भार्यां यवीयान्वाऽग्रजस्त्रियम् ।
पतितौ भवतो गत्वा नियुक्तावप्यनापदि ॥५८

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥५९

विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथञ्चन ॥६०

द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ।
अनिर्वृत्तं नियोगार्थं पश्यन्तो धर्मतस्तयोः ॥६१

विधवायां नियोगार्थे निवृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्तेयातां परस्परम् ॥६२

नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ॥६३

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥६४

नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं पुनः ॥६५

अयं द्विजैरविद्वद्भिः पशुधर्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥६६

स महीमखिलां भुञ्जन्राजर्षिप्रवरः पुरा ।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः ॥६७

ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥६८

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥६९
यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ ॥७०
न दत्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः ।
दत्वा पुनः प्रयच्छन्हि प्राप्नोति पुरुषानृतम् ॥७१
विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् ।
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥७२
यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत् ।
तस्य तद्वितथं कुर्यात्कन्यादातुर्दुरात्मनः ॥७३
विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः ।
अवृत्तिकर्शिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि ॥७४
विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता ।
प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ॥७५
प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः ।
विद्यार्थं षड्यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान् ॥७६
संवत्सरं प्रतीक्षेत द्विषाणां योषितं पतिः ।
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥७७
अतिक्रामेत्प्रमत्तं या मत्तं रोगार्त्तमेव वा ।
सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा ॥७८
उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनम् ॥७९

मद्यपाऽसत्य (असाधु) वृत्ता च प्रतिकूला च या भवेत् ।
व्याधिता वाऽधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा ॥८०
बन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥८१
या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः ।
साऽनुज्ञाप्याऽधिवेत्तव्या नावमान्या च कर्हिचित् ॥८२
अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात् ।
सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥८३
प्रतिषेधे पिबेद्या तु मद्यमभ्युदयेष्वपि ।
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि षट् ॥८४
यदि स्वाश्चापराश्चैव विन्देरन्योषितो द्विजाः ।
तासां वर्णक्रमेण स्याज्ज्यैष्ठ्यं पूजा च वेश्म च ॥८५
भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम् ।
स्वा स्वैव कुर्यात्सर्वेषां नास्वजातिः कथंचन ॥८६
यस्तु तत्कारयेन्मोहात्सजात्या स्थितयाऽन्यया ।
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः ॥८७
उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ॥८८
काममा मरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥८९
त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥९०

अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम्।
नैनः किञ्चिदवाप्नोति न च यं साऽधिगच्छति ॥९१

अलङ्कारं नाददीत पित्र्यं कन्या स्वयंवरा।
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत् ॥९२

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन्।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात् ॥९३

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥९४

देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः।
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ॥९५

प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थं च मानवाः।
तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः ॥९६

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते ॥९७

आददीत न शूद्रोऽपि शुल्कं दुहितरं ददन्।
शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयम् ॥९८

एतत्तु न परे चक्रुर्नापरे जातु साधवः।
यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते ॥९९

नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु।
शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयम् ॥१००

अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः ॥१०१

तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ ।
यथा नातिचरेतां तौ वियुक्ताावितरेतरम् ॥१०२

एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः ।
आपद्यपत्यप्राप्तिश्च दाय (धर्म) भागं निबोधत ॥१०३

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ।
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥१०४

ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा ॥१०५

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ॥१०६

यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते ।
स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥१०७

पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातॄन्यवीयसः ।
पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः ॥१०८

ज्येष्ठः पूज्य तमो लोके ज्येष्ठः सद्भिरगर्हितः ।
ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ॥१०९

यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः ।
अज्येष्ठवृत्तिर्यस्तु स्यात्स संपूज्यस्तु बन्धुवत् ॥११०

एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया ।
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया ॥१११

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः ॥११२

ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम् ।
येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम् ॥११३
सर्वेषां धनजातानामाददीताग्र्यमग्रजः ।
यच्च सातिशयं किंचिद्दशतश्चाप्नुयाद्वरम् ॥११४
उद्धारो न दशस्वस्ति संपन्नानां स्वकर्मसु ।
यत्किञ्चिदेव देयं तु ज्यायसे मानवर्धनम् ॥११५
एवं समुद्धृतोद्धारे समानंशान्प्रकल्पयेत् ।
उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना ॥११६
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः ।
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः ॥११७
स्वाभ्यः स्वाभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् ।
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः ॥११८
अजाविकं सैकशफं न जातु विषमं भजेत् ।
अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते ॥११९
यवीयाञ्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि ।
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः ॥१२०
उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत् ॥१२१
पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः ।
कथं तत्र विभागः स्यादिति चेत्संशयो भवेत् ॥१२२
एकं वृषभमुद्धारं संहरेत स पूर्वजः ।
ततोऽपरे ज्येष्ठवृषास्तदूनानां स्वमातृतः ॥१२३

ज्येष्ठस्तु जातो ज्येष्ठायां हरेद्वृषभषोडशाः ।
ततः स्वमातृतः शेषा भजेरन्निति धारणा ॥१२४
सदृशस्त्रीषु जातानां पुत्राणामविशेषतः ।
न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते ॥१२५
जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम् ।
यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता ॥१२६
अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम् ॥१२७
अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः ।
विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः ॥१२८
ददौ स दश धर्माय कश्यपाय त्रयोदश ।
सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम् ॥१२९
यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥१३०
मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः ।
दौहित्र एव च हरेदपुत्रस्याखिलं धनम् ॥१३१
दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् ।
स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च ॥१३२
पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः ।
तयोर्हि मातापितरौ संभूतौ तस्य देहतः ॥१३३
पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते ।
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः ॥१३४

अपुत्रायां मृतायां तु पुत्रिकायां कथंचन।
धनं तत्पुत्रिकाभर्ता हरेतैवाविचारयन् ॥१३५
अकृता वा कृता वाऽपि यं विन्देत्सदृशात्सुतम्।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥१३६
पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥१३७
पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥१३८
पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते।
दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत् ॥१३९
मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः।
द्वितीयं तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः ॥१४०
उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्त्रिमः।
स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः ॥१४१
गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः क्वचित्।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥१४२
अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात्।
उभौ तौ नार्हतो भागं जारजातककामजौ ॥१४३
नियुक्तायामपि पुमान्नार्यां जातोऽविधानतः।
नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः ॥१४४
हरेत्तत्र नियुक्तायां जातः पुत्रो यथौरसः।
क्षेत्रिकस्य तु तद्बीजं धर्मतः प्रसवश्च सः ॥१४५

धनं यो विभृयाद्भ्रातुर्मृतस्य स्त्रियमेव च ।
सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम् ॥१४६

याऽनियुक्ताऽन्यतः पुत्रं देवराद्वाऽप्यवाप्नुयात् ।
तं कामजरिक्थीयं मिथ्योत्पन्नं प्रचक्षते ॥१४७

एतद्विधानं विज्ञेयं विभागस्यैकयोनिषु ।
बह्वीषु चैकजातानां नानास्त्रीषु निबोधत ॥१४८

ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः ।
तासां पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः ॥१४९

कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च ।
विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः ॥१५०

त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः ।
वैश्याजः सार्धमेवांशमंशं शूद्रासुतो हरेत् ॥१५१

सर्वं वा रिक्थजातं तद्दशधा परिकल्प्य च ।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित् ॥१५२

चतुरोंऽशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः ।
वैश्या पुत्रो हरेद् द्व्यंशमंशं शूद्रासुतो हरेत् ॥१५३

यद्यपि स्यात्तु सत्पुत्रो (यद्यपुत्रो) ऽप्यसत्पुत्रोऽपि वा भवेत् ।
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः ॥१५४

ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक् ।
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत् ॥१५५

समवर्णासु ये (वा) जाताः सर्वे पुत्रा द्विजन्मनाम् ।
उद्धारं ज्यायसे दत्वा भजेरन्नितरे समम् ॥१५६

शूद्रस्य तु सवर्णैव नान्या भार्या विधीयते।
तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत् ॥१५७
पुत्रान्द्वादश यानाह नृणां स्वायम्भुवो मनुः।
तेषां षड्बन्धुदायादाः षडदायादबान्धवाः ॥१५८
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥१५९
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥१६०
यादृशं फलमाप्नोति कुप्लवैः सन्तरं जलम्।
तादृशं फलमाप्नोति कुपुत्रैः संतरंस्तमः ॥१६१
यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ।
यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः ॥१६२
एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम् ॥१६३
षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्।
औरसो विभजन्दायं पित्र्यं पंचममेव वा ॥१६४
औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ।
दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः ॥१६५
स्वेक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम्।
तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकम् ॥१६६
यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा।
स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥१६७

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः ॥१६८
सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥१६९
उत्पद्यते गृहे यस्य (यस्तु) न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥१७०
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते ॥१७१
पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥१७२
या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥१७३
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥१७४
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥१७५
सा चेदक्षतयोनिः स्याद्गतप्रत्यागताऽपि वा ।
पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति ॥१७६
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानमर्प (स्पर्शे) येद्यस्मै स्वयंदत्तस्तु स स्मृतः ॥१७७
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ।
स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥१७८

दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्।
सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः ॥१७९

क्षेत्रजादीन्सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥१८०

य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः।
यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु ॥१८१

भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत्।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥१८२

सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥१८३

श्रेयसः श्रेयसोऽलाभे पापीयान्रिक्थमर्हति।
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः ॥१८४

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः।
पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च ॥१८५

त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते।
चतुर्थः संप्रदातैषां पञ्चमो नोपपद्यते ॥१८६

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्।
अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा ॥१८७

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः।
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते ॥१८८

अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः।
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः ॥१८९

संस्थितस्यानपत्यस्य सगोत्रात्पुत्रमाहरेत् ।
तत्र यद्रिक्थजातं स्यात्तत्तस्मिन्प्रतिपादयेत् ॥१९०

द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने ।
तयोर्यद्यस्य पित्र्यं स्यात्तत्स गृह्णीत नेतरः ॥१९१

जनन्यां संस्थितायां तु समं सर्वे सहोदराः ।
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः ॥१९२

यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः ।
मातामह्या धनात्किञ्चित्प्रदेयं प्रीतिपूर्वकम् ॥१९३

अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतिकर्मणि ।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥१९४

अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत् ।
पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् ॥१९५

ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्वसु ।
अप्रजायामतीतायां भर्तुरेव तदिष्यते ॥१९६

यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु ।
अप्रजायामतीतायां मातापित्रोस्तदिष्यते ॥१९७

स्त्रियां तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन ।
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत् ॥१९८

न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात् ।
स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनाज्ञया ॥१९९

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत् ।
न तं भजेरन्दायादा भजमानाः पतन्ति ते ॥२००

अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥२०१
सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् ॥२०२
यद्यर्थिता तु दारैः स्यात्क्लीवादीनां कथंचन।
तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति ॥२०३
यत्किञ्चित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति।
भागो यवीयसां तत्र यदि विद्यानुपालिनः ॥२०४
अविद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत्।
समस्तत्र विभागः स्यादपित्र्य इति धारणा ॥२०५
विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्।
मैत्रमौद्वाहिकं चैव माधुपर्किकमेव च ॥२०६
भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्मणा।
स निर्भाज्यः स्वकादंशात्किञ्चिद्दत्तोपजीवनम् ॥२०७
अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपा ( र्जितम् ) र्जयेत्।
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति ॥२०८
पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्।
न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम् ॥२०९
विभक्ताः सह जीवन्तो विभजेरन्पुनर्यदि।
समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते ॥२१०
येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः।
म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥२११

सोदर्या विभजेरंस्तं समेत्य सहिताः समम् ।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥२१२
यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः ।
सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः ॥२१३
सर्वे एव विकर्मस्था नार्हन्ति भ्रातरो धनम् ।
न चादत्त्वा कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकम् ॥२१४
भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह ।
न पुत्रभागं विषमं पिता दद्यात्कथंचन ॥२१५
ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम् ।
संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह ॥२१६
अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् ।
मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम् ॥२१७
ऋणे धने च सर्वस्मिन्प्रविभक्ते यथाविधि ।
पश्चाद् दृश्येत यत्किञ्चित्तत्सर्वं समतां नयेत् ॥२१८
वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः ।
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते ॥२१९
अयमुक्तो विभागो वः पुत्राणां च क्रियाविधिः ।
क्रमशः क्षेत्रजादीनां द्यूतधर्मं निबोधत ॥२२०
द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् ।
राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ॥२२१
प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान्भवेत् ॥२२२

अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः ॥२२३
द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा।
तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥२२४
कितवान्कुशीलवान्क्रूरान्पाषण्डस्थांश्च मानवान्।
विकर्मस्थान् शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् ॥२२५
एते राष्ट्रे वर्तमाना राज्ञः प्रच्छन्नतस्कराः।
विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः ॥२२६
द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं महत्।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥२२७
प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः।
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा ॥२२८
क्षत्रविट्शूद्रयोनिस्तु दण्डं दातुमशक्नुवन्।
आनृण्यं कर्मणा गच्छेद्विप्रो दद्याच्छनैः शनैः ॥२२९
स्त्रीबालोन्मत्तवृद्धानां दरिद्राणां च रोगिणाम्।
शिफाविदलरज्ज्वाद्यैर्विदध्यांनृपतिर्दमम् ॥२३०
ये नियुक्तास्तु कार्येषु हन्युः कार्याणि कार्यिणाम्।
धनोष्मणा पच्यमानास्तान्निःस्वान्कारयेन्नृपः ॥२३१
कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान्।
स्त्रीबालब्राह्मणघ्नांश्च हन्याद्द्विट्सेविनस्तथा ॥२३२
तीरितं चानुशिष्टं च यत्र क्वचन यद्भवेत्।
कृतं तद्धर्मतो विद्यान्न तद्भूयो निवर्तयेत् ॥२३३

अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा ।
तत्स्वयं नृपतिः कुर्यात्तंसहस्रञ्च दण्डयेत् ॥२३४

ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः ।
एते सर्वे पृथग्ज्ञेया महापातकिनो नराः ॥२३५

चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम् ।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् ॥२३६

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ।
स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् ॥२३७

असंभोज्या ह्यसंयाज्या असंपाठ्या(विगर्हिताः)विवाहिनः ।
चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः ॥२३८

ज्ञातिसम्बन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः ।
निर्दया निर्नमस्कारास्तन्मनोरनुशासनम् ॥२३९

प्रायश्चित्तं तु कुर्वाणाः सर्वे (पूर्वे) वर्णा यथोदितम् ।
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसम् ॥२४०

आगस्सु ब्राह्मणस्यैव कार्यो मध्यमसाहसः ।
बिवास्यो वा भवेद्राष्ट्रात्सद्रव्यः सपरिच्छदः ॥२४१

इतरे कृतवन्तस्तु पापान्येतान्यकामतः ।
सर्वस्वहारमर्हन्ति कामतस्तु प्रवासनम् ॥२४२

नाददीत नृपः साधुर्महापातकिनो धनम् ।
आददानस्तु तल्लोभात्तेन दोषेण लिप्यते ॥२४३

अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत् ।
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत् ॥२४४

ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः।
ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः ॥२४५
यत्र वर्जयते राजा पापकृद्भ्यो धनागमम्।
तत्र कालेन जायन्ते मानवा दीर्घजीविनः ॥२४६
निष्पद्यन्ते च शस्यानि यथोप्तानि विशां पृथक्।
बालाश्च न प्रमीयन्ते विकृतं न च जायते ॥२४७
ब्राह्मणान्बाधमानं तु कामादवरवर्णजम्।
हन्याच्चित्रैर्बधोपायैरुद्वेजनकरैर्नृपः ॥२४८
यावानबध्यस्य बधे तावान्बध्यस्य मोक्षणे।
अधर्मो नृपतेर्दृष्टो धर्मस्तु विनियच्छतः ॥२४९
उदितोऽयं विस्तरशो मिथो विवदमानयोः।
अष्टादशसु मार्गेषु व्यवहारस्य निर्णयः ॥२५०
एवं धर्म्याणि कार्याणि सम्यक्कुर्वन्महीपतिः।
देशानलब्धांल्लिप्सेत लब्धांश्च परिपालयेत् ॥२५१
सम्यङ्निविष्टदेशस्तु कृतदुर्गश्च शास्त्रतः।
कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम् ॥२५२
रक्षणादार्यवृत्तानां कण्टकानां च शोधनात्।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः ॥२५३
अशासंस्तस्करान्यस्तु बलिं गृह्णाति पार्थिवः।
तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते ॥२५४
निर्भयं तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम्।
तस्य तद्वर्धते नित्यं सिच्यमान इव द्रुमः ॥२५५

द्विविधांस्तस्करान्विद्यात्परद्रव्यापहारकान्।
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः ॥२५६
प्रकाशवंचकास्तेषां नानापण्योपजीविनः।
प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः ॥२५७
उत्कोचकाश्चोपधिका वञ्चकाः कितवास्तथा।
मङ्गलादेशवृत्त।श्च भद्रप्रेक्षणिकैः सह ॥२५८
असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः।
शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः ॥२५९
एवमाद्यान्विजानीयात्प्रकाशांल्लोककण्टकान्।
निगूढचारिणश्चान्याननार्यानार्यलिङ्गिनः ॥२६०
तान्विदित्वा सुचरितैर्गूढैस्तत्कर्मकारिभिः।
चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत् ॥२६१
तेषां दोषानभिख्याप्य स्वे स्वे कर्मणि तत्त्वतः।
कुर्वीत शासनं राजा सम्यक्सारापराधतः ॥२६२
न हि दण्डादृते शक्यः कर्त्तुं पापविनिग्रहः।
स्तेनानां पापबुद्धीनां निभृतं चरतां क्षितौ ॥२६३
सभा प्रपापूपशालावेशमद्यान्नविक्रयाः।
चतुष्पथाश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च ॥२६४
जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च।
शून्यानि चाप्यगाराणि वनान्युपवनानि च ॥२६५
एवं विधान्नृपो देशान्गुल्मैः स्थावरजङ्गमैः।
तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत् ॥२६६

तत्सहायैरनुगतैर्नानाकर्मप्रवेदिभिः।
विद्यादुत्सादयेच्चैव निपुणैः पूर्वतस्करैः ॥२६७

भक्ष्यभोज्योपदेशैश्च ब्राह्मणानां च दर्शनैः।
शौर्यकर्मापदेशैश्च कुर्युस्तेषां समागमम् ॥२६८

ये तत्र नोपसर्पेयुर्मूलप्रणिहिताश्च ये।
तान्प्रसह्य नृपो हन्यात्समित्रज्ञातिबान्धवान् ॥२६९

न होढेन विना चौरं घातयेद्धार्मिको नृपः।
सहोढं सोपकरणं घातयेदविचारयन् ॥२७०

ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः।
भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत् ॥२७१

राष्ट्रेषु रक्षाधिकृतान्सामन्तांश्चैव चोदितान्।
अभ्याघातेषु मध्यस्थान् शिष्याच्चौरानिव द्रुतम् ॥२७२

यश्चापि धर्मसमयात्प्रच्युतो धर्मजीवनः।
दण्डेनैव तमप्योषेत्स्वकाद्धर्माद्धि विच्युतम् ॥२७३

ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने।
शक्तितो नाभिधावन्तो निर्वास्याः सपरिच्छदाः ॥२७४

राज्ञः कोशापहर्तॄंश्च प्रातिकूल्येष्ववस्थितान्।
घातयेद्विविधैर्दण्डैररीणां चोपजापकान् ॥२७५

सन्धिं भित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः।
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत् ॥२७६

अङ्गुलीर्ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे।
द्वितीये हस्तचरणौ तृतीये वधमर्हति ॥२७७

अग्निदान्भक्तदांश्चैव तथा शस्त्रावकाशदान् ।
संनिधातॄंश्च मोषस्य हन्याच्चौरमिवेश्वरः ॥२७८

तडागभेदकं हन्यादप्सु शुद्धवधेन वा ।
यद्वाऽपि प्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसम् ॥२७९

कोष्ठागारायुधागारदेवतागारभेदकान् ।
हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन् ॥२८०

यस्तु पूर्वनिविष्टस्य तडागस्योदकं हरेत् ।
आगमं वाप्यपां भिन्द्यात्स दाप्य पूर्वसाहसम् ॥२८१

समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि ।
स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् ॥२८२

आपद्गतोऽथवा वृद्धा गर्भिणी बाल एव वा ।
परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः ॥२८३

चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः ।
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः ॥२८४

संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः ।
प्रतिकुर्याच्च तत्सर्वं पञ्च दद्याच्छतानि च ॥२८५

अदूषितानां द्रव्याणां दूषणे भेदने तथा ।
मणीनापवेधे च दण्डः प्रथमसाहसः ॥२८६

समैर्हि विषमं यस्तु चरेद्वै मूल्यतोऽपि वा ।
समाप्नुयाद्दमं पूर्वं नरो मध्यममेव वा ॥२८७

बन्धनानि च सर्वाणि राजमार्गे निवेशयेत् ।
दुःखिता यत्र दृश्येरन्विकृताः पापकारिणः ॥२८८

प्राकारस्य च भेत्तारं परिखाणां च पूरकम् ।
द्वाराणां चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥२८९

अभिचारेषु सर्वेषु कर्त्तव्यो द्विशतो दमः ।
मूलकर्मणि चानाप्तैः कृत्यासु विविधासु च ॥२९०

अबीजविक्रयी चैव बीजोत्क्रुष्टा तथैव च ।
मर्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधम् ॥२९१

सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः ।
प्रवर्त्तमानमन्याये छेदये (खण्डशः) ल्लवशः क्षुरैः ॥२९२

सीताद्रव्यापहरणे शस्त्राणामौषधस्य च ।
कालमासाद्य कार्यं च राजा दण्डं प्रकल्पयेत् ॥२९३

स्व्याम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा ।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥२९४

सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम् ।
पूर्वं पूर्वं गुरुतरं जानीयाद्व्यसनं महत् ॥२९५

सप्ताङ्गस्येह राज्यस्य विष्टब्धस्य त्रिदण्डवत् ।
अन्योन्यगुणवैशेष्यान्न किञ्चिदतिरिच्यते ॥२९६

तेषु तेषु तु कृत्येषु तत्तदङ्गं विशिष्यते ।
येन यत्साध्यते कार्यं तत्तस्मिन् श्रेष्ठमुच्यते ॥२९७

चारेणोत्साहयोगेन क्रिययैव च कर्मणाम् ।
स्वशक्तिं परशक्तिं च नित्यं विद्या(न्महीपतिः)त्परात्मनोः ॥२९८

पीडनानि च सर्वाणि व्यसनानि तथैव च ।
आरभेत ततः कार्यं संचिन्त्य गुरुलाघवम् ॥२९९

आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः ।
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥३००

कृतं त्रेतायुगं चैव द्वापरं कलिरेव च ।
राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते ॥३०१

कलिः प्रसुप्तो भवति स जाग्रद्द्वापरं युगम् ।
कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम् ॥३०२

इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च ।
चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ॥३०३

वार्षिकांश्चतुरो मासान्यथेन्द्रोऽभिप्रवर्षति ।
तथाभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ॥३०४

अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः ।
तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥३०५

प्रविश्य सर्वभूतानि यथा चरति मारुतः ।
तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥३०६

यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा राज्ञा नियन्तव्या प्रजास्तद्धि यमव्रतम् ॥३०७

वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते ।
तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम् ॥३०८

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः ।
तथा प्रकृतयो यस्मिन्स चान्द्रव्रतिको नृपः ॥३०९

प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु ।
दुष्टसामन्तहिंस्रश्च तदाग्नेयं व्रतं स्मृतम् ॥३१०

यथा सर्वाणि भूतानि धरा धारयते समम्।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥३११
एतैरुपायैरन्यैश्च युक्तो नित्यमतन्द्रितः।
स्तेनान्राजा निगृह्णीयात्स्वराष्ट्रे परएव च ॥३१२
परामप्यापदं प्राप्तो ब्राह्मणान्न प्रकोपयेत्।
ते ह्येनं कुपिता हन्युः सद्यः सबलवाहनम् ॥३१३
यैः कृतः सर्वभक्षोऽग्निरपेयश्च महोदधिः।
क्षयी चाप्यायितः सोमः को न नश्येत्प्रकोप्य तान् ॥३१४
लोकानन्यान्सृजेयुर्ये लोकपालांश्च कोपिताः।
देवान्कुर्युरदेवांश्च कः क्षिण्वंस्तान्समृध्नुयात् ॥३१५
यानुपाश्रित्य तिष्ठन्ति लोका देवाश्च सर्वदा।
ब्रह्म चैव धनं येषां को हिंस्यात्ताञ्जिजीविषुः ॥३१६
अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत्।
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥३१७
श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति।
हूयमानश्च यज्ञेषु भूय एवाभिवर्धते ॥३१८
एवं यद्यप्यनिष्टेषु वर्त्तन्ते सर्वकर्मसु।
सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ॥३१९
क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणान्प्रति सर्वशः।
ब्रह्मैव सन्नियन्तृ स्यात्क्षत्रं हि ब्रह्मसंभवम् ॥३२०
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥३२१

नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते ।
ब्रह्म क्षत्रं च संपृक्तमिह चामुत्र वर्धते ॥३२२
दत्त्वा धनं तु विप्रेभ्यः सर्वदण्डसमुत्थितम् ।
पुत्रे राज्यं समा (साद्य) सृज्य कुर्वीत प्रायणं रणे ॥३२३
एवं चरन्सदा युक्तो राजधर्मेषु पार्थिवः ।
हितेषु चैव लोकस्य सर्वान्भृत्यान्नियोजयेत् ॥३२४
एषोऽखिलः कर्मविधिरुक्तो राज्ञः सनातनः ।
इमं कर्मविधिं विद्यात्क्रमशो वैश्यशूद्रयोः ॥३२५
वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम् ।
वार्तायां नित्ययुक्तः स्यात्पशूनां चैव रक्षणे ॥३२६
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ॥३२७
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ।
वैश्ये चेच्छति नान्येन रक्षितव्याः कथंचन ॥३२८
मणिमुक्ताप्रवालानां लोहानां तांतवस्य च ।
गन्धानां च रसानां च विद्यादर्घबलाबलम् ॥३२९
बीजानामुप्तिविच्च स्यात्क्षेत्रदोषगुणस्य च ।
मानयोगं च जानीयात्तुलायोगांश्च सर्वशः ॥३३०
सारासारं च भाण्डानां देशानां च गुणागुणान् ।
लाभालाभं च पण्यानां पशूनां परिवर्धनम् ॥३३१
भृत्यानां च भृतिं विद्याद्भाषाश्च विविधा नृणाम् ।
द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च ॥३३२

धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमम् ।
दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः ॥३३३
विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम् ।
शुश्रूषैव तु शूद्रस्य धर्मो नैःश्रेयसः परम् ॥३३४
शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः ।
ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते ॥३३५
एषोऽनापदि वर्णानामुक्तः कर्मविधिः शुभः ।
आपद्यपि हि यस्तेषां क्रमशस्तन्निबोधत ॥३३६

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां
नवमोऽध्यायः ॥९॥

## दशमोऽध्यायः ।

अथादौ—वर्णानां भेदान्तरविवेकवर्णनम् ।

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः ।
प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः ॥१
सर्वेषां ब्राह्मणो विद्याद्वृत्त्युपायान्यथाविधि ।
प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत् ॥२

वैशेष्यात्प्रकृतिश्रैष्ठ्यान्नियमस्य च धारणात् ।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ॥३
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पंचमः ॥४
सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ।
आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते ॥५
स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान् ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥६
अनन्तरासु जातानां विधिरेष सनातनः ।
द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम् ॥७
ब्राह्मणाद्वैश्यकन्यायामंबष्ठो नाम जायते ।
निषादः शूद्रकन्यायां यः पारशव उच्यते ॥८
क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान् ।
क्षत्रशूद्रवपुर्जं तु रुग्रो नाम प्रजायते ॥९
विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन्षडेतेऽपसदाः स्मृताः ॥१०
क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥११
शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः ॥१२
एकान्तरे त्वानुलोम्यादंबष्ठोग्रौ यथास्मृतौ ।
क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि ॥१३

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्।
ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते ॥१४

ब्राह्मणादुग्रकन्यायामावृतो नाम जायते।
आभीरोऽम्बष्ठकन्यायामायोगव्यां तु धिग्वणः ॥१५

आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम्।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः ॥१६

वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु।
प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः ॥१७

जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः।
शूद्राज्जातो निषाद्यां तु स वै कुक्कुटकः स्मृतः ॥१८

क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥१९

द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान्।
तान्सावित्रीपरिभ्रष्टान्व्रात्यानिति विनिर्दिशेत् ॥२०

व्रात्यात्तु जायते विप्रात्पापात्मा भूर्ज्जकण्टकः।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥२१

झल्लो मल्लश्च राजन्याद्व्रात्यात्लिच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड एव च ॥२२

वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च।
कारुषश्च विजन्मा च मैत्रः स्वात्वत एव च ॥२३

व्यभिचारेण वर्णानामवेद्यावेदनेन च।
स्वकर्मणां च त्यागेन जायन्ते वर्णसङ्कराः ॥२४

सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान्प्रवक्ष्याम्यशेषतः ॥२५
सूतो वैदेहकश्चैव चण्डालश्च नराधमः ।
मागधः क्षत्तृजातिश्च तथाऽयोगव एव च ॥२६
एते षट्सदृशान्वर्णाञ्जनयन्ति स्वयोनिषु ।
मातृजात्याः प्रसूयन्ते प्रवरासु च योनिषु ॥२७
यथा त्रयाणां वर्णानां द्वयोरात्माऽस्य जायते ।
आनन्तर्यात्स्वयोन्यां तु तथा वाह्येष्वपि क्रमः ॥२८
ते चापि वाह्यान्सुबहूंस्ततोऽप्यधिकदूषितान् ।
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥२९
यथैव शूद्रो ब्राह्मण्यां वाह्यं जन्तुं प्रसूयते ।
तथा वाह्यतरं वाह्यश्चातुर्वर्ण्ये प्रसूयते ॥३०
प्रतिकूलं वर्त्तमाना वाह्या वाह्यतरान्पुनः ।
हीना हीनान्प्रसूयन्ते वर्णान्पञ्चदशैव तु ॥३१
प्रसाधनोपचारज्ञमदासं दास्यजीवनम् ।
सैरन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे ॥३२
मैत्रेयकं तु वैदेहो माधूकं संप्रसूयते ।
नृन्प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये ॥३३
निषादो मार्गवं सूते दासं नौकर्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्यावर्तनिवासिनः ॥३४
मृतवस्त्रभृत्सु नारीषु गर्हितान्नाशनासु च ।
भवन्त्यायोगवीष्वेते जातिहीनाः पृथक्त्रयः ॥३५

कारावरो निषादात्तु चर्मकारं प्रसूयते ।
वैदेहिकादन्ध्रमेदौ वहिर्ग्रामप्रतिश्रयौ ॥३६
चाण्डालात्पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥३७
चाण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।
पुल्कस्यां जायते पापः सदा सज्जनगर्हितः ॥३८
निषादस्त्री तु चण्डालात्पुत्रमन्त्यावसायिनम् ।
श्मशानगोचरं सूते बाह्यानामपि गर्हितम् ॥३९
सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः ॥४०
सजातिजानन्तरजाः षट्सुता द्विजधर्मिणः ।
शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ॥४१
तपोवीजप्रभावैस्तु ते गच्छन्ति युगे युगे ।
उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ॥४२
शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणा (तिक्रमेण) दर्शनेन च ॥४३
पुण्ड्रकाश्चोड्रद्रविडाः काम्वोजा यवनाः शकाः ।
पारदापह्लवाश्चीनाः किराता दरदाः खशाः ॥४४
मुखबाहूरुपज्जानां या लोके जातयो वहिः ।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥४५
ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः ।
ते निन्दितैर्वर्तयेयुर्द्विजानामेव कर्मभिः ॥४६

सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सनम् ।
वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ॥४७
मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च ।
मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥४८
क्षत्त्रुग्रपुक्कसानां तु विलौको वधबन्धनम् ।
धिग्वणानां चर्मकार्यं वेणानां भाण्डवादनम् ॥४९
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च ।
वसेयुरेते विज्ञाता वर्तयन्तः स्वकर्मभिः ॥५०
चण्डालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः ।
अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभम् ॥५१
वासांसि मृतचैलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥५२
न तैः समयमन्विच्छेत्पुरुषो धर्ममाचरन् ।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥५३
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥५४
दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः ।
अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ॥५५
बध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ।
बध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥५६
वर्णापेतमविज्ञातं नरं कलुषयोनिजम् ।
आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् ॥५७

अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥५८

पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा।
न कथञ्चन दुर्योनिः प्रकृतिं स्वां नियच्छति ॥५९

कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसङ्करः।
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥६०

यत्र त्वेते परिध्वंसाज्जायन्ते वर्णदूषकाः।
राष्ट्रीयैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥६१

ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः।
स्त्रीबाला(भ्यव)भ्युपपत्तौ च बाह्यानां सिद्धिकारणम् ॥६२

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥६३

शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायते।
अश्रेयान् श्रेयसीं जातिं गच्छत्या सप्तमाद्युगात् ॥६४

शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्।
क्षत्रियाज्जातमेवं तु विद्याद्वैश्यात्तथैव च ॥६५

अनार्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया।
ब्राह्मण्यामप्यनार्यात्तु श्रेयस्त्वं क्वेति (कस्य) चेद्भवेत् ॥६६

जातो नार्यामनार्यायामार्यादार्यो भवेद्गुणैः।
जातोऽप्यनार्यादार्यायामनार्य इति निश्चयः ॥६७

तावुभावप्यसंस्कार्याविति धर्मो व्यवस्थितः।
वैगुण्याज्जन्मतः पूर्व उत्तरः प्रतिलोमतः ॥६८

सुबीजं चैव सुक्षेत्रे जातं सम्पद्यते यथा ।
तथाऽऽर्याज्जात आर्यायां सर्वं संस्कारमर्हति ॥६९

बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः ।
बीजक्षेत्रे तथैवान्ये तत्रेयं तु व्यवस्थितिः ॥७०

अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति ।
अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥७१

यस्माद्बीजप्रभावेण तिर्यग्जा ऋषयोऽभवन् ।
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं (विशिष्यते) प्रशस्यते ॥७२

अनार्यमार्यकर्माणमार्यं चानार्यकर्मिणम् ।
सम्प्रधार्याब्रवीद्धाता न समौ नासमाविति ॥७३

ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट्कर्माणि यथाक्रमम् ॥७४

अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥७५

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥७६

त्रयो धर्मा निवर्तन्ते ब्राह्मणात्क्षत्त्रियं प्रति ।
अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ॥७७

वैश्यं प्रति तथैवैते निवर्तेरन्निति स्थितिः ।
न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः ॥७८

शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषिर्विशः ।
आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः ॥७९

वेदाभ्यासो ब्राह्मणस्य क्षत्त्रियस्य च रक्षणम्।
वार्ताकर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ॥८०

अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा।
जीवेत्क्षत्त्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥८१

उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत्।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ॥८२

वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्त्रियोऽपि वा।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥८३

कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥८४

इदं तु वृत्तिवैकल्यात्त्यजतो धर्मनैपुणम्।
विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्धनम् ॥८५

सर्वान् रसानपोहेत कृतान्नं च तिलैः सह।
अश्मनो लवणं चैव पशवो ये च मानुषाः ॥८६

सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च।
अपि चेत्स्युररक्तानि फलमूले तथौषधीः ॥८७

अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥८८

आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च।
मद्यं नीलीं च लाक्षां च सर्वांश्चैकशफांस्तथा ॥८९

काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः।
विक्रीणीत तिलान् शुद्धान्धर्मार्थमचिरस्थितान् ॥९०

भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः ।
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥९१
सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥९२
इतरेषां तु पण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥९३
रसा रसैर्निमातव्या न त्वेव लवणं रसैः ।
कृतान्नं चाकृतान्नेन (कृतान्नेन) तिला धान्येन तत्समाः ॥९४
जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः ।
न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् ॥९५
यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः ।
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥९६
वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्मेण जीवन्हि सद्यः पतति जातितः ॥९७
वैश्योऽजीवन्स्वधर्मेण शूद्रवृत्त्याऽपि वर्तयेत् ।
अनाचरन्नकार्याणि निवर्तेत च शक्तिमान् ॥९८
अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम् ।
पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः ॥९९
यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कारुककर्माणि शिल्पानि विविधानि च ॥१००
वैश्यवृत्तिमनातिष्ठन्ब्राह्मणः स्वे पथि स्थितः ।
अवृत्तिकर्षितः सीदन्निमं धर्मं समाचरेत् ॥१०१

सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः।
पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते ॥१०२

नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात्।
दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते ॥१०३

जीवितात्ययमापन्नो योऽन्नमत्ति यत (तत) स्ततः।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥१०४

अजीगर्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् ॥१०५

श्वमांसमिच्छन्नार्त्तोऽत्तुं धर्माधर्मविचक्षणः।
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ॥१०६

भरद्वाजः क्षुधार्तस्तु सपुत्रो विजने वने।
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः ॥१०७

क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम्।
चण्डालहस्तादादाय धर्माधर्मविचक्षणः ॥१०८

प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि।
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥१०९

याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम्।
प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ॥११०

जपहोमैरपैत्येनो याजनाध्यापनैः कृतम्।
प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च ॥१११

शिलोञ्छमप्याददीत विप्रोऽजीवन्यतस्ततः।
प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ॥११२

सीदद्भिः कुप्यमिच्छद्भिर्धनं वा पृथिवीपतिः ।
याच्यः स्यात्स्नातकैर्विप्रैरदित्संस्त्यागमर्हति ॥११३

अकृतं च कृतात्क्षेत्राद्गौरजाविकमेव च ।
हिरण्यं धान्यमन्नं च पूर्वं पूर्वमदोषवत् ॥११४

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥११५

विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः ।
धृतिर्भैक्षं कुसीदं च दश जीवनहेतवः ॥११६

ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत् ।
कामं तु खलु धर्मार्थं दद्यात्पापीयसेऽल्पिकाम् ॥११७

चतुर्थमाददानोऽपि क्षत्रियो भागमापदि ।
प्रजा रक्षन्परं शक्त्या किल्बिषात्प्रतिमुच्यते ॥११८

स्वधर्मो विजयस्तस्य नाहवे स्यात्पराङ्मुखः ।
शस्त्रेण वैश्याद्रक्षित्वा धर्म्यमाहारयेद्बलिम् ॥११९

धान्येऽष्टमं विंशं शुल्कं विंशं कार्षापणावरम् ।
कर्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा ॥१२०

शूद्रस्तु वृत्तिमाकाङ्क्षन्क्षत्रमाराधयेदिति ।
धनिनं वाऽप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् ॥१२१

स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः ।
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता ॥१२२

विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते ।
यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम् ॥१२३

प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः ।
शक्तिं चावेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहम् ॥१२४
उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ।
पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥१२५
न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति ।
नास्याधिकारो धर्मोऽस्ति न धर्मात्प्रतिषेधनम् ॥१२६
धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्त (धर्म) मनुष्ठिताः ।
मन्त्रव (र्जं) ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥१२७
यथा यथा हि सद्वृत्तमातिष्ठत्यनसूयकः ।
तथा तथेमं चामुं च लोकं प्राप्नोत्यनिन्दितः ॥१२८
शक्तेनापि हि शूद्रेण न कार्यो धनसंचयः ।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ॥१२९
एते चतुर्णां वर्णानामापद्धर्माः प्रकीर्तिताः ।
यान्सम्यगनुतिष्ठन्तो व्रजन्ति परमां गतिम् ॥१३०
एष धर्मविधिः कृत्स्नश्चातुर्वर्ण्यस्य कीर्तितः ।
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् ॥१३१

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां
दशमोऽध्यायः ॥१०॥

—o❀o—

## एकादशोऽध्यायः ।

### अथ धर्मप्रतिरूपकवर्णनम् ।

सान्तानिकं यक्ष्यमाणमध्वगं सार्ववेदसम् ।
गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः ॥१
न वै तान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान् ।
निःस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः ॥२
एतेभ्यो हि द्विजाग्र्येभ्यो देयमन्नं सदक्षिणम् ।
इतरेभ्यो वहिर्वेदि कृतान्नं देयमुच्यते ॥३
सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत् ।
ब्राह्मणान्वेदविदुषो यज्ञार्थं चैव दक्षिणाम् ॥४
कृतदारोऽपरान्दारान्भिक्षित्वा योऽधिगच्छति ।
रतिमात्रं फलं तस्य द्रव्यदातुस्तु सन्ततिः ॥५
धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत् ।
वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते ॥६
यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये ।
अधिकं वाऽपि विद्येत स सोमं पातुमर्हति ॥७
अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः ।
स पीतसोमपूर्वोऽपि न तस्याप्नोति तत्फलम् ॥८
शक्तः परजने दाता स्वजने दुःखजीविनि ।
मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ॥९

भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदेहिकम्।
तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च ॥१०
यज्ञश्चेत्प्रतिरुद्धः स्यादेकेनाङ्गेन यज्वनः।
ब्राह्मणस्य विशेषेण धार्मिके सति राजनि ॥११
यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः।
कुटुम्बात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ॥१२
आहरेत्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः।
न हि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः ॥१३
योऽनाहिताग्निः शतगुरयज्वा (यज्ञः) च सहस्रगुः।
तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् ॥१४
आदाननित्याच्चादातुराहरेदप्रयच्छतः।
तथा यशोऽस्य प्रथते धर्मश्चैव प्रवर्धते ॥१५
तथैव सप्तमे भक्ते भक्तानि षडनश्नता।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥१६
खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते।
आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति ॥१७
ब्राह्मणस्वं न हर्तव्यं क्षत्रियेण कदाचन।
दस्युनिष्क्रिययोस्तु स्वमजीवन्हर्तुमर्हति ॥१८
योऽसाधुभ्योऽर्थमादाय साधुभ्यः संप्रयच्छति।
स कृत्वा प्लवमात्मानं संतारयति तावुभौ ॥१९
यद्धनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः।
अयज्वनां तु यद्वित्तमासुरस्वं तदुच्यते ॥२०

न तस्मिन्धारयेद्दण्डं धार्मिकः पृथिवीपतिः ।
क्षत्रियस्य हि बालिश्याद्ब्राह्मणः सीदति क्षुधा ॥२१

तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः ।
श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत् ॥२२

कल्पयित्वाऽस्य वृत्तिं च रक्षेदेनं समन्ततः ।
राजा हि धर्मषड्भागं तस्मात्प्राप्नोति रक्षितात् ॥२३

न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत कर्हिचित् ।
यजमानो हि भिक्षित्वा चण्डालः प्रेत्य जायते ॥२४

यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति ।
स याति भासतां विप्रः काकतां वा शतं समाः ॥२५

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः ।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥२६

इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये ।
क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे ॥२७

आपत्कल्पेन यो धर्मं कुरुतेऽनापदि द्विजः ।
स नाप्नोति फलं तस्य परत्रेति विचारितम् ॥२८

विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः ।
आपत्सु मरणाद्भीतैर्विधेः प्रतिनिधिः कृतः ॥२९

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम् ॥३०

न ब्राह्मणो वेदयेत किञ्चिद्राजनि धर्मवित् ।
स्ववीर्येणैव ताञ्छिष्यान्मानवानपकारिणः ॥३१

स्ववीर्याद्राजवीर्याच्च स्ववीर्यं बलवत्तरम् ।
तस्मात्स्वेनैव वीर्येण निगृह्णीयादरीन्द्विजः ॥३२
श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यविचारयन् ।
वाक्शस्त्रं वै ब्राह्मणस्य तेन हन्यादरीन्द्विजः ॥३३
क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः ।
धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ॥३४
विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते ।
तस्मै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ॥३५
न वै कन्या न युवतीर्नाल्पविद्यो न बालिशः ।
होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा ॥३६
नरके हि पतन्त्येते जुह्वन्तः स च यस्य तत् ।
तस्माद्वैतानकुशलो होता स्याद्वेदपारगः ॥३७
प्राजापत्यमदत्त्वाऽश्वमग्न्याधेयस्य दक्षिणाम् ।
अनाहिताग्निर्भवति ब्राह्मणो विभवे सति ॥३८
पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः ।
न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथंचन ॥३९
इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून् ।
हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत् ॥४०
अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः ।
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् ॥४१
ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ।
ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः ॥४२

तेषां सततमज्ञानां वृषलाग्न्युपसेविनाम्।
पदा मस्तकमाक्रम्य दाता दुर्गाणि सन्तरेत्॥४३
अकुर्वन्विहितं कर्म निन्दितं च समाचरन्।
प्रस (ज्जन्नि) क्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः॥४४
अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्॥४५
अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति।
कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः॥४६
प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा।
नं संसर्गं व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः॥४७
इह दुश्चरितैः केचित्केचित्पूर्वकृतै (कृतः) स्तथा।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम्॥४८
सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम्।
ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः॥४९
पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम्।
धान्यचौरोऽङ्गहीनत्वमातिरैक्यं तु मिश्रकः॥५०
अन्नहर्तामयावित्वं मौक्यं वागपहारकः।
वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः॥५१
दीपहर्ता भवेदन्धः काणो निर्वापको भवेत्।
हिंसया व्याधिभूयस्त्वं स्फीतोऽन्यस्त्र्यभिमर्षकः॥५२
एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः।
जडमूकान्धबधिरा विकृताकृतयस्तथा॥५३

चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये।
निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः ॥५४
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥५५
अनृतं च समुत्कर्षे राजगामि च पैशुनम्।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥५६
ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः।
गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट् ॥५७
निक्षेपस्यापहरणं नराश्वरजतस्य च।
भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतम् ॥५८
रेतः सेकः स्वयोनीषु कुमारीष्वन्त्यजासु च।
सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः ॥५९
गोवधोऽयाज्यसंयाज्यं पारदार्यात्मविक्रयाः।
गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च ॥६०
परिवित्तितानुजेऽनूढे परिवेदनमेव च।
तयोर्दानं च कन्यायास्तयोरेव च याजनम् ॥६१
कन्याया दूषणं चैव वार्धुष्यं व्रतलोपनम्।
तडागारामदाराणामपत्यस्य च विक्रयः ॥६२
व्रात्यता बान्धवत्यागो भृत्याध्यापनमेव च।
भृताच्चाध्ययनादानमपण्यानां च विक्रयः ॥६३
सर्वाकरेष्वधीकारो महायन्त्रप्रवर्तनम्।
हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म च ॥६४

इन्धनार्थमशुष्काणां द्रुमाणामवपातनम्।
आत्मार्थं च क्रियारम्भो निन्दितान्नादनं तथा ॥६५
अनाहिताग्निता स्तेयमृणानामनपक्रिया।
असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया ॥६६
धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम्।
स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकम् ॥६७
ब्राह्मणस्य रुजः कृत्यं घ्रातिरघ्रेयमद्ययोः।
जैह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम् ॥६८
खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा
सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च ॥६९
निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्।
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ॥७०
कृमिकीटवयोहत्या मद्य (अनुगत) संसृष्टभोजनम्।
फलैधः कुसुमस्तेयमधैर्यं च मलावहम् ॥७१
एतान्येनांसि सर्वाणि यथोक्तानि पृथक् पृथक्।
यैर्यैर्व्रतैरपोह्यन्ते तानि सम्यङ्निबोधत ॥७२
ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत्।
भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् ॥७३
लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः।
प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः ॥७४
यजेत वाऽश्वमेधेन स्वर्जिता गोसवेन वा।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुताऽपि वा ॥७५

जपन्वान्यतमं वेदं योजनानां शतं व्रजेत्।
ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः ॥७६
सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत्।
धनं वा जीवनायालं गृहं वासःपरिच्छदम् ॥७७
हविष्यभुग्वाऽनुसरेत्प्रतिस्रोतः सरस्वतीम्।
जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम् ॥७८
कृतवापनो निवसेद्ग्रामान्ते गोव्रजेऽपि वा।
आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः ॥७६
ब्राह्मणार्थे गवार्थे वा सद्यः (सम्यक्) प्राणान्परित्यजेत्।
मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च ॥८०
त्र्यवरं प्रतिरोद्धा वा सर्वस्वमवजित्य वा।
विप्रस्य तन्निमित्ते वा प्राणालाभेऽपिमुच्यते ॥८१
एवं दृढव्रतो नित्यं ब्रह्मचारी समाहितः।
समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति ॥८२
शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे।
स्वमेनोऽवभृथस्नातो हयमेधे विमुच्यते ॥८३
धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते।
तस्मात्समागमे तेषामेनो विख्याप्य शुध्यति ॥८४
ब्राह्मणः सम्भवेनैव देवानामपि दैवतम्।
प्रमाणं चैव लोकस्य ब्रह्मात्रैव हि कारणम् ॥८५
तेषां वेदविदो ब्रूयुस्त्रयोऽप्येनः सुनिष्कृतिम।
सा तेषां पावनाय स्यात्पवित्रं विदुषां हि वाक् ॥८६

अतोऽन्यतममास्थाय विधिं विप्रः समाहितः ।
ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया ॥८७
हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् ।
राजन्यवैश्यौ चैजानावात्रेयीमेव च स्त्रियम् ॥८८
उक्त्वा चैवानृतं साक्ष्ये प्रतिरुद्ध्य (रभ्य) गुरुं तथा ।
अपहृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधम् ॥८९
इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥९०
सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् ।
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः ॥९१
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा ।
पयो घृतं वाऽऽमरणाद्गोशकृद्रसमेव वा ॥९२
कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ।
सुरापानापनुत्यर्थं बालवासा जटी ध्वजी ॥९३
सुरां वै मलमन्नानां पाप्मा च मलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥९४
गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।
यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ॥९५
यक्षरक्षः पिशाचान्नं मद्यं मांसं सुरासवम् ।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः ॥९६
अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेद् ।
अकार्यमन्यत्कुर्याद्वा ब्राह्मणो मदमोहतः ॥९७

यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत्।
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति ॥९८

एषा विचित्राऽभिहिता सुरापानस्य निष्कृतिः।
अत ऊर्ध्वं प्रवक्ष्यामि सुवर्णस्तेयनिष्कृतिम् ॥९९

सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु।
स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति ॥१००

गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम्।
वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव तु ॥१०१

तपसाऽपनुनुत्सुस्तु सुवर्णस्तेयजं मलम्।
चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम् ॥१०२

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः।
गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत् ॥१०३

गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये।
सूर्मी ज्वलन्तीं वाश्लिष्येन्मृत्युना स विशुद्ध्यति ॥१०४

स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ।
नैर्ऋतीं दिशमातिष्ठेदानिपातादजिह्मगः ॥१०५

खट्वाङ्गी चीरवासा वा श्मश्रुलो विजने वने।
प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः ॥१०६

चान्द्रायणं वा त्रीन्मासानभ्यस्येन्नियतेन्द्रियः।
हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये ॥१०७

एतैर्व्रतैरपोहेयुर्महापातकिनो मलम्।
उपपातकिनस्त्वेवमेभिर्नानाविधैर्व्रतैः ॥१०८

उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत्।
कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः ॥१०६
चतुर्थकालमश्नीयादक्षारलवणं मितम्।
गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः ॥११०
दिवानुगच्छेद्गास्तास्तु तिष्ठन्नूर्ध्वं रजः पिबेत्।
शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनो वसेत् ॥१११
तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्।
आसीनासु तथासीनो नियतो वीतमत्सरः ॥११२
आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः।
पतितां पङ्कलग्नां वा सर्वोपायै(सर्वप्राणै)र्विमोचयेत् ॥११३
उष्णे वर्षति शीते वा मारुते वापि (वाति) वा भृशम्।
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ॥११४
आत्मनो यदि वाऽन्येषां गृहे क्षेत्रेऽथवा खले।
भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकम् ॥११५
अनेन विधिना यस्तु गोघ्नो गामनुगच्छति।
स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति ॥११६
वृषभैकादशा गाश्च दद्यात्सुचरितव्रत।
अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् ॥११७
एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः।
अवकीर्णिव(र्ज)र्ज्यं शुद्ध्यर्थं चान्द्रायणमथापि वा ॥११८
अवकीर्णी तु काणेन गर्दभेन चतुष्पथे।
पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ॥११९

हुत्वाऽग्नौ विधिवद्धोमानन्ततश्च समेत्यृचा ।
वातेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाऽऽहुतीः ॥१२०

कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः ।
अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः ॥१२१

मारुतं पुरुहूतं च गुरुं पावकमेव च ।
चतुरो व्रतिनोऽभ्येति ब्राह्मं तेजोऽवकीर्णिनः ॥१२२

एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनम् ।
सप्तागारांश्चरेद्भैक्षं स्वकर्म परिकीर्तयन् ॥१२३

तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकम् ।
उपस्पृशंस्त्रिषवणं त्वब्देन स विशुद्ध्यति ॥१२४

जातिभ्रंशकरं कर्म कृत्वाऽन्यतममिच्छया ।
चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया ॥१२५

सङ्करापात्रकृत्यासु मासं शोधनमैन्दवः ।
मलिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहम् ॥१२६

तुरीयो ब्रह्महत्यायाः क्षत्रियस्य बधे स्मृतः ।
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः ॥१२७

अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः ।
वृषभैकसहस्रा गा दद्यात्सुचरितव्रतः ॥१२८

त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम् ।
वसन्दूरतरे ग्रामाद्वृक्षमूलनिकेतनः ॥१२९

एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः ।
प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकशतं गवाम् ॥१३०

एतदेव व्रतं कृत्स्नं षण्मासान्शूद्रहा चरेत् ।
वृषभैकादशा वापि दद्याद्विप्राय गाः सिताः ॥१३१

मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च ।
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् ॥१३२

पयः पिबेत्त्रिरात्रं वा योजनं वाऽध्वनो व्रजेत् ।
उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाऽब्दैवतं जपेत् ॥१३३

अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः ।
पलालभारकं षण्ढे सैसकं चैकमाषकम् ॥१३४

घृतकुम्भं वराहे तु तिलद्रोणं तु तित्तिरौ ।
शुके द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम् ॥१३५

हत्वा हंसं बलाकां च बकं बर्हिणमेव च ।
वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गाम् ॥१३६

वासो दद्याद्धयं हत्वा पंच नीलान्वृषान्गजम् ।
अजमेषावनड्वाहं खरं हत्वैकहायनम् ॥१३७

क्रव्यादांस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीम् ।
अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलम् ॥१३८

जीनकार्मुकबस्तावीन्पृथग्दद्याद्विशुद्धये ।
चतुर्णामपि वर्णानां नारीर्हत्वाऽनवस्थिताः ॥१३९

दानेन वधनिर्णेकं सर्पादीनामशक्नुवन् ।
एकैकशश्चरेत्कृच्छ्रं द्विजः पापापनुत्तये ॥१४०

अस्थिमतां तु सत्वानां सहस्रस्य प्रमापणे ।
पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत् ॥१४१

किंचिदेव तु विप्राय दद्यादस्थिमतां वधे ।
अनस्थ्नां चैव हिंसायां प्राणायामेन शुद्ध्यति ॥१४२

फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम् ।
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम् ॥१४३

अन्नाद्यजानां सत्त्वानां रसजानां च सर्वशः ।
फलपुष्पोद्भवानां च घृतप्राशो विशोधनम् ॥१४४

कृष्टजानामोषधीनां जातानां च स्वयं वने ।
वृथालम्भेऽनुगच्छेद्गां दिनमेकं पयोव्रतः ॥१४५

एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम् ।
ज्ञानाज्ञानकृतं कृत्स्नं शृणुतानाद्यभक्षणे ॥१४६

अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुद्ध्यति ।
मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ॥१४७

अपः सुराभाजनस्था मद्यभाण्डस्थितास्तथा ।
पञ्चरात्रं पिबेत्पीत्वा शङ्खपुष्पीशृतं पयः ॥१४८

स्पृष्ट्वा दत्त्वा च मदिरां विधिवत्प्रतिगृह्य च ।
शूद्रोच्छिष्टाश्च पीत्वाऽऽपः कुशवारि पिबेत्त्र्यहम् ॥१४९

ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमपः ।
प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यति ॥१५०

अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥१५१

वपनं मेखलादण्डो भैक्ष्यचर्या व्रतानि च ।
निवर्तन्ते द्विजातीनां पुनः संस्कारकर्मणि ॥१५२

अभोज्यानां तु भुक्त्वाऽन्नं स्त्रीशूद्रोच्छिष्टमेव च ।
जग्ध्वा मांसमभक्ष्यञ्च सप्तरात्रं यवान्पिबेत् ॥१५३

शुक्तानि च कषायांश्च पीत्वा मेध्यान्यपि द्विजः ।
तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः ॥१५४

विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः ।
प्राश्य मूत्रपुरीषाणि द्विजश्चांद्रायणं चरेत् ॥१५५

शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च ।
अज्ञातं चैव सूनास्थमेतदेव व्रतं चरेत् ॥१५६

क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्षणे ।
नरकाकखराणां च तप्तकृच्छ्रं विशोधनम् ॥१५७

मासिकान्नं तु योऽश्नीयादसमावर्तको द्विजः ।
स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत् ॥१५८

ब्रह्म (व्रत) चारी तु योऽश्नीयान्मधु मांसं कथंचन ।
स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् ॥१५९

विडालकाकाखूच्छिष्टं जग्ध्वाश्वनकुलस्य च ।
केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलाम् ॥१६०

अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता ।
अज्ञानभुक्तं तूत्तार्यं शोध्यं वाप्याशु शोधनैः ॥१६१

एषोऽनाद्यादनस्योक्तो व्रतानां विविधो विधिः ।
स्तेयदोषापहर्तॄणां व्रतानां श्रूयतां विधिः ॥१६२

धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः ।
सजातीयगृहादेव कृच्छ्राब्देन विशुध्यति ॥१६३

मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च।
कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतम् ॥१६४

द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मनि।
चरेत्सान्तपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये ॥१६५

भक्ष्यभोज्यापहरणे यानशय्यासनस्य च।
पुष्पमूलफलानां च पञ्चगव्यं विशोधनम् ॥१६६

तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च।
चेलचर्मामिषाणां च त्रिरात्रं स्यादभोजनम् ॥१६७

मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च।
अयः कांस्योपलानां च द्वादशाहं कणान्नता ॥१६८

कार्पासकीटजोर्णानां द्विशफैक(खुरस्य) शफस्य च।
पक्षिगन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः ॥१६९

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः।
अगम्यागमनीयं तु व्रतैरेभिरपानुदेत् ॥१७०

गुरुतल्पव्रतं कुर्याद्रेतः सिक्त्वा स्वयोनिषु।
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च ॥१७१

पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च।
मातुश्च भ्रातु(स्तनयां) राप्तस्य गत्वा चान्द्रायणं चरेत् ॥१७२

एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान्।
ज्ञातित्वेनानुपेयास्ताः पतति ह्युपयन्नधः ॥१७३

अमानुषीषु पुरुष उदक्यायामयोनिषु।
रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत् ॥१७४

मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः ।
गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् ॥१७५
चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥१७६
विप्रदुष्टां स्त्रियं भर्त्ता निरुन्ध्यादेकवेश्मनि ।
यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम् ॥१७७
सा चेत्पुनः प्रदुष्येत्तु सदृशेनोपमन्त्रिता ।
कृच्छ्रं चान्द्रायणं चैव तदस्याः पावनं स्मृतम् ॥१७८
यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः ।
तद्भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥१७९
एषा पापकृतामुक्ता चतुर्णामपि निष्कृतिः ।
पतितैः सम्प्रयुक्तानामिमाः शृणुत निष्कृतीः ॥१८०
संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात् ॥१८१
यो येन पतितेनैषां संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये ॥१८२
पतितस्योदकं कार्यं सपिण्डैर्बान्धवैर्बहिः ।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ ॥१८३
दासी घटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा ।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥१८४
निवर्तेरंश्च तस्मात्तु सम्भाषण सहासने ।
दायाद्यस्य प्रदानं च यात्रा चैव हि लौकिकी ॥१८५

ज्येष्ठता च निवर्तेत ज्येष्ठावाप्यं च यद्धनं।
ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान्गुणतोऽधिकः ॥१८६

प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवं।
तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये ॥१८७

स त्वप्सु तं घटं प्रास्य प्रविश्य भवनं स्वकं।
सर्वाणि ज्ञातिकार्याणि यथापूर्वं समाचरेत् ॥१८८

एतदेव विधिं कुर्याद्योषित्सु पतितास्वपि।
वस्त्रान्नपानं देयं तु वसेयुश्च गृहान्तिके ॥१८९

एनस्विभिरनिर्णिक्तैर्नार्थं किञ्चित्सहाचरेत्।
कृतनिर्णेजनांश्चैतान्न जुगुप्सेत कर्हिचित् ॥१९०

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् ॥१९१

येषां द्विजानां सावित्री नानूच्येत यथाविधि।
तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ॥१९२

प्रायश्चित्तं चिकीर्षन्ति विकर्मस्थास्तु ये द्विजाः।
ब्रह्मणा च परित्यक्तास्तेषामप्येतदादिशेत् ॥१९३

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्।
तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च ॥१९४

जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः।
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥१९५

उपवासकृशं तं तु गोव्रजात्पुनरागतम्।
प्रणतं परिपृच्छेयुः साम्यं सौम्येच्छसीति किम् ॥१९६

सत्यमुक्त्वा तु विप्रेषु विकिरेद्यवसं गवाम्।
गोभिः प्रवर्तिते तीर्थे कुर्युस्तस्य परिग्रहम् ॥१९७

व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च।
अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति ॥१९८

शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः।
संवत्सरं यवाहारस्तत्पापमपसेधति ॥१९९

श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च।
नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति ॥२००

षष्ठान्नकालता मासं संहिताजप एव वा।
होमाश्च शाकला नित्यमपांक्त्यानां विशोधनम् ॥२०१

उष्ट्रयानं समारुह्य खरयानं तु कामतः।
स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति ॥२०२

विनाऽद्भिरप्सु वाऽप्यार्त्तः शारीरं सन्निषेव्य च।
सचैलो वहिराप्लुत्य गामालभ्य विशुद्धति ॥२०३

वेदोदितानां नित्यानां कर्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥२०४

हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः।
स्नात्वाऽनश्नन्नहः शेषमभिवाद्य प्रसादयेत् ॥२०५

ताडयित्वा तृणेनापि कण्ठे वाबध्य वाससा।
विवादे वा विनिर्जित्य प्रणिपत्य प्रसादयेत् ॥२०६

अवगूर्य त्वब्दशतं सहस्रमभिहत्य च।
जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥२०७

शोणितं यावतः पांसून्संगृह्णाति महीतले ।
तावन्त्यब्दसहस्राणि तत्कर्ता नरकं (व्रजेत्) वसेत् ॥२०८

अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने ।
कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितम् ॥२०९

अनुक्तनिष्कृतीनां तु पापानामपनुत्तये ।
शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् ॥२१०

यैरभ्युपायैरेनांसि मानवो व्यपकर्षति ।
तान्वोऽभ्युपायान्वक्ष्यामि देवर्षिपितृसेवितान् ॥२११

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः ॥२१२

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥२१३

एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः ॥२१४

तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान् ।
प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः ॥२१५

यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः ॥२१६

एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥२१७

एतमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ।
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम् ॥२१८

अष्टावष्टौ समश्नीयात्पिण्डान्मध्यन्दिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥२१९

चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम् ॥२२०

यथाकथंचित्पिण्डानां तिस्रोऽशीतीः समाहितः ।
मासेनाश्नन्हविष्यस्य चन्द्रस्यैति सलोकताम् ॥२२१

एतद्रुद्रास्तथादित्या वसवश्चाचरन्व्रतम् ।
सर्वाकुशलमोक्षाय मरुतश्च महर्षिभिः ॥२२२

महाव्याहृतिभिर्होमः कर्तव्यः स्वयमन्वहम् ।
अहिंसा सत्यमक्रोधमार्जवं च समाचरेत् ॥२२३

त्रिरह्नस्त्रिर्निशायां च सवासा जलमाविशेत् ।
स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित् ॥२२४

स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत वा ।
ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः ॥२२५

सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः ।
सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृतः ॥२२६

एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः ।
अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत् ॥२२७

ख्यापनेनानुतापेन तपसाऽध्ययनेन च ।
पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥२२८

यथा यथा नरोऽधर्मं स्वयं कृत्वाऽनुभाषते ।
तथा तथा त्वचेवाहिस्तेनाधर्मेण मुच्यते ॥२२९

यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति।
तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते ॥२३०

कृत्वा पापं हि सन्तप्य तस्मात्पापात्प्रमुच्यते।
नैवं कुर्यां पुनरिति निवृत्या पूयते तु सः ॥२३१

एवं संचिन्त्य मनसा प्रेत्य कर्मफलोदयम्।
मनोवाङ्मूर्त्तिभिर्नित्यं शुभं कर्म समाचरेत् ॥२३२

अज्ञानाद्यदि वा ज्ञानात्कृत्वा कर्म विगर्हितम्।
तस्माद्विमुक्तिमन्विच्छन्द्वितीयं न समाचरेत् ॥२३३

यस्मिन्कर्मण्यस्य कृते मनसः स्यादलाघवम्।
तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिकरं भवेत् ॥२३४

तपोमूलमिदं सर्वं दैवमानुषकं सुखम्।
तपोमध्यं बुधैः प्रोक्तं तपोऽन्तं वेददर्शिभिः ॥२३५

ब्राह्मणस्य तपो ज्ञानं तपः क्षत्त्रस्य रक्षणम्।
वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम् ॥२३६

ऋषयः संयतात्मानः फलमूलानिलाशनाः।
तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम् ॥२३७

औषधान्यगदो (गदा) विद्या दैवी च विविधा स्थितिः।
तपसैव प्रसिद्ध्यन्ति तपस्तेषां हि साधनम् ॥२३८

यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम्।
सर्वं तत् तपसा साध्यं तपो हि दुरतिक्रमम् ॥२३९

महापातकिनश्चैव शेषाश्चा कार्यकारिणः।
तपसैव सुतप्तेन मुच्यन्ते किल्विषात्ततः ॥२४०

कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च ।
स्थावराणि च भूतानि दिवं यान्ति तपोबलात् ।।२४१

यत्किञ्चिदेनः कुर्वन्ति मनोवाङ्मूर्ति (कर्म) भिर्जनाः ।
तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः ।।२४२

तपसैव विशुद्धस्य ब्राह्मणस्य दिवौकसः ।
इज्याश्च प्रतिगृह्णन्ति कामान्संवर्धयन्ति च ।।२४३

प्रजापतिरिदं शास्त्रं तपसैवासृजत्प्रभुः ।
तथैव वेदानृषयस्तपसा प्रतिपेदिरे ।।२४४

इत्ये (यदे) तत्तपसो देवा महाभाग्यं प्रचक्षते ।
सर्वस्यास्य प्रपश्यन्तस्तपसः पुण्य (मुद्भवम्) मुत्तमम् ।।२४५

वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमा ।
नाशयन्त्याशु पापानि महापातकजान्यपि ।।२४६

यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात् ।
तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित् ।।२४७

इत्येतदेनसामुक्तं प्रायश्चित्तं यथाविधि ।
अत ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत ।।२४८

सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश ।
अपि भ्रूणहणं मासात्पुनन्त्यहरहः कृताः ।।२४९

कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च प्रतीत्यृचम् ।
माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुध्यति ।।२५०

सकृज्जप्त्वाऽस्य वामीयं शिवसङ्कल्पमेव च ।
अपहृत्य सुवर्णं तु क्षणाद्भवति निर्मलः ।।२५१

हवीष्यान्तीयमभ्यस्य न तमं ह इतीति च।
जपित्वा पौरुषं सूक्तं मुच्यते गुरुतल्पगः ॥२५२

एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम्।
अवेत्यृचं जपेदब्दं यत्किञ्चेदमितीति वा ॥२५३

प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम्।
जपंस्तरत्समन्दीयं पूयते मानवस्त्र्यहात् ॥२५४

सोमारौद्रं तु बह्वेनाः समामभ्यस्य शुध्यति।
स्रवन्त्यामाचरन्स्नानमर्यम्णामिति च तृचम् ॥२५५

अब्दार्धमिन्द्रमित्येतदेनस्वी सप्तकं जपेत्।
अप्रशस्तं तु कृत्वाऽप्सु मासमासीत भैक्षभुक् ॥२५६

मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः।
सुगुर्वप्यपहन्त्येनो जप्त्वा वा नम इत्यृचम् ॥२५७

महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः।
अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुध्यति ॥२५८

अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम्।
मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिः ॥२५९

त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः।
मुच्यते पातकैः सर्वैस्त्रिर्जपित्वाऽघमर्षणम् ॥२६०

यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः।
तथाऽघमर्षणं सूक्तं सर्वपापापनोदनम् ॥२६१

हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः।
ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किञ्चन ॥२६२

ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः ।
साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते ॥२६३

यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति ।
तथा दुश्चरितं सर्वं वेदे त्रिवृति मज्जति ॥२६४

ऋचो यजूंषि चान्यानि सामानि विविधानि च ।
एष ज्ञेयस्त्रिवृद्वेदो यो वेदैनं स वेदवित् ॥२६५

आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता ।
स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥२६६

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां
मनुस्मृत्यामेकादशोऽध्यायः ॥ ११

—:०:—

## द्वादशोऽध्यायः

### अथेदानीं कर्मणांशुभाशुभफलवर्णनम् ।

चातुर्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयाऽनघ ।
कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वतः पराम् ॥१

स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः ।
अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम् ॥२

शुभाशुभफलं कर्म मनोवाग्देहसम्भवम् ।
कर्मजा गतयो नृणामुत्तमाधममध्यमाः ॥३
तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः ।
दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकम् ॥४
परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥५
पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ।
असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥६
अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥७
मानसं मनसैवायमुपभुंक्ते शुभाशुभम् ।
वाचा वाचा कृतं कर्म कायेनैव च कायिकम् ॥८
शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥९
वाग्दंडोऽथ मनोदण्डः कायदण्डस्तथैव च ।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ॥१०
त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः ।
कामक्रोधौ सुसंयम्य ततः सिद्धिं निगच्छति ॥११
योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ।
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥१२
जीवसंज्ञोऽन्तरात्माऽन्यः सहजः सर्वदेहिनां ।
येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥१३

तावुभौ भूतसंपृक्तौ महान्क्षेत्रज्ञ एव च ।
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥१४
असंख्या मूर्त्तयस्तस्य निष्पतन्ति शरीरतः ।
उच्चावचानि भूतानि सततं चेष्टयन्ति याः ॥१५
पञ्चभ्य एव भूतेभ्यः (मात्राभ्यः) प्रेत्य दुष्कृतिनां नृणाम् ।
शरीरं यातनार्थीयमन्यदुत्पद्यते ध्रुवम् ॥१६
तेनानुभूय ता यामीः शरीरेणेह यातनाः ।
तास्वेव भूतमात्रासु प्रलीयन्ते विभागशः ॥१७
सोऽनुभूयासुखोदर्कान्दोषान्विषयसङ्गजान् ।
व्यपेतकल्मषोऽभ्येति तावेवोभौ महौजसौ ॥१८
तौ धर्मं पश्यतस्तस्य पापं चातन्द्रितौ सह ।
याभ्यां प्राप्नोति संपृक्तः प्रेत्येह च सुखासुखम् ॥१९
यथाचरति धर्मं स प्रायशोऽधर्ममल्पशः ।
तैरेव चावृतो भूतैः स्वर्गे सुखमुपाश्नुते ॥२०
यदि तु प्रायशोऽधर्मं सेवते धर्ममल्पशः ।
तैर्भूतैः स परित्यक्तो यामीः प्राप्नोति यातनाः ॥२१
यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः ।
तान्येव पञ्चभूतानि पुनरप्येति भागशः ॥२२
एता दृष्ट्वाऽस्य जीवस्य गतीः स्वेनैव चेतसा ।
धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः ॥२३
सत्त्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान् ।
यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः ॥२४

यो यदैषां गुणो देहे साकल्येनातिरिच्यते ।
स तदा तद्गुणप्रायं तं करोति शरीरिणम् ॥२५

सत्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतं ।
एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः ॥२६

तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् ।
प्रशान्तमिव शुद्धाभं सत्वं तदुपधारयेत् ॥२७

यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः ।
तद्रजोप्रतिपं विद्यात्सततं हर्तृ देहिनाम् ॥२८

यत्तु स्यान्मोहसंयुक्तमव्यक्तं विषयात्मकम् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥२९

त्रयाणामपि चैतेषां गुणानां यः फलोदयः ।
अग्र्यो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ॥३०

वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः ।
धर्मक्रियाऽऽत्मचिन्ता च सात्त्विकं गुणलक्षणम् ॥३१

आरम्भरुचिताऽधैर्यमसत्कार्यपरिग्रहः ।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥३२

लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥३३

त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम् ।
इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ॥३४

यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति ।
तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ॥३५

येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलाम् ।
न च शोचत्यसम्पत्तौ तद्विज्ञेयं तु राजसम् ॥३६
यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन् ।
येन तुष्यति चात्माऽस्य तत्सत्त्वगुणलक्षणम् ॥३७
तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते ।
सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरम् ॥३८
येन यांस्तु गुणेनैषां संसारान्प्रतिपद्यते ।
तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् ॥३९
देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः ।
तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥४०
त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः ।
अधमा मध्यमाग्र्या च कर्मविद्याविशेषतः ॥४१
स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः ।
पशवश्च मृगाश्चैव जघन्या तामसी गतिः ॥४२
हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः ।
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः ॥४३
चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः ।
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः ॥४४
झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः ।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥४५
राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः ।
वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥४६

गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये।
तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः ॥४७

तापसा यतयो विप्रा ये च वैमानिका गणाः।
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ॥४८

यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः।
पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ॥४९

ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च।
उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥५०

एष सर्वः समुद्दिष्टस्त्रिःप्रकारस्य कर्मणः।
त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ॥५१

इन्द्रियाणां प्रसङ्गेन धर्मस्यासेवनेन च।
पापान्संयान्ति संसारानविद्वांसो नराधमाः ॥५२

यां यां योनिं तु जीवोऽयं येन येनेह कर्मणा।
क्रमशो याति लोकेऽस्मिंस्तत्तत्सर्वं निबोधत ॥५३

बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात्।
संसारान्प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥५४

श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम्।
चण्डालपुक्कसानां च ब्रह्महा योनिमृच्छति ॥५५

कृमिकीटपतङ्गानां विड्भुजां चैव पक्षिणाम्।
हिंस्राणां चैव सत्त्वानां सुरापो ब्राह्मणो व्रजेत् ॥५६

लूताहिसरटानां च तिरश्चां चाम्बुचारिणाम्।
हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ॥५७

तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि ।
क्रूरकर्मकृतां चैव शतशो गुरुतल्पगः ॥५८

हिंस्रा भवन्ति क्रव्यादाः कृमयोऽमेध्यभक्षिणः ।
परस्परादिनः स्तेनाः प्रेताऽन्त्यस्त्रीनिषेविणः ॥५९

संयोगं पतितैर्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥६०

मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः ।
विविधानि च रत्नानि जायते हेमकर्तृषु ॥६१

धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः ।
मधु दंशः पयः काको रसं श्वा नकुलो घृतम् ॥६२

मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः ।
चीरीवाकस्तु लवणं बलाका शकुनिर्दधि ॥६३

कौशेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः ।
कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडम् ॥६४

छुच्छुन्दरीः शुभान्गन्धान्पत्रशाकं तु बर्हिणः ।
श्वावित्कृतान्नं विविधमकृतान्नं तु शल्यकः ॥६५

बको भवति हृत्वाऽग्निं गृहकारी ह्युपस्करम् ।
रक्तानि हृत्वा वासांसि जायते जीवजीवकः ॥६६

वृको मृगेभं व्याघ्रोऽश्वं फलमूलं तु मर्कटः ।
स्त्रीमृक्षः स्तोकको वारि यानान्युष्ट्रः पशूनजः ॥६७

यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः ।
अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ॥६८

स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः ।
एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः ॥६९

स्वेभ्यः स्वेभ्यस्तु कर्मभ्यश्च्युता वर्णा ह्यनापदि ।
पापान्संसृत्य संसारान्प्रेष्यतां यान्ति (दस्युषु) शत्रुषु ॥७०

वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युतः ।
अमेध्यकुणपाशी च क्षत्रियः कूटपूतनः ॥७१

मैत्राक्षिज्योतिकः प्रेतो वैश्यो भवति पूयभुक् ।
चैलाशकश्च भवति शूद्रो धर्मात्स्वकाच्च्युतः ॥७२

यथा यथा निषेवन्ते विषयान्विषयात्मकाः ।
तथा तथा कुशलता तेषां तेषूपजायते ॥७३

तेऽभ्यासात्कर्मणां तेषां पापानामल्पबुद्धयः ।
संप्राप्नुवन्ति दुःखानि तासु तास्विह योनिषु ॥७४

तामिस्रादिषु चोग्रेषु नरकेषु विवर्तनम् ।
असिपत्रवनादीनि बन्धनच्छेदनानि च ॥७५

विविधाश्चैव संपीडाः काकोलूकैश्च भक्षणम् ।
करम्भवालुकातापान्कुम्भीपाकांश्च दारुणान् ॥७६

संभवांश्च वियोनीषु दुःखप्रायासु नित्यशः ।
शीतातपाभिघातांश्च विविधानि भयानि च ॥७७

असकृद्गर्भवासेषु वासं जन्म च दारुणम् ।
बन्धनानि च कष्टानि परप्रेष्यत्वमेव च ॥७८

बन्धुप्रियवियोगांश्च संवासं चैव दुर्जनैः ।
द्रव्यार्जनं च नाशं च मित्रामित्रस्य चार्जनम् ॥७९

जरां चैवाप्रतीकारां व्याधिभिश्चोपपीडनम् ।
क्लेशांश्च विविधांस्तांस्तान्मृत्युमेव च दुर्जयम् ॥८०

यादृशेन तु भावेन यद्यत् कर्म निषेवते ।
तादृशेन शरीरेण तत्तत्फलमुपाश्नुते ॥८१

एष सर्वः समुद्दिष्टः कर्मणां वः फलोदयः ।
नैःश्रेयसकरं कर्म विप्रस्येदं निबोधत ॥८२

वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः ।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥८३

सर्वेषामपि चैतेषां शुभानामिह कर्मणाम् ।
किंचिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति ॥८४

सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥८५

षण्णामेषां तु पूर्वेषां कर्मणां प्रेत्य चेह च ।
श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम् ॥८६

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः ।
अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ॥८७

सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च ।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥८८

इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥८९

प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥९०

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥६१
यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥६२
एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः।
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ॥६३
पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ॥६४
या वेदवाह्याः श्रुतयो (स्मृतयो) याश्च काश्च कुदृष्टयः।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥६५
उत्पद्यन्ते विनश्यन्ति(वन्तेच)यान्यतोऽन्यानिकानिचित्।
तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ॥६६
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भवद्भविष्यं च सर्वं वेदात्प्रसिध्यति ॥६७
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पंचमः।
वेदादेव प्रसूयन्ते प्रसूतिर्गुणकर्मतः ॥६८
विभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्।
तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम् ॥६९
सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥१००
यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान्।
तथा दहति वेदज्ञः कर्मजं दोषमात्मनः ॥१०१

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते ॥१०२
अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥१०३।
तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्बिषं हन्ति विद्ययाऽमृतमश्नुते ॥१०४
प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥१०५
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥१०६
नैःश्रेयसमिदं कर्म यथोदितमशेषतः।
मानवस्यास्य शास्त्रस्य रहस्यमुपदेक्ष्यते (दिश्यते) ॥१०७
अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत्।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ॥१०८
धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥१०९
दशावरा वा परिषद्यं धर्मं परिकल्पयेत्।
त्र्यवरा वापि वृत्तस्था तं धर्मं न विचालयेत् ॥११०
त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः।
त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा ॥१११
ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ॥११२

एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः।
स विज्ञेयः परो धर्मो नाज्ञानामुदितोऽयुतैः ॥११३

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्।
सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥११४

यं वदन्ति तमोभूता मूर्खा धर्ममतद्विदः।
तत्पापं शतधा भूत्वा तद्वक्तॄननुगच्छति ॥११५

एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परम्।
अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम् ॥ ११६

एवं स भगवान्देवो लोकानां हितकाम्यया।
धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान् ॥११७

सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः।
सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मतिम् (मनः) ॥११८

आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ॥११९

खं सन्निवेशयेत्खेषु चेष्टनस्पर्शनेऽनिलम्।
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु ॥१२०

मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् ॥१२१

प्रशासितारं सर्वेषामणीयांसमणोरपि।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥१२२

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥१२३

एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥१२४

एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥१२५

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन्द्विजः।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् ॥१२६

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां
द्वादशोऽध्यायः ॥

मनुस्मृतिः समाप्तैषा।

शुभं भवतु।

—:❀:—

॥ श्रीः ॥

# * नारदीयमनुस्मृतिः *

॥ श्रीगणेशाय नमः ॥

अथादौ—व्यवहारदर्शनविधिः ।

मनुः प्रजापतिर्यस्मिन्काले राज्यमबूभुजत् ।
धर्मैकतानाः पुरुषास्तदासन् सत्यवादिनः ॥१
नष्टे धर्मे मनुष्येषु व्यवहारः प्रकल्पितः ।
द्रष्टा च व्यवहाराणां राजा दण्डधरः कृतः ॥२
लिखितं साक्षिणश्चात्र द्वौ विधी सम्प्रवर्तितौ ।
सन्दिग्धार्थविशुद्ध्यर्थं द्वयोर्विवदमानयोः ॥३
सोत्तरोऽनुत्तरश्चैव स विज्ञेयो द्विलक्षणः ।
सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पणः ॥४
विवादे सोत्तरपणे द्वयोर्यस्तत्र हीयते ।
स पणं स्वकृतं दाप्यो विनयं च पराजये ॥५
सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ॥६

कुलानि श्रेणयश्चैव गणाश्चाधिकृता नृपैः।
प्रतिष्ठा व्यवहारस्य गुर्वेषामुत्तरोत्तरम् ॥७
स चतुष्पाच्चतुः स्थानश्चतुः साधन एव च।
चतुर्हितश्चतुर्व्यापी चतुष्कारीति कीर्त्यते ॥८
अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च।
त्रियोनिर्द्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा ॥९
धर्मश्च व्यवहारश्च चरित्रं राजशासनम्।
चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः ॥१०
तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु।
चरित्रं पुस्तकरणे राजाज्ञायां तु शासनम् ॥११
सामाद्युपायसाध्यत्वाच्चतुः साधन उच्यते।
चतुर्णामाश्रमाणां च रक्षणात्स चतुर्हितः ॥१२
कर्तॄनथो साक्षिणश्च सभ्यान्राजानमेव च।
व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततः स्मृतः ॥१३
धर्मस्यार्थस्य यशसो लोकपक्तेस्तथैव च।
चतुर्णां करणादेषां चतुष्कारी प्रकीर्तितः ॥१४
राजा सपुरुषः सभ्याः शास्त्रं गणकलेखकौ।
हिरण्यमग्निरुदकमष्टाङ्गः स उदाहृतः ॥१५
ऋणादानं ह्युपनिधिः सम्भूयोत्थानमेव च।
दत्तस्य पुनरादानमशुश्रूषाभ्युपेत्य च ॥१६
वेतनस्यानपाकर्म तथैवास्वामिविक्रयः।
विक्रीयासम्प्रदानं च क्रीत्वानुशय एव च ॥१७

समयस्यानपाकर्म विवादः क्षेत्रजस्तथा ।
स्त्रीपुंसयोश्च सम्बन्धो दायभागोऽथ साहसम् ॥१८
वाक्पारुष्यं तथैवोक्तं दण्डपारुष्यमेव च ।
द्यूतं प्रकीर्णकं चैवेत्यष्टादशपदः स्मृतः ॥१६
एषामेव प्रभेदोऽन्यः शतमष्टोत्तरं स्मृतः ।
क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते ॥२०
कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात् प्रवर्तते ।
त्रियोनिः कीर्त्यते तेन त्रयमेतद्विवादकृत् ॥२१
व्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः ।
सङ्कासतां तु संसर्गात्तत्त्वं होढादिदर्शनात् ॥२२
पक्षद्वयाभिसम्बन्धाद् द्विद्वारः स उदाहृतः ।
पूर्ववादस्तयोः पक्षः प्रतिपक्षस्तदुत्तरः ॥२३
भूतच्छलानुसारित्वाद् द्विगतिः स उदाहृतः ।
भूतं तत्त्वार्थयुक्तं तत् प्रमादाभिहितं छलम् ॥२४
तत्र शिष्टं छलं राजा मर्षयेद्धर्मसाधनः ।
भूतमेव प्रपद्येत धर्ममूला यतः श्रियः ॥२५
धर्मेणोद्धरतो राज्ञो व्यवहारान्कृतात्मनः ।
सम्भवन्ति गुणाः सप्त सप्त वह्नेरिवार्चिषः ॥२६
धर्मश्चार्थश्च कीर्तिश्च लोकपक्तिरुपग्रहः ।
प्रजाभ्यो बहुमानं च स्वर्गस्थानं च शाश्वतम् ॥२७
तस्माद् धर्मासनं प्राप्य राजा विगतमत्सरः ।
समः स्यात्सर्वभूतेषु बिभ्रद् वैवस्वतं व्रतम् ॥२८

धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः।
समाहितमतिः पश्येद् व्यवहाराननुक्रमात् ॥२९
आगमः प्रथमः कार्यो व्यवहारपदं ततः।
विवित्सा निर्णयश्चेति दर्शनं स्याच्चतुर्विधम् ॥३०
धर्मशास्त्रार्थशास्त्राभ्यामविरोधेन पार्थिवः।
समीक्षमाणो निपुणं व्यवहारगतीर्घना: ॥३१
यथा मृगस्य विद्धस्य मृगव्याधः पदं नयेत्।
कक्षे शोणितलेशेन तथा धर्मपदं नयेत् ॥३२
यत्र विप्रतिपत्तिः स्याद् धर्मशास्त्रार्थशास्त्रयोः।
अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत् ॥३३
धर्मशास्त्रविरोधे तु युक्तियुक्तोऽपि धर्मतः।
व्यवहारो हि बलवान् धर्मस्तेनापचीयते ॥३४
सूक्ष्मो हि बलवान् धर्मो दुर्विचारस्त्वतीन्द्रियः।
अतः प्रत्यक्षमार्गेण व्यवहारगतिं नयेत् ॥३५
यात्यचोरोऽपि चोरत्वं चोरश्चायात्यचोरताम्।
अचोरश्चोरतां प्राप्तो माण्डव्यो व्यवहारतः ॥३६
स्त्रीषु रात्रौ बहिर्ग्रामादन्तर्वेश्मन्यरातिषु।
व्यवहारः कृतोऽप्येषु पुनः कर्तव्यतामियात् ॥३७
गहनत्वाद्विवादानामसामर्थ्यात्स्मृतेरपि।
ऋणादिषु हरेत्कालं कामं तत्त्वबुभुत्सया ॥३८
गोभूहिरण्यस्त्रीस्तेयपारुष्यात्ययिकेषु च।
साहसेष्वभिशापे च सद्य एव विवादयेत् ॥३९

अनिवेद्य तु यो राज्ञः सन्दिग्धेऽर्थे प्रवर्तते ।
प्रसह्य स विनेयः स्यात्स चाप्यर्थो न सिध्यति ॥४०
वक्तव्येऽर्थे न तिष्ठन्तमुत्क्रामन्तं च तद्वचः ।
आसेधयेद्विवादार्थी यावदाह्वानदर्शनम् ॥४१
स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा ।
चतुर्विधः स्यादासेधस्तमासिद्धो न लङ्घयेत् ॥४२
नदीसन्तारकान्तारदुर्देशोपप्लवादिषु ।
आसिद्धस्तं परासेधमुत्क्रामन् नापराध्नुयात् ॥४३
आसेध्यकाल आसिद्ध आसेधं योऽतिवर्तते ।
स विनेयोऽन्यथाकुर्वन्नासेद्धा दण्डभाग्भवेत् ॥४४
निवेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः ।
अभियुक्तस्तथान्येन राजकार्योद्यतस्तथा ॥४५
गवां प्रचारे गोपालाः सस्याबन्धे कृषीवलाः ।
शिल्पिनश्चापि तत्काल आयुधीयाश्च विग्रहे ॥४६
अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थश्च नासेध्या नचैनानाह्वयेन्नृपः ॥४७
नाभियुक्तोऽभियुञ्जीत तमती(त्या ? र्त्वा)र्थमन्तरा ।
न चाभियुक्तमन्येन विद्धं न व्यद्धु महति ॥४८
यमर्थमभियुञ्जीत न तं विप्रकृतिं नयेत् ।
नान्यत् पक्षान्तरं गच्छेद् गच्छन्पूर्वात् स हीयते ॥४९
न च मिथ्याभियुञ्जीत दोषो मिथ्याभियोगिनः ।
यस्तत्र विनयः प्रोक्तः सोऽभियोक्तारमाव्रजेत् ॥५०

सापदेशं हरन् कालमब्रुवंश्चापि संसदि ।
उक्त्वा वचो विब्रुवंश्च हीयमानस्य लक्षणम् ॥५१
पलायते य आहूतः प्राप्तश्च विवदेन्न यः ।
स दण्ड्यश्च भवेद्राज्ञा हीन एव स वादतः ॥५२
निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत् ॥५३
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णिक्तव्यवहाराणां प्रमाणमफलं तथा ॥५४
अभूतमप्यभिहितं प्राप्तकालं परीक्ष्यते ।
यत्तु प्रमादान्नोच्येत तद्भूतमपि हीयते ॥५५
तीरितं चानुशिष्टं च यो मन्येत विधर्मणा ।
द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत् ॥५६
दुर्दृष्टे व्यवहारे तु सभ्यास्तद्दण्डमाप्नुयुः ।
नहि जातु विना दण्डात्कश्चिन्मार्गेऽवतिष्ठते ॥५७
रागादज्ञानतो वापि लोभाद्वा योऽन्यथा वदेत् ।
सभ्योऽसभ्यः स विज्ञेय पापं विनयेद् भृशम् ॥५८
किन्तु राज्ञा विशेषेण स्वधर्ममनुतिष्ठता ।
मनुष्ये चित्तवैचित्र्यात्परीक्ष्या साध्वसाधुता ॥५९
पुरुषाः सन्ति ते लोभाद्ये ब्रूयुः कार्यमन्यथा ।
सन्ति चान्ये दुरात्मानः कूटलेख्यकृतो जनाः ॥६०
अतः परीक्ष्यमुभयमतद्राज्ञा विशेषतः ।
लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः ॥६१

असत्याः सत्यसंङ्काशाः सत्याश्चासत्यदर्शनाः ।
दृश्यन्ते विविधा भावास्तस्माद्युक्तं परीक्षणम् ॥६२
तलवद् दृश्यते व्योम खद्योतो हव्यवाडिव ।
न तलं विद्यते व्योम्नि न खद्योते हुताशनः ॥६३
तस्मात्प्रत्यक्षदृष्टोऽपि युक्तमर्थः परीक्षितुम् ।
परीक्ष्य ज्ञापयन्नर्थान् न धर्मात् परिहीयते ॥६४
एवं पश्यन्सदा राजा व्यवहारान्समाहितः ।
वितत्येह यशो दीप्तं ब्रध्नस्याप्नोति विष्टपम् ॥६५
नानियुक्तेन वक्तव्यं व्यवहारे कथञ्चन ।
नियुक्तेन तु वक्तव्यमपक्षपतितं वचः ॥६६
युक्तरूपं ब्रुवन्सभ्यो नाप्नुयाद् द्वेषकिल्बिषे ।
ब्रुवाणस्त्वन्यथा सभ्यस्तदेवोभयमाप्नुयात् ॥६७
राजा तु धार्मिकान्सभ्यान्नियुञ्ज्यात्सुपरीक्षितान् ।
व्यवहारधु(रं? रां) वोढुं ये शक्ताः सद्गवा इव ॥६८
धर्मशास्त्रार्थकुशलाः कुलीनाः सत्यवादिनः ।
समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः ॥६९
तत्प्रतिष्ठः स्मृतो धर्मो धर्ममूलाश्च पार्थिवाः ।
सह सद्भिरतो राजा व्यवहारान्विशोधयेत् ॥७०
शुद्धेषु व्यवहारेषु शुद्धिं यान्ति सभासदः ।
शुद्धिश्च धर्मात्तेषां हि धर्ममेव वदेदतः ॥७१
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च ।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥७२

सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम्।
अब्रुवन् विब्रुवन्वापि नरो भवति किल्बिषी ॥७३
पादोऽधर्मस्य कर्तारं पादः साक्षिणमृच्छति।
पादः सभासदः सर्वान्पादो राजनमृच्छति ॥७४
राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ॥७५
अन्धो मत्स्यानिवाश्नाति निरपेक्षः सकण्टकान्।
परोक्षमर्थवैकल्याद्भाषते यः सभागतः ॥७६
तस्मात्सभ्यः सभां प्राप्य रागद्वेषविवर्जितः।
वचस्तथाविधं ब्रूयाद्यथा न नरकं पतेत् ॥७७
यथा शल्यं भिषग्विद्वानुद्धरेद्यन्त्रयुक्तिभिः।
प्राड्विवाकस्तथा शल्यमुद्धरेद् व्यवहारतः ॥७८
यत्र सभ्यो जनः सर्वः साध्वेतदिति मन्यते।
स निश्शल्यो विवादः स्यात्सशल्यः स्यादतोऽन्यथा ॥७९
न सा सभा यत्र न सन्ति वृद्धा
न ते वृद्धा ये न वदन्ति धर्मम्।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ॥८०

॥ इति व्यवहारदर्शनविधिः ॥

.........

## अथ ऋणादानं प्रथमं विवादपदम् ।

ऋणं देयमदेयं च येन यत्र यथा च यत् ।
दानग्रहणधर्माश्च ऋणादानमिति स्मृतम् ॥१
पितर्युपरते पुत्रा ऋणं दद्युर्यथांशतः ।
विभक्ता ह्यविभक्ता वा यस्तामुद्वहते धुरम् ॥२
पितृव्येणाविभक्तेन भ्रात्रा वा यदृणं कृतम् ।
मात्रा वा यत्कुटुम्बार्थे दद्युस्तद्रिक्थिनोऽखिलम् ॥३
क्रमादव्याहतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतम् ।
दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तते ॥४
इच्छन्ति पितरः पुत्रान्स्वार्थहेतोर्यतस्ततः ।
उत्तमर्णाधमर्णेभ्यो मामयं मोक्षयिष्यति ॥५
अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः ।
ऋणात्पिता समुद्धार्यो यथा न नरकं पतेत् ॥६
तपस्वी चाग्निहोत्री च म्रियते चेदृणी यदि ।
तपश्चैवाग्निहोत्रं च तत्सर्वं धनिनां धनम् ॥७
न पुत्रर्णं पिता दद्यात् दद्यात्पुत्रस्तु पैतृकम् ।
कामक्रोधसुराद्यूतप्रातिभाव्यकृताद्विना ॥८
पितुरेव नियोगाद्यत्कुटुम्बभरणाय वा ।
कृतं वा यदृणं कृच्छ्रे दद्यात्पुत्रस्य तत्पिता ॥९

शिष्यान्तेवासिदासस्त्रीवैयावृत्त्यकरैश्च यत्।
कुटुम्बहेतोरुच्छिन्नं वोढव्यं तत्कुटुम्बिना ॥१०
नार्वाक् संवत्सराद्विंशात्पितरि प्रोषिते सुतः।
ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वा ॥११
दाप्यः पर्णमेकोऽपि जीवत्स्वधिकृतैः कृतम्।
प्रेतेषु तु न तत्पुत्रः परणं दातुमर्हति ॥१२
न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा।
अभ्युपेतादृते यद्वा सह पत्या कृतं तथा ॥१३
दद्यात्त्वपुत्रा विधवा नियुक्ता या मुमूर्षुणा।
यो वा तद्रिक्थमादद्याद्यतो रिक्थमृणं ततः ॥१४
न च भार्याकृतमृणं कथञ्चित्पत्युराभवेत्।
आपत्कृतादृते पुंसां कुटुम्बार्थो हि विस्तरः ॥१५
अन्यत्र रजकव्याधगोपशौण्डिकयोषितः।
तेषां तत्प्रत्यया वृत्तिः कुटुम्बं च तदाश्रयम् ॥१६
पुत्रिणी तु समुत्सृज्य पुत्रं स्त्री यान्यमाश्रयेत्।
तस्या रिक्थं हरेत्सर्वं निःस्वायाः पुत्र एव तु ॥१७
या च सप्रधनैव स्त्री सापत्या चान्यमाश्रयेत्।
सोऽस्या दद्यादृणं भर्तुरुत्सृजेद्वा तथैव ताम् ॥१८
अधनस्य ह्यपुत्रस्य मृतस्योपैति यः स्त्रियम्।
ऋणं बोढुः स भजते तदेतस्य धनं स्मृतम् ॥१६
धनस्त्रीहारिपुत्राणामृणभाग् यो धनं हरेत्।
पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः ॥२०

उत्तमा स्वैरिणीनां या पुनर्भ्वामुत्तमा तथा ।
ऋणं तयोः पतिकृतं दद्याद्यस्ते उपाश्नुते ॥२१
स्त्रीकृतान्यप्रमाणानि कार्याण्याहुरनापदि ।
विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ॥२२
एतान्येव प्रमाणानि भर्ता यद्यनुमन्यते ।
पुत्रः पत्युरभावे वा राजा वा पतिपुत्रयोः ॥२३
भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत् ।
सा यथाकाममश्नीयाद्दद्याद् वा स्थावरादृते ॥२४
तथा दासकृतं कार्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः ॥२५
पुत्रेण च कृतं कार्यं यत्स्यादच्छन्दतः पितुः ।
तदप्यकृतमेवाहुर्दासः पुत्रश्च तौ समौ ॥२६
अप्राप्तव्यवहारस्तु स्वतन्त्रोऽपि नचर्गभाक् ।
स्वातन्त्र्यं तु स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ॥२७
त्रयः स्वतन्त्रा लोकेऽस्मिन् राजाचार्यस्तथैव च ।
प्रति प्रति च सर्वेषां वर्णानां स्वगृहे गृही ॥२८
अस्वतन्त्राः प्रजाः सर्वाः स्वतन्त्रः पृथिवीपतिः ।
अस्वतन्त्रः स्मृतः शिष्य आचार्ये च स्वतन्त्रता ॥२९
अस्वतन्त्राः स्त्रियः पुत्रा दासाश्च सपरिग्रहाः ।
स्वतन्त्रस्तत्र तु गृही यस्य स्यात्तत्क्रमागतम् ॥३०
गर्भस्थसदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः ।
बाल आ षोडशाद्वर्षात्पौगण्डश्चेति शब्द्यते ॥३१

परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ।
जीवतोर्ह्यस्वतन्त्रः स्याज्जरयापि समन्वितः ॥३२
तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे तु पूर्वजः ॥३३
स्वतन्त्राः सर्व एवैते परतन्त्रेषु सर्वदा ।
अनुशिष्टौ निसर्गे च विक्रये चेश्वरा मताः ॥३४
यद् बालः कुरुते कार्यमस्वतन्त्रस्तथैव च ।
अकृतं तदिति प्राहुः शास्त्रे शास्त्रविदो जनाः ॥३५
स्वतन्त्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः ।
तदप्यकृतमेवाहुरस्वतन्त्रः स हेतुतः ॥३६
कामक्रोधाभियुक्तार्तभयव्यसनपीडिताः ।
रागद्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः ॥३७
कुले ज्येष्ठस्तथा श्रेष्ठः प्रकृतिस्थस्तु यो भवेत् ।
तत्कृतं स्यात्कृतं कार्यं नास्वतन्त्रकृतं कृतम् ॥३८
धनमूलाः क्रियाः सर्वा यत्नस्तत्साधने मतः ।
वर्धनं रक्षणं भोग इति तस्य विधिः क्रमात् ॥३९
तत्पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च ।
कृष्णं च तस्य विज्ञेयः प्रभेदः सप्तधा पुनः ॥४०
श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतम् ।
धनं सप्तविधं शुक्लमुदयोऽप्यस्य तद्विधः ॥४१
कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः ।
कृतोपकारादाप्तं च शबलं समुदाहृतम् ॥४२

पार्श्वकद्यूतदूतार्तप्रतिरूपकसाहसैः ।
व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम् ॥४३
तेन क्रयो विक्रयश्च दानं ग्रहणमेव च ।
विविधाश्च प्रयुज्यन्ते क्रियाः सम्भोग एव च ॥४४
यथाविधेन द्रव्येण यत्किञ्चित्कुरुते नरः ।
तथाविधमवाप्नोति स फलं प्रेत्य चेह च ॥४५
तत्पुनर्द्वादशविधं प्रतिवर्णाश्रयं स्मृतम् ।
साधारणं स्यात्त्रिविधं शेषं नवविधं स्मृतम् ॥४६
क्रमागतं प्रीतिदायं प्राप्तं च सह भार्यया ।
अविशेषेण सर्वेषां वर्णानां त्रिविधं धनम् ॥४७
वैशेषिकं धनं ज्ञेयं ब्राह्मणस्य त्रिलक्षणम् ।
प्रतिग्रहेण लब्धं च याज्यतः शिष्यतस्तथा ॥४८
त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम् ।
युद्धोपलब्धं कारश्च दण्डश्च व्यवहारतः ॥४९
वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम् ।
कृषिगोरक्षवाणिज्यं शूद्रस्यैभ्यस्त्वनुग्रहात् ॥५०
सर्वेषामेव वर्णानामेष धर्म्यो धनागमः ।
विपर्ययादधर्म्यः स्यान्न चेदापद् गरीयसी ॥५१
आपत्स्वनन्तरा वृत्तिर्ब्राह्मणस्य विधीयते ।
वैश्यवृत्तिस्ततश्चोक्ता न जघन्या कथञ्चन ॥५२
न कथञ्चन कुर्वीत ब्राह्मणः कर्म वार्षलम् ।
वृषलः कर्म न ब्राह्मं पतनीयौ हि तौ तयोः ॥५३

उत्कृष्टं चापकृष्टं च तयोः कर्म न विद्यते।
मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते ॥५४

आपदं ब्राह्मणस्तीर्त्वा क्षत्त्रवृत्त्या भृते जने।
उत्सृजेत् क्षत्त्रवृत्तिं तां कृत्वा पावनमात्मनः ॥५५

तस्यामेव तु यो वृत्तौ रमते ब्राह्मणो रसात्।
काण्डपृष्ठश्च्युतो मार्गात्सोऽपाङ्क्तेयः प्रकीर्तितः ॥५६

वैश्यवृत्तावविक्रेयं ब्राह्मणस्य पयो दधि।
घृतं मधु मधूच्छिष्टं लाक्षाक्षाररसासवाः ॥५७

मांसौदनतिलक्षौमसोमपुष्पफलोपलाः।
मनुष्यविषशस्त्राम्बुलवणापूपवीरुधः ॥५८

नीलकौशेयचर्मास्थिकुतपैकशफा मृदः।
उदश्वित्केशपिण्याकशाकाद्यौषधयस्तथा ॥५९

ब्राह्मणस्य तु विक्रेयं शुष्कदारु तृणानि च।
गन्धद्रव्यैरकालेयतूलमूलतुषादृते ॥६०

स्वयं विशीर्णं विदलं फलानां बदरेङ्गुदे।
रज्जुः कार्पासिकं सूत्रं तच्चेदविकृतं भवेत् ॥६१

अशक्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च।
यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्समाः ॥६२

अविक्रेयाणि विक्रीणन् ब्राह्मणः प्रच्युतः पथः।
मार्गे पुनरवस्थाप्यो राज्ञा दण्डेन भूयसा ॥६३

प्रमाणानि प्रमाणस्थैः परिपाल्यानि यत्नतः।
सीदन्ति हि प्रमाणानि प्रमाणैरव्यवस्थितैः ॥६४

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं विदुः।
धनस्वीकरणे येन धनी धनमुपाश्नुते ॥६५
लिखितं बलवन्नित्यं जीवन्तस्त्वेव साक्षिणः।
कालातिहरणाद्भुक्तिरिति शास्त्रेषु निश्चयः ॥६६
त्रिविधस्यास्य दृष्टस्य प्रमाणस्य यथाक्रमम्।
पूर्वं पूर्वं गुरु ज्ञेयं भुक्तिर्वैषां गरीयसी ॥६७
विद्यमानेऽपि लिखिते जीवत्स्वपि हि साक्षिषु।
विशेषतः स्थावराणां यन्न भुक्तं न तत्स्थिरम् ॥६८
भुज्यमानान् परैरर्थान् यः स्वमौढ्यादुपेक्षते।
समक्षं जीवतोऽप्यस्य तान् भुक्तिः कुरुते स्वकान् ॥६९
यत्किञ्चिद्दश वर्षाणि सन्निधौ प्रेक्षते धनी।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥७०
उपेक्षां कुर्वतस्तस्य तूष्णीम्भूतस्य तिष्ठतः।
कालेऽतिपन्ने पूर्वोक्तो व्यवहारो न विद्यते ॥७१
अजलश्चेदपोगण्डो विषये चास्य भुज्यते।
भुक्तं तद्व्यवहारेण भोक्ता तद्धनमर्हति ॥७२
आधिः सीमा बालधनं निक्षेपोपनिधिस्त्रियः।
राजस्वं श्रोत्रियस्वं च नोपभोगेन जीर्यति ॥७३
प्रत्यक्षपरिभोगाच्च स्वामिनो द्विदशाः समाः।
आध्यादीन्यपि जीर्येयुः स्त्रीनरेन्द्रधनादृते ॥७४
स्त्री धनं च नरेन्द्राणां न कथञ्चन जीर्यति।
अनागमं भुज्यमानं वत्सराणां शतैरपि ॥७५

निर्भोगो यत्र दृश्येत न दृश्येतागमः क्वचित्।
आगमः कारणं तत्र न भोगस्तत्र कारणम् ॥७६
भुज्यतेऽनागमं यत्तु न तद्भोगोऽतिवर्तते।
प्रेते तु भोक्तरि धनं यस्ति तद्वंश्यभोग्यताम् ॥७७
आहर्तैवाभियुक्तः सन्नर्थतस्तद्धरेत् पदम्।
पदे प्रमूढे भग्ने वा विषमत्वाज्जनान्तिके ।
यस्त्वासन्नतरो ग्रामो व्रजो वा तत्र पातयेत् ॥२३
समेऽध्वनि द्वयोर्यत्र स्तेयप्रायोऽशुचिर्जनः ।
पूर्वापदानैर्दुष्टो वा संसृष्टो वा दुरात्मभिः ॥२४
ग्रामेष्वन्वेषणं कुर्युश्चण्डालवधकादयः ।
रात्रिसञ्चारिणो ये च बहिष्कुर्युर्बहिश्चराः ॥२५
स्तेनेष्वलभ्यमानेषु राजा दद्यात् स्वकाद् धनात् ।
उपेक्षमाणो ह्येनस्वी धर्मादर्थाच्च हीयते ॥२६

इति साहसं चतुर्दशं विवादपदम् ॥

—:❀❀:—

## अथ वाग्दण्डपारुष्यं पञ्चदशं (षोडशं च) विवादपदम् ।

देशजातिकुलादीनामाक्रोशान्यङ्गसंहितम् ।
यद् वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥१
निष्ठुराश्लीलतीव्रत्वात् तदपि त्रिविधं स्मृतम् ।
गौरवानुक्रमादस्य दण्डोऽपि त्रिविधः स्मृतः ॥२

साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् ।
पतनीयैरुपक्रोशैस्तीव्रमाहुर्मनीषिणः ॥३

परगात्रेष्वभिद्रोहो हस्तापादायुधादिभिः ।
भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते ॥४

तत्रापि दृष्टं त्रैविध्यं मृदुमध्योत्तमक्रमात् ।
अवगूरणनिस्सङ्गपातनक्षतदर्शनैः ॥५

हीनमध्योत्तमानां तु द्रव्याणां समतिक्रमात् ।
त्रीण्येव साहसान्याहुः प्रोक्तं कण्टकशोधनम् ॥६

विधिः पञ्चविधस्तूक्त एतयोरुभयोरपि ।
विशुद्धिर्दण्डभाक्त्वं च तत्र सम्बध्यते यथा ॥७

पारुष्ये सति संरम्भादुत्पन्ने क्षुब्धयोर्द्वयोः ।
स मान्यते यः क्षमते दण्डभाग् योऽतिवर्तते ॥८

पारुष्यदोषधुतयोर्युगपत् सम्प्रवृत्तयोः ।
विशेषश्चेन्न दृश्येत विनयः स्यात् समस्तयोः ॥९

पूर्वमाक्षारयेद् यस्तु नियतं स्यात् स दोषभाक् ।
पश्चाद् यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः ॥१०

द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः ।
स तयोर्दण्डमाप्नोति पूर्वो वा यदि वेतरः ॥११

यमेव ह्यतिवर्तेरन्नेते सन्तं जनं नृषु ।
स एव विनयं कुर्यान्न तद्विनयभाङ् नृपः ॥१२

मला ह्येते मनुष्येषु धनमेषां मलात्मकम् ।
अतस्तान् घातयेद् राजा नार्थदण्डेन दण्डयेत् ॥१३

शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति।
वैश्योऽध्यर्धं शतं द्वे वा शूद्रस्तु वधमर्हति ॥१४
विप्रः पञ्चाशतं दण्ड्यः क्षत्रियस्याभिशंसने।
वैश्यं चैवार्धपञ्चाशच्छूद्रं द्वादशको दमः ॥१५
समवर्णद्विजादीनां द्वादशैव व्यतिक्रमे।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥१६
काणं वा यदि वा खञ्जमन्यं वापि तथाविधम्।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणात् परम् ॥१७
न किल्बिषेणापवदेच्छास्त्रतः कृतपावनम्।
न राज्ञा धृतदण्डं च दण्डयेत् तद्व्यतिक्रमे ॥१८
लोकेऽस्मिन् द्वाववक्तव्यावदण्ड्यौ च प्रकीर्तितौ।
ब्राह्मणश्चैव राजा च तौ हीदं बिभृतो जगत् ॥१९
पतितं पतितेत्युक्त्वा चोरं चोरेति वा पुनः।
वचनात् तुल्यदोषः स्यान्मिथ्या द्विर्दोषभाग् भवेत् ॥२०
नामजातिग्रहं तेषामभिद्रोहेण कुर्वतः।
निखेयोऽयोमयः शङ्कुः शूद्रस्याष्टादशाङ्गुलः ॥२१
धर्मोपदेशं दर्पेण द्विजानामस्य कुर्वतः।
तप्तमासेचयेत् तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥२२
येनाङ्गेनावरो वर्णो ब्राह्मणस्यापराध्नुयात्।
तदङ्गमेवच्छेत्तव्यमेवं शुद्धिमवाप्नुयात् ॥२३
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः।
कटिदेशेऽङ्कय निर्वास्यः स्फिग्देशं वास्य कर्तयेत् ॥२४

अवनिष्ठीवतो दर्पाद् द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतः शिश्नमवशर्धयतो गुदम् ॥२५
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्नासिकायां वा ग्रीवायां वृषणेषु च ॥२६
उपाक्रुश्य च राजानं वर्त्मनि स्वे व्यवस्थितम् ।
जिह्वाच्छेदाद् भवेच्छुद्धिः सर्वस्वहरणेन वा ॥२७
राजनि प्रहरेद् यस्तु कृतागस्यपि दुर्मतिः ।
शूले तमग्नौ विपचेद् ब्रह्महत्याशताधिकम् ॥२८
पुत्रापराधे न पिता न श्ववान् शुनि दण्डभाक् ।
न मर्कटे च तत्स्वामी तैरेव प्रहितो न चेत् ॥२६

इति वाग्दण्डपारुष्यं पञ्चदशं (षोडशं) च विवादपदम् ॥

---

## अथ द्यूतसमाह्वयं सप्तदशं विवादपदम् ।

अक्षवध्रशलाकाद्यैर्देवनं जिह्मकारितम् ।
पणक्रीडा वयोभिश्च पदं द्यूतसमाह्वयम् ॥१
सभिकः कारयेद् द्यूतं दद्याद् देयं च तत्कृतम् ।
दशकं तु शताद् वृद्धिस्तस्य स्याद् द्यूतकारिता ॥२
द्विरभ्यस्ताः पतन्त्यक्षा गेहे यस्याक्षदेविनः ।
जयं तस्यापरस्याहुः कितवस्य पराजयम् ॥३

कितवेष्वेव तिष्ठेयुः कितवाः संशयं प्रति ।
त एव तस्य द्रष्टारः स्युस्त एव च साक्षिणः ॥४
अशुद्धं कितवो नान्यमाश्रयेद् द्यूतमण्डलम् ।
प्रतिहन्यान्न सभिको दापयन्तं स्वमिश्रुतः ॥५
कूटाक्षदेविनः पापान् निर्भजेद् द्यूतमण्डलात् ।
कण्ठेऽक्षमालामासज्ज्य स ह्येषां विनयः स्मृतः ॥६

इति द्यूतसमाह्वयाख्यं सप्तदशं विवादपदम् ॥

---

## अथ प्रकीर्णकमष्टादशं विवादपदम् ।

प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्रयाः ।
राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा ॥१
पुरप्रधानसम्भेदः प्रकृतीनां तथैव च ।
पाषण्डनैगमश्रेणिगणधर्मविपर्ययाः ॥२
पितृपुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः ।
प्रतिग्रहविलोपश्च कोप आश्रमिणामपि ॥३
वर्णसङ्करदोषश्च तद्वृत्तिनियमस्तथा ।
न दृष्टं यच्च पूर्वेषु तत्सर्वं स्यात् प्रकीर्णके ॥४
राजा त्ववहितः सर्वानाश्रमान् परिपालयेत् ।
उपायैः शास्त्रविहितैश्चतुर्भिः प्रकृतैस्तथा ॥५

यो यो वर्णोऽपहीयेत यो वोद्रेकमनुव्रजेत्।
तं तं दृष्ट्वा स्वतो मार्गात् प्रच्युतं स्थापयेत् पथि ॥६
अशास्त्रोक्तेषु चान्येषु पापयुक्तेषु कर्मसु।
प्रसमीक्ष्यात्मना राजा दण्डं दण्ड्येषु पातयेत् ॥७
श्रुतिस्मृतिविरुद्धं च जनानामहितं च यत्।
न तत् प्रवर्तयेद् राजा प्रवृत्तं च निवर्तयेत् ॥८
न्यायापेतं यदन्येन राज्ञाज्ञानकृतं च यत्।
तदप्यन्यायविहितं पुनर्न्याये निवेशयेत् ॥९
राज्ञा प्रवर्तितान् धर्मान् यो नरो नानुपालयेत्।
गर्ह्यः स पापो वध्यश्च लोपयन् राजशासनम् ॥१०
आयुधान्यायुधीयानां वाह्यादीन् वाह्यजीविनाम्।
वेशस्त्रीणामलङ्कारान् वाद्यातोद्यानि तद्विदाम् ॥११
यच्च यस्योपकरणं येन जीवन्ति कारुकाः।
सर्वस्वहरणेऽप्येतान् न राजा हर्तुमर्हति ॥१२
अनादिश्चाप्यनन्तश्च द्विपदां पृथिवीपतिः।
दीप्तिमत्त्वाच्छुचित्वाच्च यदि स्यान्न पथश्च्युतः ॥१३
यदि राजा न सर्वेषां नियतं दण्डधारणम्।
कुर्यात् पथो व्यपेतानां विनश्येयुरिमाः प्रजाः ॥१४
ब्राह्मण्यं ब्राह्मणो हन्यात् क्षत्रियः क्षात्रमुत्सृजेत्।
स्वकर्म जह्याद् वैश्यश्च शूद्रः सर्वान् विशेषयेत् ॥१५
राजान(चे ? श्चे)न्नाभविष्यन् पृथिव्यां दण्डधारणे।
शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः ॥१६

सतामनुग्रहो नित्यमसतां निग्रहस्तथा।
एष धर्मः स्मृतो राज्ञामर्थश्चापीडयन् प्रजाः॥१७
न लिप्यते यथा वह्निर्दहञ्छश्वदिमाः प्रजाः।
तथा न लिप्यते राजा दण्डं दण्ड्येषु पातयन्॥१८
आज्ञा तेजः पार्थिवानां सा च वाचि प्रतिष्ठिता।
ते यद् ब्रूयुरसत् सद्वा स धर्मो व्यवहारिणाम्॥१९
राजा नाम चरत्येष भूमौ साक्षात् सहस्रदृक्।
न तस्याज्ञां व्यतिक्रम्य सन्तिष्ठेरन् प्रजाः क्वचित्॥२०
रक्षाधिकारादीशत्वाद् भूतानुग्रहदर्शनात्।
यदेव कुरुते राजा तत् प्रमाणमिति स्थितिः॥२१
विगुणोऽपि यथा स्त्रीणां पूज्य एव पतिः सदा।
प्रजानां विगुणोऽप्येवं पूज्य एव नराधिपः॥२२
तपःक्रीताः प्रजा राज्ञा प्रभुरासीत् ततो नृपः।
तस्मात् तद्वचसि स्थेयं वार्ता चासां तदाश्रया॥२३
पञ्च रूपाणि राजानो धारयन्त्यमितौजसः।
अग्नेरिन्द्रस्य सोमस्य यमस्य धनदस्य च॥२४
कारणान्निर्निमित्तं वा यदा क्रोधवशं गतः।
प्रजा दहति भूपालस्तदाग्निरभिधीयते॥२५
यदा तेजः समालम्ब्य विजिगीषुरुदायुधः।
अभियाति परान् राजा तदेन्द्रः समुदाहृतः॥२६
विगतक्रोधसन्तापो हृष्टरूपो यदा नृपः।
प्रजानां दर्शनं याति सोम इत्युच्यते तदा॥२७

धर्मासनगतः श्रीमान् दण्डं धत्ते यदा नृपः।
समः सर्वेषु भूतेषु तदा वैवस्वतो यमः ॥२८
यदातिथिगुरुप्राज्ञान् भृत्यादीनवनीपतिः।
अनुगृह्णाति दानेन तदा स धनदः स्मृतः ॥२९
तस्मात् तं नावजानीयान्नाक्रोशेन्न विशेषयेत्।
आज्ञायां चास्य तिष्ठेत मृत्युः स्यात् तद्व्यतिक्रमे ॥३०
तस्य वृत्तिः प्रजारक्षा वृद्धप्राज्ञोपसेवनम्।
दर्शनं व्यवहाराणामात्मनश्चाभिरक्षणम् ॥३१
ब्राह्मणानुपसेवेत नित्यं राजा समाहितः।
संयुक्तं ब्राह्मणैः क्षत्रं मूलं लोकाभिरक्षणे ॥३२
ब्राह्मणस्यापरीहारोऽजघन्यासनमग्रतः।
प्रथमं दर्शनं प्रातः सर्वेषां चाभिवादनम् ॥३३
अग्रं नवेभ्यः सस्येभ्यो मार्गदानं च गच्छतः।
भैक्षहेतोः परागारे प्रवेशश्चानिवारितः ॥३४
समित्पुष्पोदकादानेष्वस्तेयं सपरिग्रहात्।
अनाक्षेपः परेभ्यश्च सम्भाषश्च परस्त्रिया ॥३५
नदीष्ववेतनस्तारः पूर्वमुत्तरणं तथा।
करेष्वशुल्कदानं च नचेद् वाणिज्यमस्य तत् ॥३६
वर्तमानोऽध्वनि श्रान्तो गृह्णन्नेकाशनः स्वयम्।
ब्राह्मणो नापराध्नोति द्वाविक्षू पञ्च मूलिकान् ॥३७
नाभिशस्तान्न पतितान्न द्विषो न च नास्तिकात्।
न सोपधान्नानिमित्तं न दातारं प्रपीड्य च ॥३८

अर्थानां भूरिभावाच्च देयत्वाच्च महात्मनाम्।
श्रेयान् प्रतिग्रहो राज्ञामन्येभ्यो ब्राह्मणादृते ॥३९

ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ।
नैतयोरन्तरं किञ्चित् प्रजाधर्माभिरक्षणात् ॥४०

धर्मज्ञस्य कृतज्ञस्य रक्षार्थं शासतोऽशुचीन्।
मेध्यमेव धनं प्राहुस्तीक्ष्णस्यापि महीपतेः ॥४१

शुचीनामशुचीनां च सन्निपातो यथाम्भसाम्।
स तत्र समतां याति तद्वद् राज्ञां धनागमः ॥४२

यदा चाग्नौ स्थितं दीप्ते शुद्धिमाप्नोति काञ्चनम्।
एवमेवागमाः सर्वे शुद्धिमायान्ति राजसु ॥४३

यदा च कश्चित् स्वं द्रव्यं ब्राह्मणेभ्यः प्रयच्छति।
तद् राज्ञाप्यनुमन्तव्यमेष धर्मः सनातनः ॥४४

अन्यत्र कारादुचिताद् भूमेः षड्भागसंज्ञितात्।
बलिः स तस्य विहितः प्रजापालनवेतनः ॥४५

शक्यं तत् पुनरादातुं यद्ब्राह्मणसात्कृतम्।
ब्राह्मणाय तु यद् दत्तं न तस्याहरणं पुनः ॥४६

दानमध्ययनं यज्ञः कर्मास्योक्तं त्रिलक्षणम्।
याजनाध्यापने वृत्तिस्तृतीयस्तु प्रतिग्रहः ॥४७

स्वकर्मणि द्विजस्तिष्ठन् वृत्तिमाहारयेत् कृताम्।
नासद्भ्यः प्रतिगृह्णीयाद् वर्णेभ्यो नियमे सति ॥४८

अशुचिर्वचनाद् यस्य शुचिर्भवति पूरुषः।
शुचिश्चैवाशुचिः सद्यः कथं राजा न दैवतम् ॥४९

विदुर्यस्यैव देवत्वं राज्ञो ह्यमिततेजसः ।
तस्य हि प्रतिगृह्णन्तो न लिप्यन्ते कदाचन ॥५०
लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥५१
एतानि सततं पश्येन्नमस्येदर्चयेच्च तान् ।
प्रदक्षिणं च कुर्वीत तथाह्यायुर्न हीयते ॥५२
द्विविधास्तस्करा ज्ञेयाः परद्रव्यापहारिणः ।
प्रकाशाश्चाप्रकाशाश्च तान् विद्यादात्मवान् नृपः ॥५३
प्रकाशवञ्चकास्तत्र कूटमानतुलाश्रिताः ।
उत्कोदकाः सोपधिकाः कितवाः पण्ययोषितः ॥५४
प्रतिरूपकराश्चैव मङ्गलादेशवृत्तयः ।
इत्येवमादयो ज्ञेयाः प्रकाशा लोकवञ्चकाः ॥५५
अप्रकाशास्तु विज्ञेया बहिरभ्यन्तराश्रिताः ।
सुप्तान् मत्तान् प्रमत्तांश्च मुष्णन्त्याक्रम्य चैव ये ॥५६
देशग्रामगृहघ्नाश्च पथिघ्ना ग्रन्थिमोचकाः ।
इत्येवमादयो ज्ञेया अप्रकाशास्तु तस्कराः ॥५७
तान् विदित्वा सुनिपुणैश्चोरैस्तत्कर्मकारिभिः ।
अनुसृत्य ग्रहीतव्या गूढैः प्रणिहितैर्नरैः ॥५८
सभाप्रपापूपशालावेशमद्यान्नविक्रयाः ।
चतुष्पथाश्चैत्यवृक्षाः समाजप्रेक्षणानि च ॥५९
शून्यागाराण्यरण्यानि देवतायतनानि च ।
चारैर्विचेयान्येतानि चोरग्रहणतत्परैः ॥६०

तथैवान्ये प्रणिहिताः श्रद्धेयाश्चित्रवादिनः।
चोरा ह्युत्साहयेयुस्तांस्तस्करा(न्) पूर्वतस्कराः ॥६१
अन्नपानमहादानैः समाजोत्सवदर्शनैः।
तथा चौर्यापदेशैश्च कुर्युस्तेषां प्रसर्पणम् ॥६२
ये तत्र नोपसर्पन्ति सृताः प्रणिहिता अपि।
तेऽभिसृत्य ग्रहीतव्याः सपुत्रपशुबान्धवाः ॥६३
अचोरा अपि दृश्यन्ते चोरैः सह समागताः।
यादृच्छिकान् नैव तु तान् राजा दण्डेन शासयेत् ॥६४
यांस्तत्र चोरान् गृह्णीयात् तानाताड्य निबध्य च।
अवघुष्य च सर्वत्र वध्याश्चित्रवधेन ते ॥६५
लोप्त्रादिरहिताश्चोरा राज्ञावध्या ह्यनागमम्।
सहोढान् सोपकरणांश्चोरान् क्षिप्रं विवासयेत् ॥६६
स्वदेशघातिनो ये स्युस्तथा मार्गोपरोधिनः।
तेषां सर्वस्वमादाय भूयो निन्दां प्रवर्तयेत् ॥६७
सहोढान् विमृशेच्चोरान् गृहीत्वा परिशङ्कया।
भयोपधाभिश्चित्राभिर्ब्रूयुः सत्यं यथा हि ते ॥६८
देशं कालं तथा जातिं नाम रूपं प्रतिश्रयम्।
कृत्यं कर्म सहायांश्च प्रष्टव्याः स्युर्निगृह्य ते ॥६९
वर्णस्वराकारभेदात् ससन्दिग्धनिवेदनात्।
अदेशकालदृष्टत्वाद् वासस्याप्यविशोधनात् ॥७०
असद्व्ययात् पूर्वचौर्यादसत्संसर्गकारणात्।
लेशैरप्यवगन्तव्या न होढेनैव केवलम् ॥७१

दस्युवृत्ते यदि नरे शङ्का स्यात् तस्करो न वा।
यदि स्पृश्येत लेशेन कार्यः स्याच्छपथं नरः॥७२
चोराणां भक्तदा ये स्युस्तथाप्युदकदायकाः।
आवासदा देशिकदास्तथैवान्तरदायकाः॥७३
क्रेतारश्चैव भाण्डानां प्रतिग्राहिण एव च।
समदण्डाः स्मृताः सर्वे ये च प्रच्छादयन्ति तान्॥७४
राष्ट्रेषु राष्ट्राधिकृताः सामन्ताश्चैव चोदिताः।
अभ्याघातेषु विज्ञेया यथा चोरास्तथैव ते॥७५
गोचरे यस्य मुषितं तेन चोरः प्रयत्नतः।
गृह्य दाप्योऽन्यथा मोषं पदं यदि न निर्गतम्॥७६
निर्गते तु पदे तस्मान्नष्टेऽन्यत्र निपातिते।
सामन्तान् मार्गपालांश्च दिक्पालांश्चैव दापयेत्॥७७
गृहे तु मुषिते राजा दापयेद् दण्डवासिकान्।
आरक्षिकान् बाहिकांश्च यदि चोरो न लभ्यते॥७८
यदि वा दाप्यमानानां तस्मिन् मोषे ससंशये।
मुषितः शपथं कार्यो मो(षं?)वैशोध्यकारणात्॥७९
अचोरे दापिते मोषे चोरान्वेषणकारणात्।
उपलब्धे लभेरंस्ते द्विगुणं तत्र दापितात्॥८०
चोरैर्हृतं प्रयत्नेन सरूपं प्रतिपादयेत्।
तदभावे तु मूल्यं स्याद् दण्डं दाप्यश्च तत्समम्॥८१
काष्ठकाण्डतृणादीनां मृन्मयानां तथैव च।
शाकाहरितमूलानां हरणे फलपुष्पयोः॥८२

गोरसेक्षुविकाराणां तथा लवणतैलयोः।
पक्वान्नानां कृतान्नानां मद्यानामामिषस्य च ॥८३

सर्वेषामल्पमूल्यानां मूल्यात् पञ्चगुणो दमः।
तुलाधारिममेयानां गणिमानां च सर्वशः ॥८४

एभ्यस्तूत्कृष्टमूल्यानां मूल्याद् दशगुणो दमः।
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ॥८५

घृते त्वेकादशगुणं दण्डं दाप्योऽब्रवीन्मनुः।
हिरण्यरजतादीनामुत्तमानां च वाससाम् ॥८६

रत्नानां चैव मुख्यानां शतादभ्यधिके वधः।
पुरुषं हरतो वासो दण्डस्तूत्तमसाहसः ॥८७

सर्वस्वं स्त्रीं तु कन्यां तु हरतो वध एव च।
चतुर्विंशा(त् प ? व)रः पूर्वः परः षण्णवतिर्भवेत् ॥८८

शतानि पञ्च तु वरो मध्यमो द्विशतावरः।
सहस्रं तूत्तमो ज्ञेयः परः पञ्चशतावरः ॥८९

त्रिविधः साहसेष्वेवं दण्ड उक्तः स्वयम्भुवा।
प्रथमे ग्रन्थिभेदानामङ्गुल्यङ्गुष्ठयोर्वधः ॥९०

द्वितीये चैव यच्छेषं दण्डः पूर्वश्च साहसः।
गोषु ब्राह्मणसंस्थासु स्थूरायाश्छेदनं भवेत् ॥९१

दासीं तु हरतो नित्यमर्धपादावकर्तनम्।
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥९२

गरीयसि गरीयांसमगरीयसि वा पुनः ।
स्तेने निपातयेद् दण्डं न यथा प्रथमे तथा ॥९३

दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् ।
त्रिषु वर्णेषु तानि स्युरक्षतो ब्राह्मणो व्रजेत् ॥९४

उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च स्तनौ देहस्तथैव च ॥९५

अपराधं परिज्ञाय देशकालौ च तत्त्वतः ।
सारानुबन्धावालोच्य दण्डं दण्ड्येषु पातयेत् ॥९६

न मित्रकारणाद् राज्ञो विपुलाद् वा धनागमात् ।
उत्स्रष्टव्याः साहसिकास्तस्करा लोकवञ्चकाः ॥९७

यावानवध्यस्य वधे तावान् वध्यस्य मोक्षणे ।
भवत्यधर्मो नृपतेर्धर्मस्तु विनियच्छतः ॥९८

न जातु ब्राह्मणं हन्यात् सर्वपापेष्वपि स्थितम् ।
निर्वासं कारयेत् कामं समग्रधनमक्षतम् ॥९९

सर्वं वापि हरेद् राजा चतुर्थं वावशेषयेत् ।
विप्रेभ्योऽनुस्मरन् धर्मं प्राजापत्यमिति स्थितिः ॥१००

ब्राह्मणस्यापराधेषु चतुर्ष्वङ्को विधीयते ।
गुरुतल्पे सुरापाने स्तेये ब्राह्मणहिंसने ॥१०१

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ।
स्तेये तु श्वपदं कृत्वा शिखिपित्तेन पूरयेत् ॥१०२

विशिराः पुरुषः कार्यो ललाटे ब्रह्मघातिनः ।
असम्भाष्यश्च कर्तव्यस्तन्मनोरनुशासनम् ॥१०३

राजा स्तेनेन गन्तव्यो मुक्तकेशेन धीमता ।
आचक्षाणेन तत् स्तेयमेवंकर्मास्मि शाधि माम् ॥१०४
अनेना भवति स्तेनः स्वकर्मप्रतिवेदनात् ।
राजानं तत् स्पृशेदेन उत्सृजन्तं सकिल्बिषम् ॥१०५
राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥१०६
शासनाद् वापि मोक्षाद् वा स्तेनो मुच्येत किल्विषात् ।
अशासत् तमसौ राजा स्तेनस्याप्नोति किल्विषम् ॥१०७
गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ।
अथ प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥१०८
अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम् ।
व्यष्टापाद्यं तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य तु ॥१०९
ब्राह्मणस्य चतुष्षष्टिं मनुः स्वायम्भुवोऽब्रवीत् ॥११०
शारीरश्चार्थदण्डश्च दण्डस्तु द्विविधः स्मृतः ।
शारीरो द्विविधः प्रोक्तो ह्यर्थदण्डस्त्वनेकधा ॥१११
काकण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च ।
शारीरस्त्ववरोधादिजीवितान्तस्तथा स्मृतः ॥११२
काकण्यादिस्तु यो दण्डः स तु माषपरः स्मृतः ।
(कर्षा ? माषा)परार्धो यः प्रोक्तः कर्षापणपरस्तु सः ॥११३
कार्षापणापरार्धस्तु चतुष्कार्षापणोत्तरः ।
व्यवरोऽष्टपरश्चान्यस्त्र्यवरो द्वादशोत्तरः ॥११४

कार्षापणाद्या ये प्रोक्ताः सर्वे ते स्युश्चतुर्गुणाः।
एवमन्येऽपि बोद्धव्याः प्राक् च ते पूर्वसाहसात् ॥११५
कार्षापणो दक्षिणस्यां दिशि रूढः प्रवर्तते।
पणैर्निबद्धः पूर्वस्यां षोडशैव पणाः स तु ॥११६
पञ्चनद्याः प्रदेशे तु या संज्ञा व्यावहारिकी।
कार्षापणप्रमाणं तु निबद्धमिह वै तया ॥११७
कार्षापणोऽधिका ज्ञेयश्चत(स्रो व ? स्रस्ता)स्तु धानकः।
ते द्वादश सुवर्णं स्याद् दीना(रा ? र)श्चित्रकः स्मृतः ॥११८
वार्तां त्रयीमप्यथ दण्डनीतिं राजानुवर्तेत सदाप्रमत्तः।
हन्यादुपायैर्विविधैर्गृहीत्वा पुरे च राष्ट्रे च विघुष्य चोरान् ॥

इति प्रकीर्णकमष्टादशं विवादपदम् ॥

—०❀०—

## अथ दिव्यप्रकरणम्।

संशयस्थास्तु ये केचिन्महापातकिनश्च ये।
अभिशस्ताः परैश्चापि ते शोध्याः संशयैरिह ॥१
धटोऽग्निरुदकं चैव विषं कोशश्च पञ्चमः।
पञ्चैतान्याह दिव्यानि दूषितानां विशोधने ॥२
सन्दिग्धेऽर्थेऽभिशस्तानां परीक्षार्थं महात्मना।
नारदेन पुरा प्रोक्ताः सत्यानृतविभाजिकाः ॥३

कारयेत चतुर्हस्तां समां लक्षणलक्षिताम्।
तुलां काष्ठमयीं राजा शिक्यप्रान्तावलम्बिनीम्॥४
दक्षिणोत्तरसंस्थानावुभावेकत्र सङ्गतौ।
स्तम्भौ कृत्वा समे देशे तयोः संस्थापयेत् तुलाम्॥५
आयसेन तु पाशेन मध्ये संगृह्य धर्मवित्।
योजयेत सुसंयत्तां तुलां प्रागपरायताम्॥६
वादिनोऽनुमतेनैनां कारयेन्नान्यथा नृपः।
तोलयित्वान्तरं पूर्वं चिह्नं कृत्वा घटस्य तु॥७
तुलितो यदि वर्धेत स विशुद्धो हि धर्मतः।
समो वा हीयमानो वा न विशुद्धो भवेन्नरः॥८
धर्मपर्यायवचनैर्धट इत्यभिधीयते।
त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च॥९
त्वमेव देव! जानीषे न विदुर्यानि मानवाः।
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति॥१०
तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि।
अतः परं प्रवक्ष्यामि लोहस्य विधिमुत्तमम्।
द्वात्रिंशदङ्गुलाख्यं तु मण्डलान्मण्डलान्तरम्॥११
मण्डलस्य प्रमाणं तु कुर्यात् तद्धटसम्मितम्।
अष्टाभिर्मण्डलैरेवमङ्गुलानां शतद्वयम्॥१२
चतुर्विंशत् समाख्यातं भूमेस्तु परिकल्पनम्।
मण्डलैस्तु ततः क्लृप्तैः सोपवासः शुचिर्नरः॥१३

सवासा जलमाप्लुत्य स्वार्द्रकेशः समाहितः ।
सप्ताश्वत्थस्य पत्राणि तथा सौत्राणि तन्तवः(?) ॥१४
हुताशतप्तं लोहस्य पञ्चाशत्पलिकं समम् ।
हस्ताभ्यां पिण्डमादाय व्रजेत् सप्त शनैः शनैः ॥१५
न मण्डलमतिक्रामेन्नाप्यर्वाक् स्थापयेत् पदम् ।
न पातयेत् तामप्राप्तो यावद् भूः परिकल्पिता ॥१६
भयात् पातयते यस्तु दग्धो वा न विभाव्यते ।
पुनस्तं हारयेल्लोहं स्थितिरेवं दृढीकृता ॥१७
तीर्त्वानेन विधानेन मण्डलानि कृतानि तु ।
न दग्धः सर्वथा यस्तु स विशुद्धो भवेदिह ॥१८
अनेन विधिना कार्यो हुताशसमयः सदा ।
त्वमेव सर्वभूतानामन्तश्चरसि नित्यशः ॥१९
प्रच्छन्नानि मनुष्याणां पापानि सुकृतानि च ।
त्वमेव देव ! जानिषे न विदुर्यानि मानवाः ॥२०
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि ॥२१
अतःपरं प्रवक्ष्यामि पानीयविधिमुत्तमम् ।
नातिक्रूरेण धनुषा प्रेरयित्वा शरत्रयम् ॥२२
पानीये मज्जये(रं ? द् य) स्तु शङ्कायां प्रतिवर्तते ।
मध्यमस्तु शरो यः स्यात् पुरुषेण बलीयसा ॥२३
प्रत्यानीते तु तेनाथ तस्य शुद्धिर्भविष्यति ॥२४

स्त्रियस्तु न बलात्कार्या न पुमांसोऽविदुर्बलाः ।
भीरुत्वाद् योषितो मृत्युर्निरुत्साहतया कृशः ॥२५
वारिमध्ये मनुष्यस्य (स्व) अङ्गं यदि न दृश्यते ।
अतोऽन्यथा न शुद्धः स्यादेकाङ्गमपि दर्शयन् २६
स्थानादन्यत्र वा गच्छन् यस्मिन् पूर्वं निवेशितः ।
तोयमध्ये मनुष्यस्य गृहीत्वोरुं सुसंयतः ॥२७
लग्नस्तु निश्चलस्तिष्ठेद् यावत् प्राप्तस्तु सायकः ।
(प्राप्तं तु सायकं दृष्ट्वा जलादुत्थाय प्राङ्मुखम् ?) ।
आनीतं तु शरं दृष्ट्वा जलादुत्थाय प्राङ्मुखः ।
प्रणिपत्य नृपं गच्छेत् सर्वांश्चैव सभासदः ॥२८
त्वमम्भः ! सर्वभूतानामन्तश्चरसि नित्यशः ।
प्रच्छन्नानि मनुष्याणां पापानि सुकृतानि च ॥२९
त्वमेव देव ! जानीषे न विदुर्यानि मानवाः ।
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ॥३०
तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि ॥३१
अतःपरं प्रवक्ष्यामि विषस्य विधिमुत्तमम् ।
अपराह्णे न मध्याह्ने न सन्ध्यायां तु धर्मवित् ॥३२
शरद्ग्रीष्मवसन्तेषु वर्षासु च विवर्जयेत् ।
भग्नं च वारितं चैव धूपितं मिश्रितं तथा ।
कालकूटं मलं चैव विषं यत्नेन वर्जयेत् ॥३३
शार्ङ्गं हैमवतं शस्तं रूपवर्णरसान्वितम् ।
महादोषवते दद्याद् राजा तत्त्वबुभुत्सया ॥३४

न वृद्धातुरबालेषु नच स्वल्पापराधिषु ॥३५
विषस्य पलषड्भा(गं ? गो) भागो विंशतिम(स्यतत्?स्तु यः)
तदष्टभागशुद्धं तु शो(ध्य ? ध्ये) दद्याद् घृताप्लुतम् ॥३६
यथोक्तेन विधानेन विद्वान् स्पृष्ट्वानुमोदितः ।
सोपवासस्तु खादेत देवब्राह्मणसन्निधौ ॥३७
विषवेगक्रमापेतं सुखेन यदि जीवति ।
विशुद्धमिति तं ज्ञात्वा राजा सत्कृत्य मोक्षयेत् ॥३८
अत.परं प्रवक्ष्यामि कोशस्य विधिमुत्तमम् ।
मध्याह्ने सोपवासस्य स्नातस्यार्द्राम्बरस्य च ॥३९
न शूद्रस्याव्यसनिनः कोशपानं विधीयते ।
यद्भक्तः सोऽभियुक्तः स्यात् तद्दैवत्यं तु प्राङ्मुखः ॥४०
प्रत्युच्चार्य ततोर्ध्वास्यं पाययेत् प्रसृतित्रयम् ।
द्विसप्ताहान्तरात् तस्य त्रिसप्ताहेन वा शुभः ॥४१
प्रत्यात्मिकं तु दृश्येत सैव तस्य विभावना ।
ऊर्ध्वं त्रिसप्तदिवसाद् वैकृतं सुमहद् यदि ॥४२
नाभियोज्यः स विदुषा कृतकालव्यतिक्रमात् ।
महापराधे निर्दोषे कृतघ्ने क्लीबकुत्सिते ।
नास्तिकव्रात्यबालेषु कोशपानं विवर्जितम् ॥४३
चराचरस्य जगतो जलेश ! प्राणधारणम् ।
मानुषोऽयं त्वया देव ! धर्मतः शुद्धिमिच्छति ॥४४
अद्भ्यश्चाग्निरभूत् यस्मादतस्तोये विशेषतः ।
तस्मात् सत्येन भगवञ्जलेश त्रातुमर्हसि ॥४५

यथोक्तेन विधानेन पञ्च दिव्यानि धर्मवित् ।
ददद् राजाभिशस्तेभ्यः प्रेत्य चेह च नन्दति ॥४६

इति पञ्च दिव्यानि ॥

समाप्तैषा नारदीयमनुस्मृतिः ॥

॥ अथ ॥

# अत्रिस्मृतिः

— ꣲ —

श्रीगणेशाय नमः ।

अज्ञानतिमिरान्धस्य वृतेनानेन केशव ।
प्रसीद सुमुखो नाथ ! ज्ञानदृष्टिप्रदो भव ॥१
हुताग्निहोत्रमासीन मत्रिं श्रुतवतां वरम् ।
उपगम्य च पृच्छन्ति ऋषयः शंसितव्रताः ॥२
भगवन् ! केन दानेन जपेन नियमेन च ।
शुध्यन्ते पातकैर्युक्ता स्त्वं ब्रवीषि महामुने ! ॥३
अपिख्यापितदोषाणां पापानां महतां तथा ।
सर्वेषां चोपपातानां शुद्धिं वक्ष्यामि तत्वतः ॥४
प्राणायामैः पवित्रैश्च दानैर्होमैर्जपै स्तथा ।
शुद्धिकामाः प्रमुच्यन्ते(पापेभ्यश्च द्विजर्षभाः)पावकेभ्यो न संशयः
प्राणायामान् पवित्रांश्च व्याहृतीः प्रणवन्तथा ।
पवित्रपाणिरासीनोऽभ्यभ्यस्य ब्रह्म नैत्यिकम् ।६
आवर्त्तयेत्सदायुक्तः (विप्रः) प्राणायामान् पुनः पुनः ।
आकेशाग्रादानखान्तात्तपस्तप्यत उत्तमम् ॥७
( त्वक्चर्ममांसरुधिरमेदोमज्जास्थिभिः कृताः ।
तथेन्द्रियकृता दोषाः दह्यन्ते प्राणनिग्रहात् ॥ )

निरोधाज्जायते वायुर्वायोरग्निर्हि जायते।
तापेनापो हि जायन्ते ततोऽन्तः शुध्यते त्रिभिः॥८
तथा चर्म तथानङ्गा दोषा अभ्यर्ति धर्मतः।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात्॥९
प्राणायामैर्दहेत् दोषाद्धारणाभिश्च किल्विषम्।
प्रत्याहारेण विषयान्ध्यानेनानैश्वरान् गुणान्॥१०
न च तीव्रेण तपसा न स्वाध्यायैर्नचेज्यया।
मतिं(गतिं)गन्तुं सुराः(द्विजाः)शक्ता योगात्संप्राप्नुवन्तियाम्॥
योगात्सम्प्राप्यते ज्ञानं योगाद्धर्मस्य लक्षणम्।
योगः परं तपो नित्यं तस्माद्युक्तः सदा भवेत्॥१२
प्रणवाद्या स्तथा वेदाः प्रणवे पर्यवस्थिताः।
वाङ्मयः प्रणवं सर्वं तस्मात्प्रणवमभ्यसेत्॥१३
प्रणवे विनियुक्तस्य व्याहृतीषु च सप्तसु।
त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित्॥१४
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः।
ब्रह्माणी चैव गायत्री पावनं परमं (त्रयम) स्मृतम्॥१५
समाहृतीकां (सव्याहृतिकां) सप्रणवां गायत्रीं शिरसा सह।
त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते॥१६

इत्यात्रेयस्मृत्यां प्रथयोऽध्यायः॥

—:०:—

२२

## ॥ अथ द्वितीयोऽध्यायः ॥

प्राणायामां (स्तु) स्तथा (यः) कुर्याद्यथाविधिरतन्द्रितः।
अहोरात्रिकृतात्पापात्तत्क्षणादेव शुध्यति ॥१
कर्म्मणा मनसा वाचा यदेनः कुरुते निशि।
अतिष्ठत् पूर्वसन्ध्यायां प्राणायामैस्तु शुध्यति ॥२
प्राणायामैर्य (स्वं) आत्मानं संयम्यास्ते पुनः पुनः।
दशद्वादशभिर्वापि चतुर्विंशात्परं तपः ॥३
कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च तृचं प्रति।
कुष्माण्डं पावमानं च सुरापोऽपि विशुद्धति ॥४
सकृज्जप्त्वास्य पानीयं (वामीयं) शिवसङ्कल्पमेव च।
सुवर्णमपहृत्यापि क्षणाद्भवति निर्मलः ॥५
हविष्मांस्तु यमभ्यस्य न तमंह (भ) इतीव च।
सूक्तं तु पौरुषं जप्त्वा मुच्यते गुरुतल्पगः ॥६
सव्याहृतीकाः सप्रणवाः प्राणायामास्तु षोडश।
अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः ॥७
अपि वाप्सु निमज्जन्वा त्रिः पठेदघमर्षणम्।
यथाश्वमेधः क्रतुराट् तादृशं मनुरब्रवीत् ॥८
आरम्भयज्ञः क्षत्रस्य हविर्यज्ञो विशामपि।
परिचर्य्ययज्ञः शूद्रस्तु जपयज्ञो द्विजोत्तमः ॥९
आरम्भयज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः।
उपांशु स्याच्छतगुणः सहस्रो मानसः स्मृतः ॥१०

उपांशुस्तुचलज्जिह्वा॒दशनच्छद ईरितः।
अधरोष्ठविभागो वा विश्वासोपांशुलक्षणः।
निर्विकारेण वक्रेण मनसा मानसः स्मृतः ॥११
सहस्रपरमां देवीं शतमध्यां दशावराम्।
गायत्रीं यः पठेद्विप्रो न स पापेन लिप्यते ॥१२
क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः।
वित्तेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ॥१३
यथाश्वा रथहीनास्तु रथो वाश्वैर्यथा विना।
एवं तपोऽप्यविद्यस्य विद्या वाप्यतपस्विनः ॥१४
यथान्नं मधुसंयुक्तं मधु वान्येन संयुतम्।
एवं तपश्च विद्या च संयुक्तं भेषजं महत् ॥१५
विद्यातपोभ्यां संयुक्तं ब्राह्मणं जपतत्परम्।
कुत्सितैरपि वर्त्तन्तमेनो न प्रतिपद्यते ॥१६

इति आत्रेयस्मृतौ द्वितीयोऽध्यायः।

---

यस्य (अथा) कार्यशतं साग्रं कृतं वेदश्च साध्यते।
सर्वं तत्तस्य (हिनस्ति) वेदाग्निर्दहत्यग्निरिवेन्धनम् ॥१
यथा जातबलो वाग्निर्दहत्यार्द्रानपि द्रुमान्।
तथा दहन्ति वेदज्ञाः कर्मजन्दोषमात्मनः ॥२
यथा महाह्रदे लोष्टं क्षिप्तं (अप्सु) सर्वं विनश्यति।
एवमात्मकृतं पापं त्रयी दहति देहिनः ॥३

न वेदबलमाश्रित्य पापकर्मरति(रतो)र्भवेत् ।
अज्ञानाच्च प्रमादाच्च दह्यते कर्म नेतरत् ॥४
तपस्तपति योऽरण्ये मुनिर्मूलफलाशनः ।
ऋचमेकाञ्च योऽधीते तच्च(तच्छ) तानि च तत्फलम् ॥५
वेदाभ्यासो (ऽन्वहं) यथाशक्त्या महायज्ञक्रियाक्षमाः ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥६
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदान्मामयं प्रतरिष्यति ॥७
याजनाध्यापनाद्दानात्तथैवाहुः प्रतिग्रहात् ।
विप्रेषु न भवेद्दोषो ज्वलनार्कसमा (द्विजाः) हिते ॥८
शङ्कास्थाने समुत्पन्ने भक्ष्यभोज्यप्रतिग्रहे ।
आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु ॥९
सर्ववेदपवित्राणि वक्ष्याम्यह मतः परम् ।
येषांजपैश्चहोमैश्च,शुध्यन्तिमलिनाजनाः)तिलकल्पश्चसंव्रता ॥१०
अघमर्षणं वेदवतं (देवव्रतं) शुद्धवत्यः शरत्समाः ।
कुष्माण्डः पावमानश्च दुर्गा सावित्रिरेव च ॥११
शतरुद्रं (ऽथर्वशिरशं) धर्मशिरं त्रिसुपर्णं महाव्रतम् ।
अनिषङ्गादयस्तोभासामानि व्याहृति स्तथा ॥१२
( अतिष्ठन् गाः पदस्तोमाः सामनि व्याहृतिस्तथा )
गारुडानि च सामानि गायत्रीं रैवतं तथा ।
पुरुषव्रतञ्च भावञ्च तथा वेदकृतानि च ॥१३
अब्लिङ्गा बार्हस्पत्यं च वाक्सूक्तञ्चामृतं (व्रुवं) तथा ।
गोसूक्तञ्चाश्वसूक्तञ्च इन्द्रशुद्धे श्च सामनि ॥१४

त्रीण्याज्यदोहानि रथन्तरञ्च-अग्नेर्व्रतं वामदेव्यं वृहच्च ।
एतानिजप्यानिपुनातिपापाज्जातिस्मरत्वंलभतेयदिच्छेत् ॥१५
अग्नेरपत्यं प्रथमं हिरण्यं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकास्त्रयस्ते न भवन्तिदत्ताःयःकाञ्चनङ्गाञ्चमहीञ्चदद्यात्॥
सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकक्षितिधेनूनां सप्तजन्मानुगं फलम् ॥१७
सर्वकामफला वृक्षा नद्यः पायसकर्दमाः ।
काञ्चना यत्र प्रासादा स्तत्र गच्छन्ति गोप्रदाः ॥१८
वैशाख्यां पौर्णमास्यान्तु ब्राह्मणान् सप्त पञ्च वा ।
तिलक्षौद्रेण संयुक्तां स्तर्पयित्वा यथाविधि ॥१६
प्रीयतां धर्मराजेति (तद्बेश्मनिसवर्द्धते) यद्वा मनसि वर्त्तते ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥२०
सुवर्ण(णानि)नाभं यो दद्यात् सुमुखं कृत( मङ्गलम् )मार्गकम् ।
तिलैर्दद्यात्तस्य पुष्पफलं पुण्यं च यत् शृणु ॥२१
( तिलैर्दद्यात्तु यो भूमिं तस्य पुण्य फलं शृणु )
सा सुवर्णधरा धेनुः सशैलवनकानना ।
या तु सागरपर्यन्ता भवेद्दत्ता न संशयः ॥२२
तिलान् कृष्णाजिने कृत्वा सुवर्णमधुसर्पिषा ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥२३

इति—आत्रेयस्मृतौ तृतीयोऽध्यायः ॥

## अथ रहस्य प्रायश्चित्तानि व्याख्यास्यामः ॥

सामान्यस्त्रीगमनरहस्ये रहस्य प्रकाशे प्रकाशं पावनं अनुतिष्ठेत् । वा—समान्यमगम्यागमनन्दुरन्नभोजनान्तौ रहस्यौ रहस्यं प्रकाशं वाचनमनुतिष्ठेत् । अथवाप्सुनिमज्ज्यन् समन्दोऽयं त्रिरावृत्य (त्रिरात्र्यन्तरं) शुद्ध्येत् । गोवन्यवधे कन्यादषणे इन्द्रशुद्ध्या इत्यापः पीत्वा मुच्यते ।

वेदस्यैवगुणं वापि (जप्त्वा) सद्यः शोधनमुच्यते ।
एकादशगुणान्वापि रुद्रानावर्त्य शुध्यति ॥१
महापातकोपपातकेभ्यो मलिनीकरणेभ्यो मुच्यते ।
त्रि(द्वि)पदा नाम गायत्री वेदे वाजसनेयके ।
त्रिः कृत्वोऽन्तर्जले प्रोक्ता सर्वपापं व्यपोहति । २
ब्राह्मणी गमने स्नात्वोदकुम्भान् ब्राह्मणाय दद्यात्
क्षत्रियावैश्यागमने तापसां त्रिरावृत्य शुद्ध्यति ।
शूद्रागमने अघमर्षणं त्रिरावृत्य शुद्ध्यति ।
गुरुदान् गत्वा वृषभ द्वादशावृत्या शुद्ध्यति ।
अपेयं पीत्वा अघमर्षणेनापः पीत्वा विशुद्ध्यति ।
अशक्तः प्रायश्चित्ते सर्वरात्रमनुशोच्य शुद्ध्येत ।
अग्निसोम इन्द्रसोम इति जपित्वा कन्यादूषी विमुच्यते ।
सोमं राजानमिति जपित्वा विषदा अग्निदाश्च विमुच्यन्ते ।
सर्वेषामेव पापानां सङ्करे समुपस्थिते ॥३

दशसाहस्रमभ्यस्ता गायत्री शोधनी परा ।
ब्रह्महा गुरुतल्पी वाऽगम्या गामी तथैव च ॥४
स्वर्णस्तेयी च गोघ्नी च तथा विस्रम्भघातकः ।
शरणागतघाती च कूटसाक्षी त्वकार्य्यकृत् ॥५
एवमाद्येषु चान्येषु पापेष्वभिरतश्चिरम् ।
प्राणायामांस्तु यः कुर्यात् सूर्यस्योदयनं प्रति ॥६
सूर्यस्योदयनं प्राप्य निर्म्मला धौतकल्मषाः ।
भवन्ति भास्कराकारा विधूमा इव पावकाः ॥७
न हि ध्यानेन सदृशं पवित्रमिह विद्यते ।
श्वपाकेष्वपि भुञ्जानो ध्यानेनैवात्र लिप्यते ॥८
ध्यानमेव व(प)रो धर्मो ध्यानमेव परं तपः ।
ध्यानमेव परं शौचं तस्माद्ध्यानपरो भवेत् ॥९
सर्वपापप्रसक्तोऽपि ध्यानं नियतमभ्यसेत् ।
(ध्यायन् निमिष मुच्यते)
सर्वदा ध्यानयुक्तश्च तपस्वी पंक्तिपावनः ॥१०
पुनस्तपस्वी भवति पंक्तिपावनपावनः ।

इति आत्रेयस्मृतौ चतुर्थोऽध्यायः ।

—:❀:—

चतुरस्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य तु।
वर्त्तुलञ्चैव वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्।
ब्रह्मा विष्णुश्च रुद्रश्च श्रीर्हुताशन एव च॥१
मण्डलान्युपजीवन्ति तस्मात् कुर्वन्ति मण्डलम्।
यातुधानाः पिशाचाश्च क्रूराश्चैव तु राक्षसाः॥२
हरन्ति रसमन्नस्य मण्डलेन विवर्जितम्।
गोमयै र्मण्डलं कृत्वा भोक्तव्यमिति निश्चितम्॥३
यत्र कपतितस्यान्नं भुक्त्वा चान्द्रायणं चरेत्।
यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ॥४
तयोरन्नमदत्त्वा च भुक्त्वा चान्द्रायणं चरेत्।
यतिहस्ते जलं दद्याद्भैक्षं दद्यात् पुनर्जलम्॥५
तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम्।
वामहस्तेन यो भुङ्क्ते पयः पिवति वा द्विजः॥६
सुरापानेन तत्तुल्यं मनुः स्वायम्भुवोऽब्रवीत्।
हस्तदत्तास्तु ये स्नेहाल्लवणव्यञ्जनादि च॥७
दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्विषम्।
अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमन्त्रितम्॥८
तथैव वृषलस्यान्नं ब्राह्मणेन निमन्त्रितम्।
ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्॥९
उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्।
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्॥१०

वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम्।
शूद्रान्नेनोदरस्थेन योऽधिगच्छति मैथुनम्॥११
यस्यान्नं तस्यते पुत्रा अन्नाच्छुक्रं प्रवर्त्तते।
शूद्रान्नरसपुष्टाङ्गोऽधीयानोऽपि च नित्यशः॥१२
जुह्वत् चापि जपन्वापि गतिमूर्द्धान्न विन्दति।
यस्तु वेदमधीयानः शूद्रान्नमुपभुञ्जते॥१३
शूद्रो वेदफलं याति शूद्रत्वं चाधिगच्छति।
मृतसूतकपुष्टाङ्गो द्विजः शूद्रान्नभो(जीच)जनम्॥१४
अहमेवं न जानामि काङ्क्षां योनिङ्गमिष्यति।
श्वानस्तु सप्तजन्मानि नवजन्मानि शूकरः॥१५
गृध्रो द्वादश(अष्टादश)जन्मानि इत्येवं मनुरब्रवीत्।
परपाक मुपासन्ते ये द्विजा गृहमेधिनः॥१६
ते वै खरत्वमुष्ट्रत्वं श्वत्वञ्चैवाऽधिगच्छति।
श्राद्धं दत्वा च भुक्त्वा च मैथुनं योऽधिगच्छति॥१७
भवन्ति पितरस्तस्य तन्मासे रेतसोभुजः।
उच्छिष्टे न तु संस्पृष्टो द्रव्यहस्तः कथञ्चन॥१८
भूमौ निधाय तद्द्रव्यमाचान्तः शुचितामियात्।
स्पृशन्ति विन्दवः पादौ य आचामयतः परान्॥१९
भूमिगैस्ते समाज्ञेया न तैरप्रयतो भवेत्।
आचान्तोऽप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम्॥२०
उद्धृतेप्यशुचिस्तावद्यावन्मण्डलशोधनम्।
आसने पादमारोप्य ब्राह्मणो यस्तु भुञ्जते॥२१

मुखेन वमितं चान्नं तुल्यं गोमांसभक्षणम् ।
उपदंशान्नशेषं वा भोजने मुखनिःसृतम् ॥२२
द्विजातीनामभोज्यान्नं भुक्त्वा चान्द्रायणं चरेत् ।
पीतशेषन्तु यत्तोयं ब्राह्मणः पिबते पुनः ॥२३
अपेयं तद्भवेदापः पीत्वा चान्द्रायणं चरेत् ।
अनुवंशन्तु भुञ्जीत नानुवंशन्तु संविशेत् ॥२४
अनुवंशन्तु भुञ्जानो दीर्घमायुरवाप्नुयात् ।
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ॥२५
आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात् ।
अनार्द्रपादः शयने दीर्घां श्रियमवाप्नुयात् ॥२६
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखे भुङ्क्ते ऋतं भुङ्क्त उदङ्मुखः ॥२७
शावे शवगृहं गत्वा श्मशाने वान्तरेऽपि वा ।
आतुरं व्यञ्जनं कृत्वा दूरस्थोऽप्यशुचिर्भवेत् ॥२८
अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् ।
सम्वत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति ॥२९
निर्देशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥३०
अशुद्धं स्वयमप्यन्नं न शुद्धस्तु यदि स्पृशेत् ।
विशुध्यत्युपवासेन भुङ्क्ते कृच्छ्रेण स द्विजः ॥३१
सूतके सूतकं स्पृष्ट्वा स्नानं शावे च सूतके ।
सूतकेनैव शुद्धिः स्यान्मृतस्यान्निर्दशे शुचिः ॥३२

सूतके सूतकं स्पृष्ट्वा स्नानं शावे च सूतके ।
भुक्त्वा पीत्वा तदज्ञानादुपवासस्त्र्यहं भवेत् ॥३३
मृण्मयानाञ्च पात्राणां दशाहे (दाहे) शुचिरिष्यते ।
स्नानादिषु प्रयुक्तानां त्याग एव विधीयते ॥३४
सूतके मृतके चैव मृतान्ते च प्रसूतके ।
तस्मात्तु शङ्कताशौचे मृताशौचे न शुध्यति ॥३५
सूतकाद्द्विगुणं शावं शावाद्द्विगुणमार्त्तवम् ।
आर्त्तवाद् द्विगुणा सूतिस्ततोऽधिशवदाहकः ॥३६
अनुगच्छेद्यथा (च्छया) प्रेतं ज्ञातिमज्ञातिमेव वा ।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ॥३७
रजता शुध्यते नारी नदी वेगेन शुध्यति ।
भस्मना शुध्यते कांस्यं पुनः पाकेन मृण्मयम् ॥३८
नोदन्वतोऽम्भसि स्नानं क्षुरकर्म तथैव च ।
अन्तर्वत्न्या (रती) पतिः कुर्वन्न प्रजा भवति ध्रुवम् ॥३९
दम्पती शिशुना सार्द्धं सूतके दशमेऽहनि ।
क्षौरं(स्नानं)कुर्यात्ततः पूता(पिता)दानभोजनयोग्यता ॥४०
केशादि दूषिते तीरे न कुर्यात्तिलतर्पणम् ।
जलमध्ये जलं देयं पितॄणां जलमिच्छताम् ।
घनस्थाने न दातव्यं पितॄणां नोपगच्छति ॥४१
रात्रिं कुर्यात् त्रिभागन्तु द्वौ भागौ पूर्व एव च ।
उत्तरांशः प्रभातेन युज्यते मृत(ऋतु)सूतके ॥४२
यदिपश्येद्दतुंपूर्वं क्रूरवारे मृतिः स्मृता ।

इति पश्येत्तु भुक्त्वा तु पादुकारोहणं स्मृतम्।
स्नात्वैन्द्रव्रतमादाय देवताभ्यो निवेदयेत्॥४३
अपूपं लवणं मुद्गं गुडमिश्रं तथा हविः।
दत्त्वा ब्राह्मणपत्नीभ्यो निशि भोजनमेव च॥४४
चतुर्थेऽहनि कर्त्तव्यं क्षुरकर्माति(ऋतुशान्तिश्च)यत्नतः।
पुण्याहं वाचयित्वाऽन्ते भोक्तव्यं (होतव्यं) शुद्धिमिच्छता॥४५
अपुण्याहे तु भुञ्जीत विप्रो धर्ममजानतः।
तस्य जातिमयं भुङ्क्ते प्रायश्चित्तं ध्रुवं भवेत्॥४६
विवाहे वितते तन्त्रे होमकाल उपस्थिते।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः॥४७
हविष्मत्या स्नापयित्वा त्वन्यवस्त्रमलङ्कृताम्।
युञ्जानामाहुतिं कृत्वा ततः कर्म प्रवर्त्तते॥४८
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातकी।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति॥४९
आर्त्तवाभिप्लुतां नारीं चण्डालं पतितं शुनम्।
भोज्यान्तरे (तु संस्पृश्यन्) प्रयुज्यन्ते
स्नात्वा मान स्तृचं (वाचस्पतिं) जपेत्॥५०
आर्त्तवाभिप्लुतां नारीं दृष्ट्वा भुङ्क्ते(कामतः)ऽन्धकातराः।
तदन्नं छर्दयित्वा तु कुशवारि पिबेदपः॥५१
ये तां दत्त्वा (दृष्ट्वा) तु यो भुङ्क्ते प्राजापत्यं विशोधनम्।
आर्त्तवाभिप्लुतां नारीं आर्त्तवाभिप्लुताभिधः॥५२
भाषयित्वा तु संमोहादुपवासस्तयोर्भवेत्।
उदक्यायाः करेणाथ भुक्त्वा चान्द्रायणं चरेत्॥५३

प्राजापत्यमसत्याच्चेत् त्रिरात्रं स्पृष्टभोजने।
तद्ग्रस्तभोजनञ्चैव त्रिगुणं सह भोजने॥५४
चतुर्गुणं तदुच्छिष्टे पानीये त्वर्द्धमेव च।
उदक्यायाः समीपस्थ मन्नं भुक्त्वात्वकामतः॥५५
उपवासेन शुद्धिः स्यात्पिवेद् ब्रह्म सुवर्च्चलम्।
आर्त्तवा यदि चाण्डालमुच्छिष्टेन तु पश्यति॥५६
आस्नानकालं नाश्नीयादासीना वाग्यता बहिः।
पादकृच्छ्रन्तु यः कुर्याद् ब्रह्मकृच्छ्रं पिवेत् पुनः॥५७
ब्राह्मणान् भोजयेत्पश्चाद्विप्राणा मनुशासनात्।
मृतसूतकसम्पर्के ऋतुं दृष्ट्वा कथं भवेत्॥५८
आस्नानकालं नाश्नीयाद् भुक्त्वा चान्द्रायणं चरेत्।
आर्त्तवाभिप्लुता नारी चण्डालं स्पृशते यदि॥५९
आर्त्तवाभिप्लुता नारीं आर्त्तवाभिप्लुता स्पृशेत्।
स्नात्वोपवासं कुर्याच्च पञ्चगव्येन शुध्यति॥६०
कृच्छ्रमेकञ्चरेत्सा तु तदर्थं चान्तरीकृते।
आतुरा या ऋतुस्नाता स्नानकर्म कथं भवेत्॥६१
स्नात्वा स्नात्वा पुनःस्पृश्य दशकृत्वस्त्वनातुराः।
वस्त्रापनयनं कृत्वा भस्मना परिमार्जयेत्॥६२
दत्त्वा तु शक्तितो दानं पुण्याहेन विशुध्यति।
ब्रह्मणानां करैर्मुक्तं तोयं शिरसि धारयेत्॥६३
सर्वतीर्थतटात्पुण्याद्विशिष्टतरमुच्यते।
रजस्वलायाः प्रेतायाः संस्कारं नाचरेद्द्विजः॥६४

ऊर्ध्वं त्रिरात्रात्स्नातायाः शावधर्मेण दाहयेत् ।
रजस्वले च द्वे स्पृष्टे चातुर्वर्णस्य याः स्त्रियः ॥६५
अतिकृच्छ्रं चरेत्पूर्वं कृच्छ्रमेकं क्रमेण तु ।
रजस्वलायाः स्नातायाः पुनरेव रजस्वला ॥६६
विंशतेर्दिवसादूर्ध्वं त्रिरात्रमशुचिर्भवेत् ।
प्रसूतिका तु या नारी स्नानतो विंशतेः परम् ॥६७
रजस्वला तु सा प्रोक्ता प्राक्तु नैमित्तिकं रजः ।
शुद्धा नारी शुद्धवासाः पुनरार्तवदर्शने ॥६८
वस्त्रं तु मलिनं त्यक्त्वा तिलमाप्लुत्य शुध्यति ।
आतुर स्नानसंप्राप्तौ दशकृत्वस्त्वनातुरः ॥६९
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्धो भविष्यति ।
चन्द्रसूर्यग्रहे नाद्यात् स्नात्वा मुक्ते तु भुञ्जते ॥७०
अमुक्तयो रस्तगयो रद्याद् दृष्ट्वा परेऽहनि ।
यस्य स्वजन्मनक्षत्रे गृह्येते शशिभास्करौ ॥७१
व्याधिः प्रवाहे मृत्युश्च दारिद्र्यञ्च महद्भयम् ।
तस्माद्दानं च होमञ्च देवताभ्यर्चनं जपम् ॥७२
कुर्यात्तस्मिन् दिने युक्ते तस्य शान्तिर्भविष्यति ।
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ॥७३
यो नरः स्नाति तत्तीर्थे समुद्रे सेतुबन्धने ।
उपोष्य रजनी मेकां राहुग्रस्ते दिवाकरे ॥७४
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।
सोमेऽप्येवं सूर्यतुल्यं तस्मात् सर्वं समाचरेत् ॥७५

इति आत्रेयस्मृतौ पञ्चमोऽध्यायः ॥

इष्ट्वा क्रतुशतैरेवं देवराजो महाद्युतिः।
स्वगुरुं वाग्मिनां श्रेष्ठं पर्यपृच्छद्वृहस्पतिम् ॥१
भगवन्! केन दानेन स्वर्गतः सुखमेधते।
यदक्षयं महाभाग! त्वं ब्रूहि वदताम्बर ॥२
एवं पृष्टः स इन्द्रेण देवदेवपुरोहितः।
वाचस्पतिर्महातेजो वृहस्पति रुवाच ह ॥३
हिरण्यदानं गोदानं भूमिदानञ्च वासव?।
एतत्प्रयच्छमानोऽपि स्वर्गतः सुखमेधते ॥४
सुवर्णं रजतं वस्त्रं मणिरत्नं बसूनि च।
सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति ॥५
फलाकृष्टां महीं दद्यात् सवीजां सस्यमालिनीम्।
यावत् सूर्यकरा लोके तावत् सर्गे महीयते ॥५

इति—आत्रेयस्मृतौ धर्मशास्त्रं सम्पूर्णम्।

---

शुभमस्तु।

॥ ॐ तत्सद्ब्रह्मणेनमः ॥

महर्ष्यात्रिप्रणीता ।

# अत्रि-संहिता ।

॥ श्रीगणेशाय नमः ॥

हुताग्निहोत्रमासीनमत्रिं वेदविदां वरम् ।
सर्वशास्त्रविधिज्ञातमृषिभिश्च नमस्कृतम् ॥१

नमस्कृत्य च ते सर्व इदं वचनमब्रूवन् ।
हितार्थं सर्व लोकानां भगवन्! कथयस्वनः ॥२

अत्रिरुवाच ।

वेदशास्त्रार्थतत्त्वज्ञा! यन्मे पृच्छथ संशयम् ।
तत् सर्वं संप्रवक्ष्यामि यथादृष्टं यथाश्रुतम् ॥३

सर्वतीर्थान्युपस्पृश्य सर्वान् देवान् प्रणम्य च ।
जप्त्वा तु सर्वसूक्तानि सर्वशास्त्रानुसारतः ॥४

सर्वपापहरं नित्यं सर्वसंशयनाशनम् ।
चतुर्णामपि वर्णानामत्रिः शास्त्रमकल्पयत् ॥५

ये च पापकृतो लोके ये चान्ये धर्मदूषकाः ।
सर्वैः पापैः प्रमुच्यन्ते श्रुत्वेदं शास्त्रमुत्तमम् ॥६

तस्मादिदं वेदविद्भिरध्येतव्यं प्रयत्नतः।
शिष्येभ्यश्च प्रवक्तव्यं सद्वृत्तेभ्यश्च धर्मतः॥७
अकुलीने ह्यसद्वृत्ते जडे शूद्रे शठे द्विजे।
एतेष्वेव न दातव्यमिदं शास्त्रं द्विजोत्तमैः॥८
एकमप्यक्षरं यत्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा ह्यनृणो भवेत्॥९
एकाक्षरप्रदातारं यो गुरुं नाभिमन्यते।
शुनां योनिशतं गत्वा चाण्डालेष्वपि जायते॥१०
वेदं गृहीत्वा यः कश्चिच्छास्त्रञ्चैवावमन्यते।
स सद्यः पशुतां याति सम्भवानेकविंशतिम्॥११
स्वानि कर्माणि कुर्वाणा दूरे सन्तोऽपि मानवाः।
प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः॥१२
कर्म विप्रस्य यजनं दानमध्ययनं तपः।
प्रतिग्रहोऽध्यापनञ्च याजनञ्चेति वृत्तयः॥१३
क्षत्रियस्यापि यजनं दानमध्ययनं तपः।
शस्त्रोपजीवनं भूतरक्षणञ्चेति वृत्तयः॥१४
दानमध्ययनं वार्ता यजनं चेति वै विशः।
शूद्रस्य वार्ता शुश्रूषा द्विजानां कारुकर्म च॥१५
मयैष धर्मोऽभिहितः संस्थिता यत्र वर्णिनः।
बहुमानमिह प्राप्य प्रयान्ति परमां गतिम्॥१६
ये व्यपेताः स्वधर्मेभ्य परधर्मे व्यवस्थिताः।
तेषां शास्तिकरो राजा स्वर्गलोके महीयते॥१७

आत्मीये संस्थितो धर्मे शूद्रोऽपि स्वर्गमश्नुते।
परधर्मो भवेत्त्याज्यः सुरूपपरदारवत् ॥१८

बध्यो राज्ञा स वै शूद्रो जपहोमपरश्च यः।
ततो राष्ट्रस्य हन्ताऽसौ यथा वह्नेश्च वै जलम् ॥१९

प्रतिग्रहोऽध्यापनञ्च तथाऽविक्रेयविक्रयः।
याज्यं चतुर्भिरप्येतैः क्षत्त्रविट्पतनं स्मृतम् ॥२०

सद्यः पतति मांसेन लाक्षया लवणेन च।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥२१

अव्रताश्चानधीयाना यत्र भैक्षचरा द्विजाः।
तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदं बुधैः ॥२२

विद्वद्भोज्यमविद्वांसो येषु राष्ट्रेषु भुञ्जते।
तेऽप्यनावृष्टिमिच्छन्ति महद्वा जायते भयम् ॥२३

ब्राह्मणान् वेदविदुषः सर्वशास्त्रविशारदान्।
तत्र वर्षति पर्जन्यो यत्रैतान् पूजयेन्नृपः ॥२४

त्रयो लोकास्त्रयो वेदा आश्रमाश्च त्रयोऽग्नयः।
एतेषां रक्षणार्थाय संसृष्टा ब्राह्मणाः पुरा ॥२५

उभे सन्ध्ये समाधाय मौनं कुर्वन्ति ये द्विजाः।
दिव्यवर्षसहस्राणि स्वर्गलोके महीयते ॥२६

य एवं कुरुते राजा गुणदोषपरीक्षणम्।
यशः स्वर्गं नृपत्वञ्च पुनः कोषं समृद्धयेत् ॥२७

दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन कोषस्य च संप्रवृद्धिः।
अपक्षपातोऽर्थिषु राष्ट्ररक्षाःपञ्चैव यज्ञाः कथिता नृपाणाम्॥

यत् प्रजापालने पुण्यं प्राप्नुवन्तीह पार्थिवाः।
न तु क्रतुसहस्रेण प्राप्नुवन्ति द्विजोत्तमाः॥२९
अलाभे देवखातानां ह्रदेषु च सरःसु च।
उद्धृत्य चतुरः पिण्डान् पारके स्नानमाचरेत्॥३०
वसाशुक्रमसृङ्मज्जा मूत्रविट् कर्णविण्णखाः।
श्लेष्मास्थि दूषिकाः स्वेदो द्वादशैते नृणां मलाः॥३१
षण्णां षण्णां क्रमेणैव शुद्धिरुक्ता मनीषिभिः।
मृद्वारिभिश्च पूर्वेषामुत्तरेषान्तु वारिणा॥३२
शौचंमङ्गलमायासाअनसूयाऽस्पृहा दमः।
लक्षणानि च विप्रस्य तथा दानं दयापि च॥३३
न गुणान् गुणिनोहन्ति स्तौति चान्यान् गुणानपि।
न हसेच्चान्नदोषांश्च सानसूया प्रकीर्तिता॥ ३४
अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः।
आचारेषु व्यवस्थानं शौचमित्यभिधीयते॥३५
प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्।
एतद्धि मङ्गलं प्रोक्तमृषिभिर्धर्मदर्शिभिः॥३६
शरीरं पीड्यते येन शुभेन त्वशुभेन वा।
अत्यन्तं तन्न कुर्वीत अनायासः सउच्यते॥३७
यथोत्पन्नेन कर्त्तव्यं सन्तोषः सर्ववस्तुषु।
न स्पृहेत् परदारेषु साऽस्पृहा परिकीर्त्तिता॥३८
वाह्यमध्यात्मिकं वाऽपि दुःखमुत्पाद्यतेऽपरैः।
न कुप्यति न चाहन्ति दम इत्यभिधीयते॥३९

अहन्यहनि दातव्यमदीनेनान्तरात्मना।
स्तोकादपि प्रयत्नेन दानमित्यभिधीयते ॥४०
परस्मिन् बन्धुवर्गे वा मित्रे द्वेष्ये रिपौ तथा।
आत्मवद्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता ॥४१
यश्चैतैर्लक्षणैर्युक्तो गृहस्थोऽपि भवेद्द्विजः।
स गच्छति परं स्थानं जायते नेह वै पुनः ॥४२
अग्निहोत्रं तपः सत्यं वेदानाञ्चैव पालनम्।
आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ॥४३
वापीकूपतडागादि देवतायतनानि च।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते ॥४४
इष्टं पूर्त्तं प्रकर्त्तव्यं ब्राह्मणेन प्रयत्नतः।
इष्टेन लभते स्वर्गं पूर्त्तेन मोक्षमाप्नुयात् ॥४५
इष्टापूर्त्तौ द्विजातीनां सामान्यौ धर्मसाधनौ।
अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके ॥४६
यमान् सेवेत सततं न नित्यं नियमान् बुधः।
यमान् पतत्यकुर्व्वाणो नियमान् केवलान् भजन् ॥४७
आनृशंस्यं क्षमा सत्यमहिंसा दानमार्जवम्।
प्रीतिः प्रसादो माधुर्य्यं मार्दवञ्च यमा दश ॥४८
शौचमिज्या तपोदानं स्वाध्यायोपस्थनिग्रहः।
व्रतमौनोपवासाश्च स्नानञ्च नियमा दश ॥४९
प्रतिकृतिं कुशमयीं तीर्थवारिषु मज्जयेत्।
यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः ॥५०

मातरं पितरं वाऽपि भ्रातारं सुहृदं गुरुम् ।
यमुद्दिश्य निमज्जेत द्वादशांशफलं लभेत् ॥५१

अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा ।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः ॥५२

पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ।
ऋणमस्मिन् संनयति अमृतत्वञ्च गच्छति ॥५३

जातमात्रेण पुत्रेण पितॄणामनृणी पिता ।
तदह्नि शुद्धिमाप्नोति नरकात्त्रायते हि सः ॥५४

जायन्ते बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजते चाश्वमेधञ्च नीलं वा वृषमुत्सृजेत् ॥५५

काङ्क्षन्ति पितरः सर्वे नरकान्तरभीरवः ।
गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति ॥५६

फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरम् ।
गयाशीर्षं पदाऽऽक्रम्य मुच्यते ब्रह्महत्यया ॥५७

महानदीमुपस्पृश्य तर्पयेत् पितृदेवताः ।
अक्षयान् लभते लोकान् कुलञ्चैव समुद्धरेत् ॥५८

शङ्कास्थाने समुत्पन्ने भक्ष्यभोग (भोज्य) विवर्जिते ।
आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु ॥५९

अक्षारलवणं भैक्षं ( रौक्षं ) पिवेद्ब्राह्मीं सुवर्चसम ।
त्रिरात्रं शङ्खपुष्पीम्वा ब्राह्मणः पयसा सह ॥६०

मद्यभाण्डाद्द्विजः कश्चिदज्ञानात् पिबते जलम् ।
प्रायश्चित्तं कथं तस्य मुच्यते केन कर्मणा ॥६१

पलासबिल्वपत्राणि कुशान् पद्मान्युदुम्बरम्।
काथयित्वा पिबेदापस्त्रिरात्रेणैव शुद्ध्यति ॥६२
सायं प्रातस्तु यः सन्ध्यां प्रमादाद्विक्रमेत् सकृत्।
गायत्र्यास्तु सहस्रं हि जपेत् स्नात्वा समाहितः ॥६३
शोकाक्रान्तोऽथवा श्रान्तः स्थितः स्नान(स्थान)जपाद्बहिः।
ब्रह्मकूर्च्चं चरेद्भक्त्या दानं दत्त्वा विशुद्ध्यति ॥६४
गवां शृङ्गोदके स्नात्वा महानद्युपसङ्गमे।
समुद्रदर्शनेनैव व्यालदष्टः शुचिर्भवेत् ॥६५
वृकश्वानशृगालैस्तु यदि दष्टश्च ब्राह्मणः।
हिरण्योदकसंमिश्रं घृतं प्राश्य विशुद्ध्यति ॥६६
ब्राह्मणी तु शुना दष्टा जम्बुकेन वृकेण वा।
उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥६७
सव्रतश्च शुना दष्टस्त्रिरात्रमुपवासयेत्।
सघृतं यावकं प्राश्य व्रतशेषं समापयेत् ॥६८
मोहात् प्रमादात् संलोभाद्व्रतभङ्गं तु कारयेत्।
त्रिरात्रेणैव शुद्ध्येत पुनरेव व्रती भवेत् ॥६९
ब्राह्मणान्नं यदुच्छिष्टमश्नात्यज्ञानतो द्विजः।
दिनद्वयं तु गायत्र्या जपं कृत्वा विशुद्ध्यति ॥७०
क्षत्रियान्नं यदुच्छिष्टमश्नात्यज्ञानतोद्विजः।
त्रिरात्रेण भवेच्छुद्धिर्यथा क्षत्रे तथा विशि ॥७१
अभोज्यान्नं यथा भुक्त्वा(तु भुक्तान्नं)स्त्रीशूद्रोच्छिष्टमेव वा।
जग्ध्वा मांसमभक्ष्यन्तु सप्तरात्रं यवान् पिवेत् ॥७२

शुना चैव तु संस्पृष्टस्तस्य स्नानं विधीयते ।
तदुच्छिष्टन्तु संप्राश्य षण्मासान् कृच्छ्रमाचरेत् ॥७३
असंस्पृष्टेन संस्पृष्टः स्नानं तेन विधीयते ।
तस्य चोच्छिष्टमश्नीयात् षण्मासान कृच्छ्रमाचरेत् ॥७४
अज्ञानात् प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥७५
वपनं मेखला दण्डो भैक्षचर्यव्रतानि च ।
निवर्त्तन्ते द्विजातीनां पुनः संस्कारकर्मणि ॥७६
गृहशुद्धिं प्रवक्ष्यामि अन्तःस्थशवदूषिताम् ।
प्रायोज्यं मृण्मयं भाण्डं सिद्धमन्नं तथैव च ॥७७
गृहान्निष्क्रम्य तत्सर्वं गोमयेनोपलेपयेत् ।
गोमयेनोपलिप्याथ छागेनाघ्रापयेत् पुनः ॥७८
ब्राह्मैर्मन्त्रैस्तु पूतन्तु हिरण्यकुशवारिभिः ।
तेनैवाभ्युक्ष्य तद्वेश्म शुद्ध्यते नात्र संशयः ॥७९
राज्ञान्यैः श्वपचैर्वापि बलाद्विचालितो द्विजः ।
पुनः कुर्वीत संस्कारं पश्चात् कृच्छ्रत्रयञ्चरेत् ॥८०
शुना चैव तु संस्पृष्टस्तस्य स्नानं विधीयते ।
तदुच्छिष्टन्तु संप्राश्य यत्नेन कृच्छ्रमाचरेत् ॥८१
अतः परं प्रवक्ष्यामि सूतकस्य विनिर्णयम् ।
प्रायश्चित्तं पुनश्चैव कथयिष्याम्यतः परम् ॥८२
एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः ।
त्र्यहात् केवलवेदस्तु निर्गुणो दशभिर्दिनैः ॥८३

व्रतिनः शास्त्रपूतस्य आहिताग्नेस्तथैव च।
राज्ञस्तु सूतकं नास्ति यस्य चेच्छति ब्राह्मणः॥८४
ब्राह्मणो दशरात्रेण द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति॥८५
सपिण्डानान्तु सर्वेषां गोत्रजः साप्तपौरुषः।
पिण्डाश्चोदक दानञ्च शावाशौचं तथाऽनुगम्॥८६
चतुर्थे दशरात्रं स्यात् षडहः पञ्चमे तथा।
षष्ठे चैव त्रिरात्रं स्यात् सप्तमे त्र्यहमेव वा॥८७
अष्टमे दिनमेकन्तु नवमे प्रहरद्वयम्।
दशमे स्नानमात्रेण सूतके तु शुचिर्भवेत्॥८८
मृतसूतके तु दासीनां पत्नीनाञ्चानुलोमिनाम्।
स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौनिकम्॥८९
शवस्पृक्तृतीयस्तु सचैलः स्नानमाचरेत्।
चतुर्थे सप्तभैक्ष्यं स्यादेष शावविधिः स्मृतः॥९०
एकत्र संस्कृतानान्तु मातृणामेकभोजिनाम्।
स्वामितुल्यं भवेच्छौचं विभक्तानां पृथक्पृथक्॥९१
उष्ट्रीक्षीरमवीक्षीरं यद्यान्नं मृतसूतके।
पाचकान्नं नवश्राद्धं भुक्त्वा चान्द्रायणं चरेत्॥९२
सूतकान्नमधर्माय यस्तु प्राश्नाति मानवः।
त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत्॥९३
महायज्ञविधानन्तु न कुर्यान्मृतजन्मनि।
होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा॥९४

बालस्त्वन्तर्दशाहेतु पञ्चत्वं यदि गच्छति।
सद्यएव विशुद्धिः स्यान्न प्रेतं नैव सूतकम्॥९५
कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च।
स्वधाकारं प्रकुर्वीत नामोच्चारण मेव च॥९६
ब्रह्मचारी यतिश्चैवं मन्त्रे पूर्वकृते तथा।
यज्ञे विवाहकाले च सद्यः शौचं विधीयते॥९७
विवाहोत्सवयज्ञेष्वनन्तरामृतसूतके।
पूर्वसङ्कल्पितार्थस्य न दोषश्चात्रिरब्रवीत्॥९८
मृतसंजननादूर्द्ध्वं सूतकादौ विधीयते।
स्पर्शनाचमनाच्छुद्धिः सूतिकाञ्चेन्न संस्पृशेत्॥९९
पञ्चमेऽहनि विज्ञेयं संस्पर्शं क्षत्रियस्य तु।
सप्तमेऽहनि वैश्यस्य विज्ञेयं स्पर्शनं बुधैः॥१००
दशमेऽहनि शूद्रस्य कर्त्तव्यं स्पर्शनं बुधैः।
मासेनैवात्मशुद्धिः स्यात्सू सूतके मृतके तथा॥१०१
व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः॥१०२
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः।
स्वाध्यायव्रतहीनस्य सततं सूतकं भवेत्॥१०३
द्वे कृच्छ्रे परिवित्तेस्तु कन्यायाः कृच्छ्रमेव च।
कृच्छ्रातिकृच्छ्रं मातुः स्याद्धेत्तुः सान्तपनं स्मृतम्॥१०४
कुब्जवामनखञ्जेषु गर्हितेऽथ जडेषु च।
जात्यन्धबधिरे मूके न दोषः परिवेदने॥१०५

क्लीवे देशान्तरस्थे च पतिते व्रजितेऽपि वा।
योगशास्त्राभियुक्ते च न दोषः परिवेदने ॥१०६
पिता पितामहो यस्य अग्रजो वापि कस्यचित्।
नाग्निहोत्राधिकारोऽस्ति न दोषः परिवेदने ॥१०७
भार्यामरणपक्षे वा देशान्तरगतेऽपि वा।
अधिकारी भवेत् पुत्रस्तथा पातकसंयुते ॥१०८
ज्येष्ठो भ्राता यदा नष्टो नित्यं रोगसमन्वितः।
अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा ॥१०६
नाग्नयः परिविन्दन्ति न वेदा न तपांसि च।
न च श्राद्धं कनिष्ठो वै विना चैवाभ्यनुज्ञया ॥११०
तस्माद्धर्मं सदा कुर्याच्छ्रुतिस्मृत्युदितश्च यत्।
नित्यं नैमित्तिकं काम्यं यच्च स्वर्गस्य साधनम् ॥१११
एकैकं वर्द्धयेन्नित्यं शुक्ले कृष्णे च ह्रासयेत्।
अमावास्यां न भुञ्जीत एष चान्द्रायणोविधिः ॥११२
एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्।
त्र्यहं परञ्च नाश्नीयादतिकृच्छ्रं तदुच्यते ॥११३
इत्येतत् कथितं पूर्वैर्महापातकनाशनम्।
वेदाभ्यासरतं क्षान्तं महायज्ञक्रियापरम् ॥११४
न स्पृशन्तीह पापानि महापातकजान्यपि।
वायुभक्षो दिवा तिष्ठद्रात्रिञ्चैवाप्सु सूर्यदृक् ॥११५
जप्त्वा सहस्रं गायत्र्याः शुद्धिर्ब्रह्मवधादृते।
पद्मोडुम्बरविल्वैश्च कुशाश्वत्थपलाशयोः ॥११६

एतेषामुदकं पीत्वा पर्णकृच्छ्रन्तदुच्यते।
पञ्चगव्यञ्च गोक्षीरदधिमूत्रशकृद्घृतम् ॥११७
जग्ध्वा परेऽह्न्युपवसेदेष सान्तपनो विधिः।
पृथक्सान्तपनैर्द्रव्यैः षडहः सोपवासकः ॥११८
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनं स्मृतम्।
त्र्यहं सायं त्र्यहं प्रातस्त्र्यहं भुङ्क्ते त्वयाचितम् ॥११९
त्र्यहं परञ्च नाश्नीयात् प्राजापत्योविधिः स्मृतः।
सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ॥१२०
अयाचिते चतुर्विंशः परेऽह्न्यनशनं स्मृतम्।
कुक्कुटाण्डप्रमाणं स्याद्यावद्यस्य मुखं विशेत् ॥१२१
एतद्ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम्।
त्र्यहमुष्णं पिवेदापस्त्र्यहमुष्णं पिवेत् पयः ॥१२२
त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो दिनत्रयम्।
षट्पलानि पिवेदापस्त्रिपलं तु पयः पिवेत् ॥१२३
पलमेकन्तु वै सर्पिस्तप्तकृच्छ्रं विधीयते।
दध्ना च त्रिदिनंभुङ्क्ते त्र्यहं भुङ्क्ते च सर्पिषा ॥१२४
क्षीरेण तु त्र्यहं भुङ्क्ते वायुभक्षो दिनत्रयम्।
त्रिपलं दधिक्षीरेण पलमेकं तु सर्पिषा ॥१२५
एतदेव व्रतं पुण्यं वैदिकं कृच्छ्रमुच्यते।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥१२६
उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः।
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम् ॥१२७

द्वादशाहोपवासेन पराकः परिकीर्त्तितः ।
पिण्याकदधिशक्तूनां ग्रासश्च प्रतिवासरम् ॥१२८
एकैकमुपवासः स्यात् सौम्यकृच्छ्रः प्रकीर्त्तितः ।
एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् ॥१२६
तुलापुरुषइत्येष ज्ञेयः पञ्चदशाहिकः ।
कपिलागोस्तु दुग्धाया धारोष्णं यत्पयः पिवेत् ॥१३०
एष व्यासकृतः कृच्छ्रः श्वपाकमपि शोधयेत् ।
निशायां भोजनञ्चैव तज्ज्ञेयं नक्तमेव तु ॥१३१
अनादिष्टेषु पापेषु चान्द्रायण मथोदितम् ।
अग्निष्टोमादिभिर्यज्ञैरिष्टैर्द्विगुणदक्षिणैः ॥१३२
यत्फलं समवाप्नोति तथा कृच्छ्रैस्तपोधनः ।
वेदाभ्यासरतः क्षान्तो धर्मशास्त्राण्यवेक्षयेत् ॥१३३
शौचाचारसमायुक्तो गृहस्थोऽपि हि मुच्यते ।
उक्तमेतद्द्विजातीनां महर्षे ! श्रूयतामिति ॥१३४
अतः परं प्रवक्ष्यामि स्त्रीशूद्रपतनानि च ।
जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् ॥१३५
देवताराधनञ्चैव स्त्रीशूद्रपतनानि षट् ।
जीवद्भर्त्तरि या नारी उपोष्य व्रतचारिणी ॥१३६
आयुष्यं हरते भर्त्तुः सा नारी नरकं व्रजेत् ।
तीर्थस्नानार्थिनी नारी पतिपादोदकं पिवेत् ॥१३७
शङ्करस्यापि विष्णोर्वा प्रयाति परमं पदम् ।
जीवद्भर्त्तरि वामाङ्गी मृते वापि सुदक्षिणे ॥१३८

श्राद्धे यज्ञे विवाहे च पत्नी दक्षिणतः सदा।
सोमः शौचं ददौ तासां गन्धर्वाश्च तथाङ्गिराः ॥१३६
पावकः सर्वमेध्यं च मेध्यं वै योषितां सदा।
जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ॥१४०
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च।
वेदशास्त्राण्यधीते यः शास्त्रार्थञ्च निषेवते ॥१४१
तदासौ वेदवित् प्रोक्तो वचनन्तस्य पावनम्।
एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः ॥१४२
स ज्ञेयः परमो धर्मो नाज्ञानामयुतायुतैः।
पावकाइव दीप्यन्ते जपहोमैर्द्विजोत्तमाः ॥१४३
प्रतिग्रहेण नश्यन्ति वारिणा इव पावकः।
तान् प्रतिग्रहजान् दोषान् प्राणायामैर्द्विजोत्तमाः ॥१४४
उत्सादयन्ति विद्वांसो वायुर्मेघानिवाम्बरे।
भुक्त्वाचम्य यदा विप्र आर्द्रपाणिस्तु तिष्ठति ॥१४५
लक्ष्मीर्बलं यशस्तेज आयुश्चैव प्रहीयते।
यस्तु भोजनशालायामासनस्थ उपस्पृशेत् ॥१४६
तस्यान्नं नैव भोक्तव्यं भुक्त्वा चान्द्रायणञ्चरेत्।
पात्रोपरिस्थितं पात्रं यः संस्थाप्य उपस्पृशेत् ॥१४७
तस्यान्नं नैव भोक्तव्यं भुक्त्वा चान्द्रायणञ्चरेत्।
न देवास्तृप्तिमायान्ति दातुर्भवति निष्फलम् ॥१४८
हस्तं प्रक्ष्याल्य यस्त्वापः पिवेद्भुक्त्वा द्विजोत्तमः।
तदन्नमसुरैर्भुक्तं निराशाः पितरो गताः ॥१४९

नास्ति वेदात् परं शास्त्रं नास्ति मातुः परो गुरुः।
नास्ति दानात् परं मित्रमिह लोके परत्र च ॥१५०

अपात्रे ह्यपि यद्दत्तं दहत्यासप्तमं कुलम्।
हव्यं देवा न गृह्णन्ति कव्यञ्च पितरस्तथा ॥१५१

आयसेन तु पात्रेण यदन्नमुपदीयते।
अन्नं विष्ठासमं भोक्तुर्दाता च नरकं व्रजेत् ॥१५२

इतरेण तु पात्रेण दीयमानं विचक्षणः।
न दद्याद्वामहस्तेन आयसेन कदाचन ॥१५३

मृण्मयेषु च पात्रेषु यः श्राद्धे भोजयेत् पितॄन्।
अन्नदाता च भोक्ता च तावेव नरकं व्रजेत् ॥१५४

अभावे मृण्मये दद्यादनुज्ञातस्तु तैर्द्विजैः।
तेषां वचः प्रमाणं स्याद्दत्तश्चानृतमेव च ॥१५५

सौवर्णायसताम्रेषु कांस्यरौप्यमयेषु च।
भिक्षादातु न धर्मोऽस्ति भिक्षुर्भुङ्क्ते तु किल्विषम् ॥१५६

न च कांस्येषु भुञ्जीयादापद्यपि कदाचन।
पलाशे यतयोऽश्नन्ति गृहस्थः कांस्यभाजने ॥१५७

कांस्यकस्य च यत्पापं गृहस्थस्य तथैव च।
कांस्यभोजी यतिश्चैव प्राप्नुयात् किल्विषं तयोः ॥१५८

अत्राप्युदाहरन्ति ॥

सौवर्णायसताम्रेषु कांस्यरौप्यमयेषु च।
भुञ्जन् भिक्षुर्न दूष्येत दूष्येच्चैव परिग्रहात् ॥१५९

यतिहस्ते जलं दद्याद्भिक्षां दद्यात् पुनर्जलम्।
तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम् ॥१६०
चरेन्माधुकरीं वृत्तिमपि म्लेच्छकुलादपि।
एकान्नं नैव भोक्तव्यं बृहस्पतिकुलादपि ॥१६१
अनापदि चरेद्यस्तु सिद्धं भैक्षं गृहे वसन्।
दशरात्रं पिबेद्भक्तमापस्तु त्र्यहमेव च ॥१६२
गोमूत्रेण तु संमिश्रं यावकं घृतपाचितम्।
एतद्भक्तमिति प्रोक्तं भगवानत्रिरब्रवीत् ॥१६३
ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥१६४
यक्ष्मासान् (षण्मासान्)कामयेन्मर्त्यो गर्भिणीमेव च स्त्रियम्।
आ दन्तजननादूर्ध्वमेष धर्मो विधीयते ॥१६५
ब्रह्महा प्रथमञ्चैव द्वितीयं गुरुतल्पगः।
तृतीयन्तु सुरापोऽयं चतुर्थं स्तेयमुच्यते ॥१६६
(आपो गावस्तिलाभूमिर्गन्धो वा स्तेयते तथा।)
पापानाञ्चैव संसर्गः पञ्चमं पातकं महत्।
एषामेव विशुद्ध्यर्थं चरेद्वर्षा(कृच्छ्रा)ण्यनुक्रमात् ॥१६७
त्रीणि कृच्छ्राण्यकामश्चेद्ब्रह्महत्यां व्यपोहति।
अर्द्धन्तु ब्रह्महत्यायाः क्षत्त्रियेषु विधीयते ॥१६८
षड्भागो द्वादशश्चैव विट्शूद्रयोस्तथा भवेत्।
त्रीन् मासान्भक्तमश्नीयाद्भूमौ शयनमेव च ॥१६९
स्त्रीघातः शुद्ध्यतेऽप्येवं चरेत् कृच्छ्राब्दमेव च।
रजकः शैलुषश्चैव वेणुकर्मोपजीवनः ॥१७०

एतेषां यस्तु भुङ्क्ते वै द्विजश्चान्द्रायणञ्चरेत्।
सर्व्वान्त्यजानां गमने भोजने सम्प्रवेशने ॥१७१
पराकेण विशुद्धिः स्याद्भगवानत्रिरब्रवीत्।
चाण्डालभाण्डे यत्तोयं पीत्वा चैव द्विजोत्तमः॥१७२
गोमूत्रयाबकाहारः सप्तत्रिंशदहान्यपि।
संस्पृष्टं यस्तु पक्वान्नमन्त्यजैर्वाऽप्युदक्यया ॥१७३
अज्ञानाद्ब्राह्मणोऽश्नीयात् प्राजापत्यार्धमाचरेत्।
चाण्डालान्नं यदा भुङ्क्ते चातुर्वर्णस्य निष्कृतिः॥१७४
चान्द्रायणं चरेद्विप्रः क्षत्रः सान्तपनं चरेत्।
षड्रात्रमाचरेद्वैश्यः पञ्चगव्यं तथैव च ॥१७५
त्रिरात्रमाचरेच्छूद्रो दानं दत्त्वा विशुद्ध्यति।
ब्राह्मणो वृक्षमारूढश्चाण्डालो मूलसंस्पृशः॥१७६
फलान्यत्ति स्थितस्तत्र प्रायश्चित्तं कथं भवेत्।
ब्राह्मणान् समनुज्ञाप्य सवासाः स्नानमाचरेत्॥१७७
नक्तभोजी भवेद्विप्रो घृतं प्राश्य विशुद्ध्यति।
एकवृक्षसमारूढश्चाण्डालो ब्राह्मणस्तथा ॥१७८
फलान्यत्ति स्थितं तत्र प्रायश्चित्तं कथं भवेत्।
ब्राह्मणान् समनुज्ञाप्य सवासाः स्नानमाचरेत्॥१७९
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति।
एकशाखासमारूढश्चाण्डालो ब्राह्मणो यदा ॥१८०
फलान्यत्ति स्थितस्तत्र प्रायश्चित्तं कथं भवेत्।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति॥१८१

स्त्रिया म्लेच्छस्य सम्पर्काच्छुद्धिः सान्तपने तथा ।
तप्तकृच्छ्रं पुनः कृत्वा शुद्धिरेषाऽभिधीयते ॥१८२
सम्वर्त्तं यथा भार्यां गत्वा म्लेच्छस्य सङ्गताम् ।
सचैलं स्नानमादाय घृतस्य प्राशनेन च ॥१८३
स्नात्वा नद्युदकेश्चैव घृतं प्राश्य विशुद्ध्यति ।
संगृहीतामपत्यार्थमन्यैरपि तथा पुनः ॥१८४
चाण्डालम्लेच्छश्वपचकपालव्रतधारिणः ।
अकामतः स्त्रियो गत्वा पराकेग विशुद्ध्यति ॥१८५
कामतस्तु प्रसूतो वा तत्समो नात्र संशयः ।
स एव पुरुष स्तत्र गर्भो भूत्वा प्रजायते ॥१८६
तैलाभ्यक्तो घृताभ्यक्तो विण्मूत्रं कुरुते द्विजः ।
तैलाभ्यक्तो घृताभ्यक्तश्चाण्डालं स्पृशते द्विजः ॥१८७
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ।
केशकीटनखस्नायु अस्थिकण्टकमेव च ॥१८८
स्पृष्ट्वा नद्युदके स्नात्वा घृतं प्राश्य विशुद्ध्यति ।
मत्स्यास्थिजम्बुकास्थीनि नखशुक्तिकपर्दिकाः ॥१८९
स्पृष्ट्वा स्नात्वा हेमतप्तघृतं पीत्वा विशुद्ध्यति ।
गोकुले कन्दुशालायां तैलचक्रेक्षुचक्रयोः ॥१९०
अमोमांस्यानि शौचानि स्त्रीणाञ्च व्याधितस्य च ।
न स्त्री दूष्यति जारेण ब्राह्मणोऽवेदकर्मणा ॥१९१
नाऽऽपो मूत्रपुरीषाभ्यां नाग्निर्दहति कर्मणा ।
पूर्वं स्त्रिय सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः ॥१९२

भुञ्जते मानवाः पश्चान्न ता दुष्यन्ति कर्हिचित्।
असवर्णैस्तु यो गर्भः स्त्रीणां योनौ निषिच्यते ॥१९३
अशुद्धा सा भवेन्नारी यावद्गर्भं (गर्भं) न मुञ्चति।
विमुक्ते तु ततः शल्ये रजश्चापि प्रदृश्यते ॥१९४
तदा सा शुद्ध्यते नारी विमलं काञ्चनं यथा।
स्वयं विप्रतिपन्ना या यदि वा विप्रतारिता ॥१९५
बलान्नारी प्रभुक्ता वा चौरभुक्ता तथाऽपि वा।
न त्याज्या दूषिता नारी न कामोऽस्या विधीयते॥ १९६
ऋतुकाल उपासीत पुष्पकालेन शुद्ध्यति।
रजकश्चर्मकारश्च नटो वुरुड एव च ॥१९७
कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः।
एषां गत्वा स्त्रियो मोहाद्भुक्त्वा च प्रतिगृह्य च ॥१९८
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम्।
सकृद्भुक्ता (क्त्वा) तु या नारी म्लेच्छैर्या पापकर्मभिः ॥१९९
प्राजापत्येन शुद्ध्येत ऋतुप्रसवणेन तु।
बलाद्धृता स्वयं वाऽपि परप्रेरितया यदि ॥२००
सकृद्भुक्ता तु या नारीप्राजापत्येन (शुद्ध्यति) गृह्णति।
प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ॥२०१
न तेन तद्व्रतं तासां विनश्यति कदाचन।
मद्यसंस्पृष्टकुम्भेषु यत्तोयं पिबति द्विजः ॥२०२
कृच्छ्रपादेन शुद्ध्येत पुनः संस्कारमर्हति।
अन्त्यजस्य तु ये वृक्षा बहुपुष्पफलोपगाः ॥२०३

उपभोग्यास्तु ते सर्वे पुष्पेषु च फलेषु च ।
चाण्डालेन तु संस्पृष्टं यत्तोयं पिबति द्विजः ॥२०४
कृच्छ्रपादेन शुद्ध्येत आपस्तम्बोऽब्रवीन्मुनिः ।
श्लेष्मोपानहविण्मूत्रस्त्रीरजोमद्यमेव च ॥२०५
एभिः सन्दूषिते कूपे तोयं पीत्वा कथं विधिः ।
एकं द्व्यहं त्र्यहञ्चैव द्विजातीनां विशोधनम् ॥२०६
प्रायश्चित्तं पुनश्चैव नक्तं शूद्रस्य दापयेत् ।
सद्यो वान्ते सचैलं तु विप्रस्तु स्नानमाचरेत् ॥२०७
पर्युषिते त्वहोरात्रमतिरिक्ते दिनत्रयम् ।
शिरःकण्ठोरुपादांश्च सुरया यस्तु लिप्यते ॥२०८
दशषट्त्रितथैकाहं चरेदेवमनुक्रमात् ।

अत्राप्युदाहरन्ति ॥

प्रमादान्मद्यपः सुरां सकृत्पीत्वा द्विजोत्तमः ।
गोमूत्रयावकाहारो दशरात्रेण शुद्ध्यति ॥२०९
मद्यपस्य निषादस्य यस्तु भुङ्क्ते द्विजोत्तमः ।
न देवा भुञ्जते तत्र न पिबन्ति हविर्जलम् ॥२१०
चितिभ्रष्टा तु या नारी ऋतुभ्रष्टा च व्याधितः ।
प्राजापत्येन शुध्येत ब्राह्मणान् भोजयेद्दश ॥२११
ये च प्रव्रजिता विप्राः प्रव्रज्याग्निजलावहाः ॥२१२
अनाशकान्निवर्त्तन्ते चिकीर्षन्ति गृहस्थितिम् ।
धारयेत्त्रीणि कृच्छ्राणि चान्द्रायणमथापि वा ॥२१३
जातकर्मादिकं प्रोक्तं पुनः संस्कारमर्हति ।
नाशौचं नोदकं नाश्रु नोपवादानुकम्पने ॥२१४

ब्रह्मदण्डहतानां तु न कार्यं कटधारणम् ।
स्नेहं कृत्वा भयादिभ्यो यस्त्वेतानि समाचरेत् ॥२१५
गोमूत्रयावकाहारः कृच्छ्रमेकं विशोधनम् ।
वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ॥२१६
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ।
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयम् ॥२१७
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् ।
यस्यैकाऽपि गृहे नास्ति धेनुर्वत्सानुचारिणी ॥२१८
मङ्गलानि कुतस्तस्य कुतस्तस्य तमःक्षयः ।
अतिदोहातिवाहाभ्यां नासिकाभेदनेन वा ॥२१९
नदीपर्वतसंरोधे मृते पादोनमाचरेत् ।
अष्टागवं धर्महलं षड्गवं व्यावहारिकम् ॥२२०
चतुर्गवं नृशंसानां द्विगवं (वध्यते सह) गवबध्यकृत् ।
द्विगवं वाहयेत् पादं मध्याह्नं तु चतुर्गवम् ॥२२१
षड्गवं तु त्रिपादोक्तं पूर्णाहस्त्वष्टभिः स्मृतः ।
काष्ठलोष्ट्रशिलागोघ्नः कृच्छ्रं सान्तपनञ्चरेत् ॥२२२
प्राजापत्यं चरेन्मृत्सा (?) अतिकृच्छ्रन्तु आयसैः ।
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥२२३
अनुडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम् ।
शरभोष्ट्रहयान्नागान् सिंहशार्दूलगर्दभान् ॥२२४
हत्वा च शूद्रहत्यायाः प्रायश्चित्तं विधीयते ।
मार्जारगोधानकुलमण्डूकांश्च पतत्त्रिणः ॥२२५

हत्वा त्र्यहं पिबेत् क्षीरं कृच्छ्रं वा पादिकञ्चरेत् ।
चाण्डालस्य च संस्पृष्टं विण्मूत्रस्पृष्टमेव वा ॥२२६

त्रिरात्रेण विशुद्धिः स्याद्भुक्त्वोच्छिष्टं (समा) तथाचरेत् ।
वापीकूपतडागानां दूषितानाञ्च शोधनम् ॥२२७

उद्धरेद्घटशतं पूर्णं पञ्चगव्येन शुद्ध्यति ।
अस्थिचर्मावसिक्तेषु खरश्वानादिदूषिते ॥२२८

उद्धरेदुदकं सर्वं शोधनं परिमार्जनम् ॥२२९

गोदोहने चर्मपुटे च तोयं यन्त्राकरे कारुकशिल्पिहस्ते ।
स्त्रीबालवृद्धाचरितानि यान्यप्रत्यक्षदृष्टानि शुचीनि तानि ॥२३०

प्राकाररोधे विषमप्रदेशे सेनानिवेशे भवनस्य दाहे ।
आरब्धयज्ञेषु महोत्सवेषु तथैव दोषा न विकल्पनीयाः ॥२३१

प्रपास्वरण्ये भढकस्य(घटकस्य)कूपे द्रोण्यां जलं कोशविनिर्गतञ्च ।
श्वपाकचण्डालपरिग्रहे तु पित्वा जलं पञ्चगव्येन शुद्धिः ॥२३२

रेतोविण्मूत्रसंस्पृष्टं कौपं यदि जलं पिबेत् ।
त्रिरात्रेणैव शुद्धिः स्यात् कुम्भे सान्तपनं तथा ॥२३३

क्लिन्नभिन्नशवं यत् स्यादज्ञानादुदकं पिबेत् ।
प्रायश्चित्तं चरेत् पीत्वा तप्तकृच्छ्रं द्विजोत्तमः ॥२३४

उष्ट्रीक्षीरं खरीक्षीरं मानुषीक्षीरमेव च ।
प्रायश्चित्तं चरेत् पीत्वा तप्तकृच्छ्रं द्विजोत्तमः ॥२३५

वर्णबाह्येन संस्पृष्ट उच्छिष्टस्तु द्विजोत्तमः ।
पञ्चरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥२३६

शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् ।
चर्मभाण्डैस्तु धाराभिस्तथा यन्त्रोद्धृतं जलम् ॥२३७
चण्डालेन तु संस्पृष्टः (ष्टे) स्नानमेव विधीयते ।
उच्छिष्टस्तु च संस्पृष्टस्त्रिरात्रेणैव शुद्ध्यति ॥२३८
आकराहृतवस्तूनि नाशुचीनि कदाचन ।
आकराः शुचयः सर्वे वर्जयित्वा सुराकरम् ॥२३९
भ्र(भृ)ष्टाभ्र(भृ)ष्टयवाश्चैव तथैव चणकाः स्मृताः ।
खर्जूरञ्चैव कर्पूरमन्यद्भ्र(भृ)ष्टतरं शुचि ॥२४०
अमीमांस्यानि शौचानि स्त्रीभिराचरितानि च ।
अदुष्टाः सततं धारा वातोद्धूताश्च रेणवः ॥२४१
बहूनामेव(क) लग्नानामेकश्चेदशुचिर्भवेत् ।
अशौचमेकमात्रस्य नेतरेषां कथञ्चन ॥२४२
एकपङ्क्त्युपविष्टानां भोजनेषु पृथक् पृथक् ।
यद्येको लभते नीलीं सर्वे तेऽशुचयः स्मृताः ॥२४३
यस्य पटे पट्टसूत्रे नीलीरक्तो हि दृश्यते ।
त्रिरात्रं तस्य दातव्यं शेषाश्चैवोपवासिनः ॥२४४
आदित्येऽस्तमिते रात्रावस्पृश्यं स्पृशते यदि ।
भगवन् ! केन शुद्धिः स्यात्ततो ब्रूहि तपोधन ॥२४५
आदित्येऽस्तमिते रात्रौ स्पृशन् हीनं दिवा जलम् ।
तेनैव सर्व शुद्धिः स्याच्छवस्पृष्टन्तु वर्जयेत् ॥२४६
देशंकालं वयः शक्तिं पापञ्चावेक्ष्ययेत्त(श्य यत्न)तः ।
प्रायश्चित्तं प्रकल्प्यं स्याद्यस्य चोक्ता न निष्कृतिः ॥२४७

देवयात्राविवाहेषु यज्ञप्रकरणेषु च ।
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न विद्यते ॥२४८
आरनालं तथा क्षीरं कन्दुकं दधिसक्तवः ।
स्नेहपक्वश्च तक्रश्च शूद्रस्यापि न दूष्यति ॥ २४६
आर्द्रमांसं घृतं तैलं स्नेहाश्च फलसम्भवाः ।
अन्त्यभाण्डस्थिता एते निष्क्रान्ताः शुद्धिमाप्नुयुः ॥२५०
अज्ञानात् पिवते तोयं ब्राह्मणः शूद्रजातिषु ।
अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुद्ध्यति ॥२५१
आहिताग्निस्तु यो विप्रो महापातकवान् भवेत् ।
अप्सु प्रक्षिप्य पात्राणि पश्चादग्निं विनिर्दिशेत् ॥ २५२
योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते ।
अन्नं तस्य न भोक्तव्यं वृथापाको हि सः स्मृतः ॥२५३
वृथापाकस्य भुञ्जानः प्रायश्चित्तं चरेद्द्विजः ।
प्राणानप्सु त्रिराचम्य घृतं प्राश्य विशुद्ध्यति ॥ २५४
वैदिके लौकिके वाऽपि हुतोच्छिष्टे जले क्षितौ ।
वैश्वदेवं प्रकुर्वीत पञ्चसूनापनुत्तये ॥२५५
कनीयान् गुणवान् श्रेष्ठः श्रेष्ठश्चेन्निर्गुणो भवेत् ।
पूर्वं पाणिं गृहीत्वा च गृह्याग्निं धारयेद्बुधः ॥२५६
ज्येष्ठश्चेद्यदि निर्दोषो गृह्णीयादग्निं(यवीयकः)मग्रतः ।
नित्यं नित्यं भवेत्तस्य ब्रह्महत्या न संशयः ॥२५७
महापातकसंस्पृष्टः (ष्टे) स्नानमेव विधीयते ।
संस्पृष्टस्य यदा भुङ्क्ते स्नानमेव विधीयते ॥२५८

पतितैः सह संसर्गं मासार्द्धं मासमेव वा।
गोमूत्रयावकाहारो मासार्धेन विशुध्यति॥२५९
कृच्छ्रार्धं पतितस्यैव सकृद्भुक्त्वा द्विजोत्तमः।
अविज्ञानाच्च तद्भुक्त्वा कृच्छ्रं सान्तपनञ्चरेत्॥२६०
पतितान्नं यदा भुक्तं भुक्तं चाण्डालवेश्मनि।
मासार्धन्तु पिवेद्वारि इति शातातपोऽब्रवीत्॥२६१
गोब्राह्मणहतानाञ्च पतितानां तथैव च।
अग्निना न च संस्कारः शङ्खस्य वचनं यथा॥२६२
यश्चाण्डालीं द्विजो गच्छेत् कथञ्चित् काममोहितः।
त्रिभिः कृच्छ्रैर्विशुध्येत प्राजापत्यानुपूर्वशः॥२६३
पतिताच्चान्नमादाय भुक्त्वा वा ब्राह्मणो यदि।
कृत्वा तस्य समुत्सर्गमतिकृच्छ्रं विनिर्दिशेत्॥२६४
अन्त्यहस्ताच्छवे क्षिप्तं (प्त) काष्ठलोष्ट्रतृणानि च।
न स्पृशेत्तु तथोच्छिष्टमहोरात्रं समाचरेत्॥२६५
चाण्डालं पतितं म्लेच्छं मद्यभाण्डं रजस्वलाम्।
द्विजः स्पृष्ट्वा न भुञ्जीत भुञ्जानो यदि संस्पृशेत्॥२६६
अतः परं न भुञ्जीत त्यक्त्वाऽन्नं स्नानमाचरेत्।
ब्राह्मणैः समनुज्ञात स्त्रिरात्रमुपवासयेत्॥२६७
सघृतं यावकं प्राश्य व्रतशेषं समापयेत्॥
भुञ्जानः संस्पृशेद्यस्तु वायसं कुक्कुटं तथा।
त्रिरात्रेणैव शुद्धिः स्यादथोच्छिष्टस्त्वहेन तु (!)॥२६८

आरूढो नैष्ठिके धर्मे यस्तु प्रच्यवते पुनः ।
चान्द्रायणं चरेन्मासमिति शातातपोऽब्रवीत् ।।२६६
पशुवेश्याभिगमने प्राजापत्यं विधीयते ।
गवां गमने मनुप्रोक्तं व्रतं चान्द्रायणञ्चरेत् ।।२७०
अमानुषीषु गोवर्जमुदक्यायामयोनिषु ।
रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनञ्चरेत् ।।२७१
उदक्यां सूतिकां वाऽपि अन्त्यजां स्पृशते यदि ।
त्रिरात्रेणैव शुद्धिः स्याद्विधिरेष पुरातनः ।।२७२
संसर्गं यदि गच्छेच्चेदुदक्याया तथाऽन्त्यजैः ।
प्रायश्चित्ती स विज्ञेयः पूर्वं स्नानं समाचरेत् ।।२७३
एकरात्रञ्चरेन्मूत्रं पुरीषं तु दिनत्रयम् ।
दिनत्रयं तथा पाने मैथुने पञ्च सप्त वा ।।२७४
भोजने तु प्रसक्तानां प्राजापत्यं विधीयते ।
दन्तकाष्ठे त्वहोरात्रमेष शौचविधिः स्मृतः ।।२७५
रजस्वला यदा स्पृष्टा श्वानचण्डालवायसैः ।
निराहारा भवेत्तावत् स्नात्वा कालेन शुद्ध्यति ।।२७६
रजस्वला यदा स्पृष्टा उष्ट्रजम्बुकशम्बरैः ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ।।२७७
स्पृष्टं (ष्टा) रजस्वलाऽन्योन्यं ब्राह्मण्या ब्राह्मणी च या ।
एकरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ।।२७८
स्पृष्टा रजस्वलाऽन्योन्यं ब्राह्मण्या क्षत्रियी च या ।
त्रिरात्रेण विशुद्धिः स्याद्व्यासस्य वचनं यथा ।।२७९

स्पृष्टा रजस्वलाऽन्योन्यं ब्राह्मण्या वैश्यसम्भवा।
चतूरात्रं निराहारा पञ्चगव्येन शुद्धयति ॥२८०
स्पृष्टा रजस्वलाऽन्योन्यं ब्राह्मण्या शूद्रसम्भवा।
षड्रात्रेण विशुद्धिः स्याद्ब्राह्मणीकामकारतः॥२८१
अकामतश्चरेदेवं ब्राह्मणी सर्वतः स्पृशेत्॥
चतुर्णामपि वर्णानां शुद्धिरेषा प्रकीर्तिता॥२८२
उच्छिष्टेन तु संस्पृष्टो ब्राह्मणो ब्राह्मणेन यः।
भोजने मूत्रचारे च शङ्खस्य वचनं यथा॥२८३
स्नानं ब्राह्मणसंस्पर्शे जपहोमौ तु क्षत्रिये।
वैश्ये नक्तञ्च कुर्वीत शूद्रे चैव उपोषणम्॥२८४
चर्मको रजको वैण्यो धीवरो नटकस्तथा।
एतान् स्पृष्ट्वा द्विजो मोहादाचामेत् प्रयतोऽपिसन्॥२८५
एतैः स्पृष्टो द्विजो नित्यमेकरात्रं पयः पिवेत्।
उच्छिष्टैस्तैस्त्रिरात्रं स्याद्घृतं प्राश्य विशुद्धयति॥२८६
यस्तु छायां श्वपाकस्य ब्राह्मणस्त्वधिगच्छति।
तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुद्धयति॥२८७
अभिशस्तो द्विजोऽरण्ये ब्रह्महत्याव्रतं चरेत्।
मासोपवासं कुर्वीत चान्द्रायणमथापि वा॥२८८
वृथा मिथ्योपयोगेन भ्रूणहत्याव्रतञ्चरेत्।
अब्भक्षो द्वादशाहेन पराकेणैव शुद्धयति॥२८९
शठश्च ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत्।
निर्गुणं सगुणो हत्वा पराकव्रतमाचरेत्॥२९०

उपपातकसंयुक्तो मानवो म्रियते यदि ।
तस्य संस्कारकर्ता च प्राजापत्यद्वयञ्चरेत् ॥२६१

प्रभुञ्जानोऽतिसस्नेहं कदाचित् स्पृशते द्विजः ।
त्रिरात्रमाचरेन्नक्तैर्निःस्नेहमथ वा चरेत् ॥२६२

विडालकाकाद्युच्छिष्टं जग्ध्वा श्वनकुलस्य च ।
केशकीटावपन्नञ्च पिवेद्ब्राह्मीं सुवर्चसम् ॥२६३

उष्ट्रयानं समारुह्य खरयानञ्च कामतः ।
स्नात्वाविप्रो(स्व-दि-वासा)जितश्वासःप्राणायामेन शुद्ध्यति ॥

सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदा(वा)यतःप्राणः प्राणायामः स उच्यते ॥२६५

सकृद्द्विगुणगोमूत्रं सर्पिर्दद्याच्चतुर्गुणम् ।
क्षीरमष्टगुणं देयं पञ्चगव्ये तथा दधि ॥२६६

पञ्चगव्यं पिवेच्छूद्रो ब्राह्मणस्तु सुरां पिवेत् ।
उभौ तौ तुल्यदोषौ च वसतो नरके चिरं ॥२६७

अजा गावो महिष्यश्च अमेध्यं भक्षयन्ति याः ।
दुग्धं हव्ये च कव्ये च गोमयं न विलेपयेत् ॥२६८

ऊनस्तनीमधिकां वा या चान्या स्तनपायिनी ।
तासां दुग्धं न होतव्यं हुतं चैवाहुतं भवेत् ॥२६६

ब्राह्मौदने च सोमे च सीमन्तोन्नयने तथा ।
जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत् ॥३००

राजान्नं हरते तेजः शूद्रान्नं ब्रह्मवर्चसम् ।
स्वसुतान्नञ्च यो भुङ्क्ते स भुङ्क्ते पृथिवीमलम् ॥३०१

स्वसुता अप्रजा तावन्नाश्नीयात्तद्गृहे पिता ।
अन्नं भुङ्क्ते तु यो मोहात्पूयं स नरकं व्रजेत् ॥३०२
अधीत्य चतुरो वेदान् सर्वशास्त्रार्थतत्त्ववित् ।
नरेन्द्रभवने भुक्त्वा विष्ठायां जायते कृमिः ॥३०३
नवश्राद्धे त्रिपक्षे च षण्मासे मासिकेऽब्दिके ।
पतन्ति पितरस्तस्य यो भुङ्क्तेऽनापदि द्विजः ॥३०४
चान्द्रायणं नवश्राद्धे पराको मासिके तथा ।
त्रिपक्षे चैव कृच्छ्रः स्यात् षण्मासे कृच्छ्रमेव च ।
आब्दिके पादकृच्छ्रः स्यादेकाहः पुनराब्दिके ॥३०५
ब्रह्मचर्यमनाधाय मासश्राद्धेषु पर्वसु ।
द्वादशाहे त्रिपक्षेऽब्दे यस्तु भुङ्क्ते द्विजोत्तमः ॥३०६
पतन्ति पितरस्तस्य ब्रह्मलोके गता अपि ॥३०७
एकादशाहेऽहोरात्रं भुक्त्वा संचयने त्र्यहम् ।
उपोष्य विधिवद्विप्रः कुष्माण्डीं जुहुयाद्घृतम् ॥३०८
पक्षे वा यदि वा मासे यस्य नाश्नन्ति वै द्विजाः ।
भुक्त्वा दुरात्मनस्तस्य द्विजश्चान्द्रायणं चरेत् ॥३०९
यत्र वेदध्वनि(श्रान्तं)ध्वान्तं न च गोभिरलङ्कृतम् ।
यत्र बालैः परिवृतं श्मशानमिव तद्गृहम् ॥३१०
हास्येऽपि बहवो यत्र विनाधर्मं वदन्ति हि (न) ।
विनाऽपि धर्मशास्त्रेण स धर्मः पावनः स्मृतः ॥३११
हीनवर्णे च यः कुर्यादज्ञानादभिवादनम् ।
तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुद्ध्यति ॥३१२

समुत्पन्ने यदा स्नामे भुङ्क्ते वाऽपि पिवेद्यदि।
गायत्र्यष्टसहस्रं तु जपेत् स्नात्वा समाहितः॥३१३
अङ्गुल्या दन्तकाष्ठं च प्रत्यक्षं लवणं तथा।
मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणम्॥३१४
दिवा कपित्थच्छायायां रात्रौ दधि शमीषु च।
कार्पासं दन्तकाष्ठं च विष्णोरपि हरेच्छ्रियम्॥३१५
शूर्पवातनखाग्राम्बुस्नानं वस्त्रपदोदकं।
मार्जनीरेणुकेशाम्बु हन्ति पुण्यं दिवाकृतम्॥३१६
मार्जनीरजकेशाम्बु देवतायतनोद्भवम्।
तेनावगुण्ठितं तेषु गङ्गाम्भःप्लुत एव सः॥३१७
मृत्तिकाः सप्त न ग्राह्या वल्मीके मूषिकस्थले।
अन्तर्जले श्मशानान्ते वृक्षमूले सुरालये॥३१८
वृषभैश्च तथोत्खाते श्रेयस्कामैः सदा बुधैः॥३१९
शुचौ देशे तु संग्राह्या शर्कराश्मविवर्जिता॥३२०
पुरीषे मैथुने होमे प्रस्रावे दन्तधावने।
स्नानभोजनजप्येषु सदा मौनं समाचरेत्॥३२१
यस्तु संवत्सरं पूर्णं भुङ्क्ते मौनेन सर्वदा।
युगकोटिसहस्रेषु स्वर्गलोके महीयते॥३२२
स्नानं दानं जपं होमं भोजनं देवतार्चनम्।
प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम्॥३२३
सर्वस्वमपि यो दद्यात् पातयित्वा द्विजोत्तमम्।
नाशयित्वा तु तत्सर्वं भ्रूणहत्याफलं लभेत्॥३२४

ग्रहणोद्वाहसंक्रान्तौ स्त्रीणाञ्च प्रसवे तथा।
दानं नैमित्तिकं ज्ञेयं रात्रौ चापि प्रशस्यते ॥३२५
क्षौमजं वाऽथ कार्पासं पट्टसूत्रमथापि वा।
यज्ञोपवीतं यो दद्याद्वस्त्रदानफलं लभेत् ॥३२६
कांस्यस्य भाजनं दद्याद् घृतपूर्णं सुशोभनम्।
तथा भक्त्या विधानेन अग्निष्टोमफलं लभेत् ॥३२७
श्राद्धकाले तु यो दद्याच्छोभनौ (ने) च उपानहौ।
स गच्छत्यन्यमार्गेऽपि अश्वदानफलं लभेत् ॥३२८
तिलपात्रं तु यो दद्यात् संपूर्णं तु समाहितः।
स गच्छति ध्रुवं स्वर्गं नरो नास्त्यत्र संशयः ॥३२९
दुर्भिक्षे अन्नदाता च सुभिक्षे च हिरण्यदः।
पानीयदस्त्वरण्ये च स्वर्गलोके महीयते ॥३३०
यावदर्धप्रसूता गौस्तावत् सा पृथिवी स्मृता।
पृथिवीं तेन दत्ता स्यादीदृशीं गान्ददाति यः ॥३३१
तेनाग्नयो हुताः सम्यक् पितरस्तेन तर्पिताः।
देवाश्च पूजिताः सर्वे यो ददाति गवाह्निकम् ॥३३२
जन्मप्रभृति यत्पापं मातृकं पैतृकं तथा।
तत्सर्वं नश्यति क्षिप्रं वस्त्रदानान्न संशयः ॥३३३
कृष्णाजिनञ्च यो दद्यात् सर्वोपस्करसंयुतम्।
उद्धरेन्नरकस्थानात् कुलान्येकोत्तरं शतम् ॥३३४
आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः।
शूलपाणिस्तु भगवानभिनन्दन्ति भूमिदम् ॥३३५

बालुकानां कृता राशि यावत् सप्तर्षिमण्डलम् ।
गते वर्षशते चैव पलमेकं विशीर्यति ॥३३६
क्षयश्च दृश्यते तस्य कन्यादाने न चैव हि ।
आतुरे प्राणदाता च त्रीणि दानफलानि च (!) ॥३३७
सर्वेषामेव दानानां विद्यादानं ततोऽधिकम् ।
पुत्रादिस्वजने दद्याद्विप्राय च न कैतवे ॥३३८
सकामः स्वर्गमाप्नोति निष्कामो मोक्षमाप्नुयात् ।
ब्राह्मणे वेदविदुषि सर्वशास्त्रविशारदे ॥३३९
मातृ(ता)पितृपरे चैव ऋतुकालाभिगामिनि ।
शीलचारित्रसम्पूर्णे प्रातःस्नानपरायणे ॥३४०
तस्यैव दीयते दानं यदीच्छेच्छ्रेय आत्मनः ॥
संपूज्य विदुषो विप्रानन्येभ्योऽपि प्रदीयते ।
तत्कार्यं नैव कर्तव्यं न दृष्टं न श्रुतं मया ॥३४१
अतः परं प्रवक्ष्यामि श्राद्धकर्मणि ये द्विजाः ।
पितॄणामक्षयं दानं दत्तं येषान्तु निष्फलम् ॥३४२
न हीनाङ्गो न रोषी(गी) च श्रुतिस्मृति विवर्जितः ।
नित्यश्चानृतवादी च तांस्तु श्राद्धे न भोजयेत् ॥३४३
हिंसारतं च कपटं उपगूह्य श्रुतं च यः ।
किङ्करं कपिलं काणं श्वित्रिणं रोगिणं तथा ॥३४४
दुश्चर्माणं शीर्णकेशं पाण्डुरोगं जटाधरं ।
भारवाहकमुग्रञ्च द्विभार्यं वृषलीपतिम् ॥३४५

भेदकारी भवेच्चैव बहुपीडाकरोऽपि वा ।
हीनातिरिक्तगात्रो वा तमप्यपनयेत्तथा ॥३४६
बहुभोक्ता दीनमुखो मत्सरी क्रूरबुद्धिमान् ।
एतेषां नैव दातव्यः कदाचिद्वै प्रतिग्रहः ॥३४७
अथ चेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः ।
अदूष्यं तं यमः प्राह पङ्क्तिपावन एव सः ॥३४८
श्रुतिः स्मृतिश्च विप्राणां नयने द्वे प्रकीर्तिते ।
काणः स्यादेकहीनोऽपि द्वाभ्यामन्धः प्रकीर्तितः ॥३४९
न श्रुतिर्न स्मृतिर्यस्य न शीलं न कुलं यतः ।
तस्य श्राद्धं न दातव्यं त्वन्धकस्यात्रिरब्रवीत् ॥३५०
तस्माद्वेदेन शास्त्रेण ब्राह्मण्यं ब्राह्मणस्य तु ।
न चैकेनैव वेदेन भगवानत्रिरब्रवीत् ॥३५१
योगस्थैर्लोचनैर्युक्तः पादाग्रश्च प्रयच्छति ।
लौकिकज्ञैश्च शास्त्रोक्तं पश्येच्चैवाधरोत्तरम् ॥३५२
वेदैश्च ऋषिभिर्गीतं दृष्टिमान् शास्त्रवेदवित् ॥३५३
व्रतिनं च कुलीनं च श्रुतिस्मृतिरतं सदा ।
तादृशं भोजयेच्छ्राद्धे पितृणामक्षयं भवेत् ॥३५४
यावतो ग्रसते ग्रासान् पितृणां दीप्ततेजसाम् ।
पिता पितामहश्चैव तथैव प्रपितामहः ॥३५५
नरकस्था विमुच्यन्ते ध्रुवं यान्ति त्रिविष्टपम् ।
तस्माद्विप्रं परीक्षेत श्राद्धकाले प्रयत्नतः ॥३५६

न निर्व्वपति यः श्राद्धं प्रमीतपितृको द्विजः ।
इन्दुक्षये मासि मासि प्रायश्चित्ती भवेत्तु सः ॥३५७
सूर्ये कन्यागते कुर्याच्छ्राद्धं यो न गृहाश्रमी ।
धनं पुत्रान् कुलं तस्य पितृनिश्वासपीड़या ॥ ३५८
कन्यागते सवितरि पितरो यान्ति सत्सुतान् ।
शून्या प्रेतपुरी सर्व्वा यावद्वृश्चिकदर्शनम् ॥३५९
ततो वृश्चिकसंप्राप्ते निराशाः पितरोगताः ।
पुनः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम् ॥३६०
पुत्रं वा भ्रातरं वापि दौहित्रं पौत्रकं तथा ।
पितृकार्य्ये प्रसक्ता ये ते यान्ति परमां गतिम् ॥३६१
यथा निर्मन्थनादग्निः सर्व्वकाष्ठेषु तिष्ठति ।
तथा स दृश्यते धर्म्याच्छ्राद्धदानान्न संशयः ॥२६२
सर्वशास्त्रार्थगमनं सर्वतीर्थावगाहनम् ।
सर्वयज्ञफलं विन्द्याच्छ्राद्धदानान्न संशयः ॥३६३
महापातकसंयुक्तो यो युक्तश्चोपपातकैः ।
घनैर्मुक्तो यथा भानूराहुमुक्तश्च चन्द्रमाः ॥३६४
सर्वपापविनिर्मुक्तः सर्वपापं विलङ्घयेत् ।
सर्वसौख्यं स्वयं प्राप्तः श्राद्धदानान्न संशयः ॥ ३६५
सर्वेषामेव दानानां श्राद्धदानं विशिष्यते ।
मेरुतुल्यं कृतं पापं श्राद्धदानं विशोधनम् ॥३६६
श्राद्धं कृत्वा तु मर्त्यो वै स्वर्गलोके महीयते ।
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम ॥३६७

वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं भवेत्।
एतत् सर्वं मया ख्यातं श्राद्धकाले समुत्थिते ॥३६८
वैश्वदेवे च होमे च देवताभ्यर्च्चने जपे।
अमृतं तेन विप्रान्नमृग्यजुःसामसंस्कृतम् ॥३६९
व्यवहारानुपूर्व्वेण धर्म्मेण बलिभिर्जितम्।
क्षत्रियान्नं पयस्तेन घृतान्नं यज्ञपालने ॥३७०
देवो मुनिर्द्विजो राजा वैश्यः शूद्रो निषादकः।
पशुर्म्लेच्छोऽपि चाण्डालो विप्रा दशविधाः स्मृताः ॥३७१
सन्ध्यां स्नानं जपं होमं देवतानित्यपूजनम्।
अतिथिं वैश्वदेवञ्च देवब्राह्मण उच्यते ॥३७२
शाके पत्रे फले मूले वनवासे सदा रतः।
निरतोऽहरहः श्राद्धे स विप्रो मुनिरुच्यते ॥ ३७३
वेदान्तं पठते नित्यं सर्वसङ्गं परित्यजेत्।
साङ्ख्ययोगविचारस्थः स विप्रो द्विज उच्यते ॥३७४
अस्त्राहताश्च धन्वानः संग्रामे सर्वसंमुखे।
आरम्भे निर्जिता येन स विप्रः क्षत्र उच्यते ॥३७५
कृषिकर्मरतो यश्च गवाञ्च प्रतिपालकः।
वाणिज्यव्यवसायश्च स विप्रो वैश्य उच्यते ॥३७६
लाक्षालवणसंमिश्रं कुसुम्भं क्षीरसर्पिषः।
विक्रेता मधुमांसानां स विप्रः शूद्र उच्यते ॥३७७
चौरश्च तस्करश्चैव सूचको दंशकस्तथा।
मत्स्यमांसे सदालुब्धो विप्रो निषाद उच्यते ॥३७८

ब्रह्मतत्त्वं न जानाति ब्रह्मसूत्रेण गर्वितः।
तेनैव स च पापेन विप्रः पशुरुदाहृतः ॥३७९

वापीकूपतड़ागानामारामस्य सरःसु च।
निःशङ्कं रोधकश्चैव स विप्रो म्लेच्छ उच्यते ॥३८०

क्रियाहीनश्च मूर्खश्च सर्वधर्मविवर्जितः।
निर्दयः सर्वभूतेषु विप्रश्चाण्डालउच्यते ॥३८१

वेदैर्विहीनाश्च पठन्ति शास्त्रं शास्त्रेण हीनाश्च पुराणपाठाः।
पुराणहीनाः कृषिणो भवन्ति भ्रष्टास्ततो भागवता भवन्ति ॥३८२

ज्योतिर्विदो ह्यथर्वाणः कीराः पौराणपाठकाः।
श्राद्धे यज्ञे महादाने वरणीयाः कदाच न ॥३८३

श्राद्धञ्च पितरं घोरं दानं चैव तु निष्फलम्।
यज्ञे च फलहानिः स्यात्तस्मात्तान् परिवर्जयेत् ॥३८४

आविकश्चित्रकारश्च वैद्यो नक्षत्रपाठकः।
चतुर्विप्रा न पूज्यन्ते वृहस्पतिसमा यदि ॥३८५

मागधो माधु(थु)रश्चैव कापटः कीटकानजौ।
पञ्च विप्रा न पूज्यन्ते वृहस्पतिसमा यदि ॥३८६

क्रयक्रीता च या कन्या पत्नी सा न विधीयते।
तस्यां जाताः सुतास्तेषां पितृपिण्डं न विद्यते ॥३८७

अष्टशल्यागतो नीरं पाणिना पिवते द्विजः।
सुरापानेन तत्तुल्यं तुल्यं गोमांसभक्षणम् ॥३८८

ऊर्द्ध्वजङ्घेषु विप्रेषु प्रक्षाल्य चरणद्वयम्।
तावच्चाण्डालरूपेण यावद्गङ्गां न मज्जति ॥३८९

दीपशय्यासनच्छाया कार्पासं दन्तधावनम् ।
अजारेणुस्पृशं चैव शक्रस्यापि श्रियं हरेत् ।।३६०

गृहाद्दशगुणं कूपं कूपाद्दशगुणं तटम् ।
तटाद्दशगुणं नद्यां गङ्गासंख्या न विद्यते ।।३६१

स्रवद्यद्ब्राह्मग तोयं रहस्यं क्षत्रियं तथा ।
वापीकूपे तु वैश्यस्य शौद्रं भाण्डोदकं तथा ।।३६२

तीर्थस्नानं महादानं यच्चान्यत्तिलतर्पणम् ।
अब्दमेकं न कुर्वीत महागुरुनिपाततः ।।३६३

गङ्गा गया त्वमावस्या वृद्धिश्राद्धे क्षयेऽहनि ।
मघापिण्डप्रदानं स्यादन्यत्र परिवर्ज्जयेत् ।। ३६४

घृतं वा यदि वा तैलं पयोवा यदि वा दधि ।
चत्वारो ह्याज्यसंस्थानं हुतं नैव तु वर्जयेत् ।। ३६५

श्रुत्वैतानृषयो धर्मान् भाषितानत्रिणा स्वयम् ।
इदमूचुर्महात्मानं सर्वे ते धर्मनिष्ठिताः ।।३६६

य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः ।
इह लोके यशः प्राप्य ते यास्यन्ति त्रिपिष्टपम् ।।३६७

विद्यार्थी लभते विद्यां धनकामो धनानि च ।
आयुष्कामस्तथैवायुः श्रीकामो महतीं श्रियम् ।।३६८

इति श्रीमदत्रिमहर्षिसंहिता समाप्ता ।

---

॥ श्रीः ॥

# विष्णुस्मृतिः ।

श्रीगणेशायनमः ।

महामते ! महाप्राज्ञ ! सर्वशास्त्रविशारद ! ।
अक्षीणकर्म बन्धस्तु पुरुषो द्विजसत्तम ! ॥१
सततं किं जपन् जप्यं विबुधः किमनुस्मरन् ॥
मरणे यज्जपं जप्यं यश्च भाव मनुस्मरन् ॥२
यच्चध्यात्वा द्विजश्रेष्ठ ! पुरुषो मृत्यु मागतः ।
परम्पद मवाप्नोति तन्मे वद महामुनेः ॥३

शौनक उवाच ॥

इदमेव महाराज ! पृष्टवांस्ते पितामहः ।
भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ॥४

युधिष्ठिर उवाच ॥

पितामह ! महाप्राज्ञ ! सर्वशास्त्र विशारद ! ।
प्रयाणकाले यच्चिन्त्यं सूरिभि स्तत्वचिन्तकैः ॥५

किन्नु स्मरन् कुरुश्रेष्ठ ! मरणे पर्युपस्थिते ।
प्राप्नुयात् परमां सिद्धिं श्रोतु मिच्छामि तद्वद ॥६

भीष्म उवाच ॥

अद्भुतं च हितं सूक्ष्मं उक्तं प्रश्नं त्वयानघ ! ।
शृणुष्वावहितो राजन् ! नारदेन पुरा श्रुतम् ॥७
श्रीवत्साङ्कं जगद्वीज मनन्तं लोकसाक्षिणम् ।
पुरा नारायणं देवं नारदः परिपृष्टवान् ॥८

नारद उवाच ॥

त्वमक्षरं परं ब्रह्म निर्गुणं तमसः परम् ।
आहुर्वेद्यं परं धाम ब्रह्मादि कमलोद्भवम् ॥९
भगवन् ! भूतभव्येश ! श्रद्दधानै जितेन्द्रियैः ।
कथं भक्तैर्विचिन्त्योऽसि योगिभिर्देहमोक्षिभिः ॥१०
किं च जप्यं जपेन्नित्यं कल्यमुत्थाय मानवाः ।
कथं युञ्जन् सदा ध्यायन् ब्रूहि तत्त्वं सनातनम् ॥११

भीष्म उवाच ॥

श्रुत्वा तस्य तु देवर्षेर्वाक्यं वाचस्पतिः स्वयम् ।
प्रोवाच भगवान् विष्णुर्नारदं वरदः प्रभुः ॥१२

श्रीभगवानुवाच ॥

हन्त ते कथयिष्यामि इमां दिव्यामनुस्मृतिम् ।
मरणे मामनुस्मृत्य प्राप्नोति परमां गतिम् ॥१३

यामधीत्य प्रयाणे तु मद्भावायोपपद्यते ।
ओङ्कार मग्रतः कृत्वा मां नमस्कृत्य नारद ॥१४
एकाग्रः प्रयतो भूत्वा इमं मन्त्र मुदीरयेत् ।
अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ॥१५
पुमान् विमुच्यते सद्यः सिंहत्रस्तै मृगैरिव ।
ओमित्येव परं ब्रह्म शाश्वतं परमव्ययम् ॥१६
एतदुच्चारयन्मर्त्यो ब्रह्मभूयाय कल्पते ।
ब्रह्मा विष्णुश्च रुद्रश्च सर्वमो मिति चोच्यते ॥१७
सम्पन्नेऽसुरसंयाने नम्यते च मुमुक्षुभिः ।
मोक्षश्च ज्ञानिनां प्रोक्तो मोहश्चाज्ञानिनां स्मृतः ॥१८
यस्य यादृग्विधो भाव स्तस्य तादृग्विधो हरिः ।
भवे भवनविश्वात्मा भूतानां हितकाम्यया ॥१९
सृजते आत्मनात्मान मात्मन्येव स्वमायया ।
हरिरेव सतां नित्यं शरण्यः शरणार्थिनाम् ॥२०
नहि नारायणादन्य स्त्रिषु लोकेषु विद्यते ।
वसत्यमृतमक्षय्यं यस्मिन् लोकाः ससागराः ॥२१
त एव सृजते लोकान् सृष्टिकाले जगत्प्रभुः ।
तेजांसि येन दिव्यन्ते महोत्पन्नेन तेजसा ॥२२
वासुदेवात्मकं सर्वं तत्तेजोऽपि हि नान्यथा ।
वासनाद्या स्तु ये भावाः संभवन्ति युगे युगे ॥२३
लोकत्रयहितार्थाय स्वोपकाराय नो हरिः ।
यतश्चोत्पद्यते विश्वं यस्मिन्नेव प्रलिप्यते ॥२४

क्षराक्षरविसृष्टस्तु सोऽच्युतः पुरुषोत्तमः ।
अव्यक्तं शाश्वतं देवं प्रभवं पुरुषोत्तमम् ॥२५
प्रपद्ये प्राञ्जलिर्विष्णु मक्षय्यं भक्तवत्सलम् ।
पुराणं पुरुषं दिव्य मद्भुतं लोकपावनम् ॥२६
प्रपद्ये पुण्डरीकाक्षं देवं नारायणं हरिम् ।
लोकनाथं सहस्राक्ष मक्षरं परमं पदम् ॥२७
भगवन्तं प्रपन्नोऽस्मि भूतभव्यप्रभुंविभुम् ।
स्रष्टारं सर्वलोकाना मनन्तं विश्वतोमुखं ॥२८
पद्मनाभं हृषीकेशं प्रपद्ये सत्यमच्युतम् ।
हिरण्यगर्भ ममृतं भूगर्भं परतः परम् ॥२९
प्रभुंविभुमनाद्य तं प्रपद्ये तं रविप्रभम् ।
सहस्रशीर्ष पुरुषं महर्षिं सत्यभावनम् ॥३०
प्रपद्ये सूक्ष्ममचलं वरेण्यमभयप्रदम् ।
नारायणं पुराणेशं योगात्मानं सनातनम् ॥३१
संज्ञानां सर्वसत्वानां प्रपद्ये ध्रुवमीश्वरम् ।
यः प्रभु सर्वलोकानां येन सर्वमिदं ततम् ॥३२
चराचरगुरुर्देवः स मे विष्णुः प्रसीदतु ।
यस्मादुत्पद्यते ब्रह्मा पद्मयोनिः पितामहः ॥३३
ब्रह्मयोनिर्हि विश्वस्य स मे विष्णुः प्रसीदतु ।
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभि रेवच ॥३४
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।
पर्जन्यः पृथिवी सस्यं कालो धर्मः क्रियाक्रिये ॥३५

गुणाकरः स मे विष्णुर्वासुदेवः प्रसीदतु ।
अग्निसोमार्कताराणां ब्रह्मरुद्रेन्द्रयोगिनां ॥३६
यस्तेजयति तेजांसि स मे विष्णुः प्रसीदतु ।
कार्यं क्रिया च करणं कर्त्ता हेतुः प्रयोजनम् ॥३७
अक्रिया करणी कार्यं स मे विष्णुः प्रसीदतु ।
शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ॥३८
रिपुगर्भस्य यो गर्भः स मे विष्णुः प्रसीदतु ।
अबलो येन बालेन कंसमल्लो महाबलः ॥३६
चाणूरो निहतो रङ्गे स मे विष्णुः प्रसीदतु ।
शङ्खः करवरे यस्य स मे विष्णुः प्रसीदतु ॥४०
येन क्रान्तास्त्रयो लोका दानवाश्च वशीकृताः ।
शरणं सर्वभूतानां स मे विष्णुः प्रसीदतु ॥४१
योगावास ! नमस्तुभ्यं सर्वावास ! वरप्रद ।
सर्वादि वासनाद्यादि वासुदेव ! प्रधानकृत् ॥४२
यज्ञगर्भ ! हिरण्याङ्ग ! पञ्चयज्ञ ! नमोऽस्तुते ।
चतुर्मूर्त्तिः परन्धाम लक्ष्मानन्दवरार्च्चित ॥ ४३
अजस्त्वमगमः पन्था ह्यमूर्त्तिर्विश्वमूर्त्तिधृक् ।
श्रीकर्तः ! पञ्चकालज्ञ ! नमस्ते ज्ञानसागर ॥४४
अव्यक्ताद्व्यक्तमुत्पन्नमव्यक्ताद्यः परोऽक्षरः ।
यस्मात्परतरन्नास्ति तमस्मि शरणं गतः ॥४५
न प्रधानो नच महान् पुरुषश्चेतनोह्यजः ।
अनयोग्यः परतरस्तमस्मि शरणं गतः ॥४६

चिन्तयन्तोऽपि यन्नित्यं ब्रह्मेशानादयः प्रभुम् ।
निश्चयं नाधिगच्छन्ति तमस्मि शरणं गतः ॥४७
जितेन्द्रिया जितात्मानो ज्ञानध्यानपरायणाः ।
यं प्राप्य न निवर्त्तन्ते तमस्मि शरणं गतः ॥४८
एकांशेन जगत् कृत्स्नमवष्टभ्य विभुः स्थितः ।
अग्राह्यो निर्गुणो नित्यस्तमस्मि शरणं गतः ॥४९
सोमार्काग्निगतन्तेजो या च तारामयी द्युतिः ।
दिवि संजायते यो यः स महात्मा प्रसीदतु ॥५०
सूर्यमध्यस्थितः सोमस्तस्य मध्ये च यास्तिता ।
भूतबाह्याचरा दीप्तिः स महात्मा प्रसीदतु ॥५१
सगुणे निर्गुणश्चासौ लक्ष्मीवान् चेतनो ह्यजः ।
सूक्ष्मः सर्वगतो देही स महात्मा प्रसीदतु ॥५२
साङ्ख्ययोगाश्च ये चान्ये सिद्धाश्च परमर्षयः ।
यं विदित्वा विमुच्यन्ते स महात्मा प्रसीदतु ॥५३
अव्यक्तः समधिष्ठाता ह्यचिन्त्यः सदसत्परः ।
आस्थितः प्रकृतिं भुङ्क्ते स महात्मा प्रसीदतु ॥५४
क्षेत्रज्ञः पञ्चधा भुङ्क्ते प्रकृतिं पञ्चभिर्मुखैः ।
निर्विकार ! नमस्तेऽस्तु साक्षिक्षेत्रिभ्रु वस्थितः ॥५५
अतीन्द्रिय ! नमस्तुभ्यं लिङ्गैर्व्यक्तैर्न मीयसे ।
येच त्वां नाभिजानन्ति संसारे सञ्चरन्ति ते ॥५६
कामक्रोधविनिर्मुक्ता भक्तास्त्वां प्रविशन्ति च ।
अव्यक्तमत्यहङ्कारा मनोभूतेन्द्रियाणि च ॥५७

त्वयि तानि चलेषु त्वं नतेषु त्वं नते त्वयि।
एकत्वात्वत्स्वनानात्वं ये विदु र्यान्ति ते परम् ॥५८
समोहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
समत्वमभिकाङ्क्षन्तम्भक्तया वै नान्यचेतसः ॥५९
चराचरमिदं सर्वं भूतग्रामश्चतुर्विधम्।
त्वया त्वय्येव तत्प्रोतं सूत्रे मणिगणाइव ॥६०
स्रष्टो! भोक्तासि कूटस्थो ह्यतत्वस्तत्वसंज्ञितः।
अकर्ता हेतुरचरः पृथगात्मन्यवस्थितः ॥६१
न मे भूतेषु संयोगो न भूतत्वगुणाधिकः।
अहङ्कारेण बुद्ध्या वा न मे योगास्त्रिभिर्गुणैः ॥६२
न मे धर्मो ह्यधर्मो वा नामभोजन्नवा पुनः।
जरामरणमोक्षार्थं त्वां प्रपन्नोस्मि सर्वगः ॥६३
विषयैरिन्द्रियैर्वापि न मे भूयः समागतः।
ईश्वरोऽसि जगन्नाथ! किमतः परमुच्यते ॥६४
भक्तानां यद्धितं देव! तद्देहि त्रिदशेश्वर।
पृथिवीं यातु मे घ्राणं यातु मे रसनञ्जलम् ॥६५
रूपं हुताशनं यातु स्पर्शो यातु च मारुतम्।
श्रोत्रमाकाशमप्येतु मनो वैकारिकं पुनः ॥६६
इन्द्रियाणि गुणान्यातु स्वासु स्वासु च योनिषु।
पृथिवी यातु सलिलमापोऽग्नि मनलोऽनिलम् ॥६७
वायुराकाशमप्येतु मनश्चाकाशमेव च।
अहङ्कारं मनो यातु मोहनं सर्वदेहिनाम् ॥६८

अहङ्कारस्तथा बुद्धिं बुद्धिरव्यक्तमेव च।
प्रधाने प्रकृतिं याते गुणसाम्ये व्यवस्थिते ॥६९
वियोगः सर्वकरणैर्गुणैर्भूतैश्च मेऽभवत्।
सत्वं रजस्तमश्चैव प्रकृतिं प्रविशन्तु मे ॥७०
निष्कैवल्यं पदं देवकांक्षितं परमन्तपः।
एकीभावस्त्वया मेऽस्तु न मे जन्म भवेत्पुनः ॥७१
नमो भगवते तस्मै विष्णवे प्रभविष्णवे।
त्वद्बुद्धिस्तद्गतप्राणस्त्वद्भक्तस्त्वत्परायणः ॥७२
त्वामेवाहं स्मरिष्यामि मरणे पर्युपस्थिते।
पूर्वदेहिकृता ये मे व्याधयः प्रविशन्तु माम् ॥७३
आर्दयन्तु च दुःखानि ऋणं मे न भवेदिति।
उपदिष्टन्तु मे सर्वे व्याधयः पूर्वचिन्तिताः ॥७४
अनृणो गन्तुमिच्छामि तद्विष्णोः परमम्पदम्।
अहं भगवतस्तस्य मम वासः सनातनः ॥७५
तस्याहं न प्रणश्यामि सच मे न प्रणश्यति।
कर्मेन्द्रियाणि संयम्य पञ्च बुद्धीन्द्रियाणि च ॥७६
दशेन्द्रियाणि मनसो ह्यहङ्कारेण वा पुनः।
अहङ्कारं तथा बुद्धौ बुद्धिमात्मनि योजयेत् ॥७७
आत्मबुद्धीन्द्रियम्पश्येद्बुद्धौ बुद्धेः परायणम्।
ममायमपि तस्याहं येन सर्वं मिदन्ततम् ॥७८
आत्मनात्मनि संयोज्य ममात्मन्यनुसंस्मरेत्।
एवं बुद्धेः परंबुद्ध्वा लभते न पुनर्भवम् ॥७९

ॐ नमो भगवते तस्मै देहिनां परमात्मने ।
नारायणाय भक्तानामेकनिष्ठाय शाश्वते ॥८०
हृदिस्थाय च भूतानां सर्वेषां च महात्मने ।
इमामनुस्मृतिन्दिव्यां वैष्णवीं पापनाशनीम् ॥८१
स्वयम्विबुद्धश्च पठेद्यत्र तत्र समभ्यसेत् ।
मरणे समनुप्राप्ते यस्त्विमामनुसंस्मरेत् ॥८२
अपि पापसमाचारः स याति परमाङ्गतिम् ।
यद्यहङ्कारमाश्रित्य यज्ञदानतपः क्रियाः ॥८३
कुर्वंस्तत्फलमाप्नोति पुनरावर्तते नतु ।
अभ्यर्चयन् पितृन्देवान् पठन् जुह्वन् बलिन्ददन् ॥८४
ज्वलदग्निं स्मरेद्यो मां लभते परमाङ्गतिम् ।
यज्ञोदानं तपः कर्म पावनानि मनीषिणाम् ॥८५
यज्ञो दानं तपस्तस्मात्कुर्यादाशाविवर्जितः ।
पौर्णमास्याममावास्यां द्वादश्यां च विशेषतः ॥८६
श्रावयेच्छ्रद्दधानांश्चमद्भक्तांश्च विशेषतः ।
नम इत्येव यो ब्रूयान्मद्भक्तः श्रद्धयान्वितः ॥८७
तस्याक्षयो भवेल्लोकः श्वपाकस्यापि नारद ।
किं पुनर्ये यजन्ते मां साधका विधिपूर्वकम् ॥८८
श्रद्धावन्तो यतात्मान स्ते मां यान्ति मदाश्रिताः ।
कर्माण्याद्यन्तवन्तीह मद्भक्तोऽनन्तमश्नुते ॥८९
मामेव तस्माद्देवर्षे ध्याहि नित्यमतन्द्रितः ।
अवाप्स्यसि ततः सिद्धिं लप्स्यसे च पदं मम ॥९०

अज्ञाना मिच्छया ज्ञानं दद्याद्धर्मोपदेशनम्।
कृत्स्नां वा पृथिवीं दद्यात्तेन तुल्यं न तत्फलम्॥६१
अस्मात् प्रदेयं साधुभ्यो जन्मबन्धभयापहम्।
अश्वमेधसहस्राणां सहस्रं यः समाचरेत्॥६२
नासौ फल मवाप्नोति मद्भक्तैर्यदवाप्यते।

भीष्म उवाच॥

एवं पृष्टः पुरा तेन नारदेन सुरर्षिणा।
यदुवाच तथा शम्भुस्तदुक्तं तव सुव्रत॥६३
त्वमप्येकमना भूत्वा ध्येयं ज्ञेयं गुणाधिकम्।
भज सर्वेण भावेन परमात्मान मव्ययम्॥६४
श्रुत्वैतत् नारदो वाक्यं दिव्यं नारायणेरितम्।
अत्यन्तभक्तिमान्देवे एकान्तित्व मुपेयिवान्॥६५
नारायण मृषीन्देवं दशवर्षाण्यनन्यभाक्।
इदं जपन्वै प्राप्नोति तद्विष्णोः परमं पदम्॥६६
किं तस्य बहुभिर्मन्त्रैः किं तस्य बहुभिर्व्रतैः।
नमो नारायणायेति मन्त्रः सर्वार्थसाधकः॥६७
नारायणाय नम ओ मिति वेदमन्त्रं-
यो नित्यमेव मनसापि समभ्यसेच्च।
पापैः प्रमुच्य परमे तृषयातिविष्णोः-
स्थानं हि सर्व मिति वेदविदो वदन्ति॥६८
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः।
यो नित्यं ध्यायते देव! नारायण मनन्यधीः॥६९

चीरवासा जपी वापि त्रिदण्डी मुण्ड एव वा।
भूषितो वा द्विजश्रेष्ठ! न लिङ्गं धर्मकारणम् ॥१००
ये नृशंसा दुरात्मानः पापधर्मविवर्जिताः।
तेऽपि यान्ति परं स्थानं नारायणपरायणाः ॥१०१
अन्यथा मन्दबुद्धीनां प्रतिभाति दुरात्मनाम्।
कुतर्कज्ञानदृष्टीनां विश्रान्तेन्द्रियवर्त्मनाम् ॥१०२
नमो नारायणायेति ये विदुर्ब्रह्म शाश्वतम्।
अन्तकाले जपन्नेति तद्विष्णोः परमं पदम् ॥१०३
आचारहीनो । मुनिप्रवीर भक्त्या विहीनोऽपितु विन्दतोऽपि।
संकीर्त्य नारा..शब्दमात्रं विमुक्तपापो विशतेऽच्युतां गतिम् ॥१०४
कान्तारवनदुर्गेषु कृत्स्नेष्वापत्सु संयुगे।
दस्युभिः सन्निरोधे च नामभि र्मां प्रकीर्तयेत् ॥१०५
न दिव्यपुरुषो धीमान् येषु स्थानेषु मां स्मरेत्।
चौरव्याघ्र मङ्गासर्पैः क्रूरैरपि न वाध्यते ॥१०६
जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥१०७
नामास्ति याति शक्तिश्च पापे निर्हरणे हरेः।
श्वपचोऽपि नरः कर्तुं क्षमस्तावन्न किल्बिषम् ॥१०८
न तावत् पापमस्तीह यावन्नामहृतं हरेः।
अतिरेक भयादाहुः प्रायश्चित्तान्तरं बुधाः ॥१०९
गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः।
अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः ॥११०

न वासुदेवात्परमस्ति मङ्गलं न वासुदेवात्परमस्ति पावनम् ।
न वासुदेवात्परमस्ति दैवतं न वासुदेवं प्रणिपत्य सीदति ॥१११
इमां रहस्यां परमामनुस्मृतिं ह्यधीत्य बुद्धिं लभते च नैष्ठिकम् ॥
विहाय दुःखानि विमुच्य सङ्कटात्
स वीतरागो विचरेन्महीमिमाम् ॥११२
गङ्गायां मरणं चैव दृढा भक्तिश्च केशवे
ब्रह्मविद्याप्रबोधश्च नाल्पस्य तपसः फलम् ॥११३

इति विष्णुस्मृतिः समाप्ता ॥

॥ अथ ॥

# * विष्णुस्मृतिः । *

श्रीगणेशाय नमः ।

तत्र प्रथमोऽध्यायः ।

ब्रह्मरात्र्यां व्यतीतायां प्रबुद्धे पद्मसम्भवे ।
विष्णुः सिसृक्षुर्भूतानि ज्ञात्वा भूमिं जलानुगाम् ॥१
जलक्रीड़ारुचि शुभं कल्पादिषु यथा पुरा ।
वाराहमास्थितोरूपमुज्जहार वसुन्धराम् ॥२
वेदपादो यूपदंष्ट्रः क्रतुवक्त्रश्चितामुखः ।
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ॥३
अहोरात्रेक्षणो दिव्यो वेदाङ्गश्रुतिभूषणः ।
आज्यनासः श्रवस्तुण्डः सामघोषमहास्वनः ॥४
धर्मसत्यमयः श्रीमान् क्रमविक्रमसत्कृतः ।
प्रायश्चित्तमयो वीरः प्रांशुजानुर्महावृषः ॥५
उद्गात्रन्त्रो होमलिङ्गो वीजौषधिमहाफलः ।
वेद्यन्तरात्मा मन्त्रस्फिग्विकृतः सोमशोणितः ॥६
वेदस्कन्धो हविर्गन्धो हव्यकव्यादिवेगवान् ।
प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरन्वितः ॥७
दक्षिणाहृदयो योगमहामन्त्रमयो महान् ।
उपाकर्मोष्ठरुचिरः प्रवर्ग्यावर्त्तभूषणः ॥८

नानाच्छन्दोगतिपथो गुह्योपनिषदासनः।
छायापत्नीसहायोऽसौ मणिशृङ्ग इवोदितः ॥९
महीं सागरपर्यन्तां सशैलवनकाननाम्।
एकार्णवजलभ्रष्टानेकार्णवगतः प्रभुः ॥१०
दंष्ट्राग्रेण समुद्धृत्य लोकानां हितकाम्यया।
आदिदेवो महायोगी चकार जगतीं पुनः ॥११
एवं यज्ञवराहेण भूत्वा भूतहितार्थिना।
उद्धृता पृथिवी सर्वा रसातलगता पुरा ॥१२
उद्धृत्य निश्चले स्थाने स्थापिता च तथा स्वके।
यथास्थानं विभज्यापस्तद्गता मधुसूदनः ॥१३
सामुद्र्यश्च समुद्रेषु नादेयाश्च नदीषु च।
पल्वलेषु च पाल्वल्यः सरःसु च सरोवराः ॥१४
पातालसप्तकं चक्रे लोकानां सप्तकं तथा।
द्वीपानामुदधीनाश्च स्थानानि विविधानि च ॥१५
स्थानपालांल्लोकपालान्नदीशैलवनस्पतीन्।
ऋषींश्च सप्त धर्मज्ञान वेदान् साङ्गान् सुरासुरान् ॥१६
पिशाचोरगगन्धर्वयक्षराक्षसमानुषान्।
पशुपक्षिमृगाद्यांश्च भूतग्रामं चतुर्विधम् ॥१७
मेघेन्द्रचापसम्पातान् यज्ञांश्च विविधांस्तथा।
एवं वराहो भगवान् कृत्वेदं सचराचरम् ॥१८
जगाज्जगाम लोकानामविज्ञातां तदा गतिम्।
अविज्ञातां गतिं याते देवदेवे जनार्दने ॥१९

वसुधा चिन्तयामास का धृतिर्म्मे भविष्यति।
पृच्छामि कश्यपं गत्वा स मे वक्ष्यत्यसंशयम् ॥२०
मदीयां वहते चिन्तां नित्यमेव महामुनिः।
एवं स निश्चयं कृत्वा देवी स्त्रीरूपधारिणी ॥२१
जगाम कश्यपं द्रष्टुं दृष्टवांस्ताञ्च कश्यपः।
नीलपङ्कजपत्राक्षीं शारदेन्दुनिभाननाम् ॥२२
अलिसङ्घालकां शुभ्रां बन्धुजीवाधरां शुभाम्।
सुशुभ्रस्पष्टदशनां चारुनासां नतभ्रुवम् ॥२३
कम्बुकण्ठीं संहतोरूं पीनोरुजघनस्थलीम्।
विरेजतुस्ततो यस्याः समौ पीनौ निरन्तरौ ॥२४
मत्तेभकुम्भसङ्काशौ शातकुम्भसमद्युती।
मृणालकोमलौ बाहू करौ किशलयोपमौ ॥२५
रुक्मस्तम्भनिभावूरू गूढे श्लिष्टे च जानुनी।
जङ्घे विरोमे सुषमे पादावतिमनोरमौ ॥२६
जघनञ्च घनं मध्यं यथा केशरिणः शिशोः।
प्रभायुता नखास्ताम्रा रूपं सर्व्वमनोहरम् ॥२७
कुर्वाणां वीक्षितैर्नित्यं नीलोत्पलयुता दिशः।
कुर्वाणां प्रभया देवीं तथा वितिमिरा दिशः ॥२८
सुसूक्ष्मशुक्लवसनां रत्नोत्तमविभूषिताम्।
पदन्यासैर्वसुमतीं सपद्मामिव कुर्वतीं ॥२९
रूपयौवनसम्पन्नां विनीतवदुपस्थिताम्।
समीपमागतां दृष्ट्वा पूजयामास कश्यपः ॥३०

उवाच तां वरारोहे! विज्ञातं ह्द्गतं मया ।
धरे तव विशालाक्षि! गच्छदेवि जनार्द्दनम् ॥३१
स ते वक्ष्यत्यशेषेण भाविनी ते यथा स्थितिः ।
क्षीरोदे बसतिस्तस्य मया ज्ञाता शुभानने ॥३२
ध्यानयोगेन चार्वङ्गि तज्ज्ञानं तत्प्रसादतः ॥
इत्येवमुक्ता सम्पूज्य कश्यपं वसुधा ततः ।
प्रययौ केशवं द्रष्टुं क्षीरोदमथ सागरम् ॥३३
सा ददर्शामृतनिधिं चन्द्ररश्मिमनोहरम् ।
पवनक्षोभसंजातवीचीशतसमाकुलम् ॥३४
हिमवच्छतसङ्काशं भूमण्डलमिवापरम् ।
वीचीहस्तैर्धवलितैराह्वयानमिव क्षितिम् ॥३५
तैरेव शुभ्रतां चन्द्रे विदधानमिवानिशम् ।
अन्तरस्थेन हरिणा विगताशेषकल्मषम् ॥३६
यस्मात्तस्मात्तु विभ्रन्तं सुशुभ्रां तनुमूर्ज्जिताम् ।
पाण्डरं खगमागम्यमधोभुवनवर्त्तिनम् ॥३७
इन्द्रनीलकडाराढ्यं विपरीतमिवाम्बरम् ।
फलावलीसमुद्भूतवनसङ्घसमाचितम् ॥३८
निर्म्मोकमिव शेषाहेर्विस्तीर्णं तमतीव हि ।
तं दृष्ट्वा तत्र्व मध्यस्थं ददृशे केशवालयम् ॥३९
अनिर्द्देश्यपरामाणमनिर्द्देश्यर्द्धिसंयुतम् ।
शेषपर्यङ्कगं तस्मिन् ददर्श मधुसूदनम् ॥४०

शेषाहिफणरत्नांशुदुर्विभाव्य मुखाम्बुजम् ।
शशाङ्कशतसङ्काशं सूर्यायुतसमप्रभम् ॥४१
पीतवाससमक्षोभ्यं सर्वरत्नविभूषितम् ।
मुकुटेनार्कवर्णेन कुण्डलाभ्यां विराजितम् ॥४२
संवाह्यमानाङ्घ्रियुगं लक्ष्म्या करतलैः शुभैः ।
शरीरधारिभिः शस्त्रैः सेव्यमानं समन्ततः ॥४३
तं दृष्ट्वा पुण्डरीकाक्षं ववन्दे मधुसूदनम् ।
जानुभ्यामवनीं गत्वा विज्ञापयति चाप्यथ ॥४४
उद्धृताहं त्वया देव ! रसातलतलङ्गता ।
स्वे स्थाने स्थापिता विष्णो ! लोकानां हितकाम्यया ॥४५
तत्राधुना मे देवेश ! का धृतिर्वै भविष्यति ।
एवमुक्तस्तदा देव्या देवो वचनमब्रवीत् ॥४६
वर्णाश्रमाचाररताः शास्त्रैकतत्परायणाः ।
त्वां धरे ! धारयिष्यन्ति तेषां तद्भार आहितः ॥४७
एवमुक्ता वसुमती देवदेवमभाषत ।
वर्णानामाश्रमाणाञ्च धर्मान् वद सनातनान् ॥४८
त्वत्तोऽहं श्रोतुमिच्छामि त्वं हि मे परमा गतिः ।
नमस्ते देव ! देवेश ! देवारिबलसूदन ! ॥४९
नारायण ! जगन्नाथ ! शङ्खचक्रगदाधर ! ।
पद्मनाभ ! हृषीकेश ! महाबलपराक्रम ! ॥५०
अतीन्द्रिय ! सुदुष्पार ! देव ! शार्ङ्गधनुर्द्धर ! ।
वराह ! भीम ! गोविन्द ! पुराण ! पुरुषोत्तम ! ॥५१

हिरण्यकेश ! विश्वाक्ष ! यज्ञमूर्त्ते ! निरञ्जन ! ।
क्षेत्र ! क्षेत्रज्ञ ! लोकेश ! सलिलान्तरशायक ! ॥५२
यन्त्रमन्त्रवहाचिन्त्य ! वेदवेदाङ्गविग्रह ! ।
जगतोऽस्य समग्रस्य सृष्टिसंहारकारक ! ॥५३
सर्वधर्मज्ञ ! धर्माङ्ग ! धर्मयोने ! वरप्रद ! ।
विश्वक्सेनामृत ! व्योम ! मधुकैटभसूदन ! ॥५४
वृहतां वृहणाजेय ! सर्व ! सर्वाभयप्रद ! ।
वरेण्यानघ ! जीमूताव्यय ! निर्वाणकारक ! ॥५५
आप्यायन ! अपांस्थान ! चैतन्याधार ! निष्क्रिय ! ।
सप्तशीर्षाध्वरगुरो ! पुराण ! पुरुषोत्तम ! ॥५६
ध्रुवाक्षर ! सुसूक्ष्मेश ! भक्तवत्सलपावन ! ।
त्वंगतिः सर्व देवानां त्वं गतिर्ब्रह्मवादिनाम् ॥५७
तथा विदितवेद्यानां गतिस्त्वं पुरुषोत्तम ! ।
प्रपन्नास्मि जगन्नाथ ! ध्रुवं वाचस्पतिं प्रभुम् ॥५८
सुब्रह्मण्यमनाधृष्यं वसुखेलं वसुप्रदम् ।
महायोगबलोपेतं पृश्निगर्भं धृतार्च्चिषम् ॥५९
वासुदेवं महात्मानं पुण्डीकाक्षमच्युतम् ।
सुरासुरगुरुं देवं विभुं भूतमहेश्वरम् ॥६०
एकव्यूहं चतुर्वक्त्रं जगत्कारणकारणम् ।
ब्रूहि मे भगवन् ! धर्म्मांश्चातुर्वर्ण्यस्य शाश्वतान् ॥६१
आश्रमाचारसंयुक्तान् सरहस्यान् ससंग्रहान् ।
एवमुक्तस्तु देवेशः पुनः क्षौणीमभाषत ॥६२

श्रृणु देवि! धरे! धर्म्मांश्चातुर्वर्ण्यस्य शाश्वतान्।
आश्रमाचारसंयुक्तान् सरहस्यान् ससंग्रहान् ॥६५
ये तु त्वां धारयिष्यन्ति सन्तस्तेषां परायणान्।
निषण्णा भव वामोरु! काञ्चनेऽस्मिन् वरासने ॥६६
सुखासीना निबोध त्वं धर्मान्निगदतो मम।
शुश्रुवे वैष्णवान् धर्म्मान् सुखासीना धरा तदा ॥७६

इति वैष्णवे शर्मशास्त्रे प्रथमोऽध्यायः॥

---

## अथ द्वितीयोऽध्यायः।

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति वर्णाश्चत्वारः।
तेषामाद्या द्विजातयः।
तेषां निषेकाद्यः श्मशानान्तो मन्त्रवत् क्रियासमूहः।
तेषाञ्च धर्माः ब्राह्मणस्याध्यापयनं क्षत्रियस्य शस्त्रनिष्ठता
वैश्यस्य पशुपालनं शूद्रस्य द्विजातिशुश्रूषा।
द्विजानां यजनाध्ययने।
अथैतेषां वृत्तयः ब्राह्मणस्य याजनप्रतिग्रहौ क्षत्रियस्य
क्षितित्राणं कृषिगोरक्षवाणिज्यकुसीदयोनिपोषणानि
वैश्यस्य, शूद्रस्य सर्वशिल्पानि। आपद्यनन्तरा वृत्तिः।
क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया॥

आर्ज्जवत्वमलोभश्च देवब्राह्मणपूजनम्।
अनभ्यसूया च तथा धर्मः सामान्यउच्यते।
इति वैष्णवे धर्मशास्त्रे द्वितीयोऽध्यायः।

---

## अथ तृतीयोऽध्यायः।

### अथ राजधर्माः॥

प्रजापरिपालनं वर्णाश्रमाणां स्वे स्वे धर्मे व्यवस्थापनम्।
राजा च जाङ्गलं पशव्यं शस्योपेतं देशमाश्रयेत्
वैश्यशूद्रपादश्च तत्र धन्वनृमहीवारिवृक्षगिरिदुर्गाणा
मन्यतमं दुर्गमाश्रयेत्। तत्र ग्रामाध्यक्षानपि कुर्यात्।
दशाध्यक्षान्। शताध्यक्षान्। देशाध्यक्षांश्च।
ग्रामदोषाणां ग्रामाध्यक्षः परीहारं कुर्य्यात्।
अशक्तो दशग्रामाध्यक्षाय निवेदयेत्।
सोऽप्यशक्तः शताध्यक्षाय। सोऽप्यशक्तो देशाध्यक्षाय।
देशाध्यक्षोऽपि सर्व्वात्मना दोषमुच्छिन्द्यात्।
आकरशुल्कतरनागवनेष्वाप्तान्नियुञ्जीत।
धर्मिष्ठान् धर्मकार्य्येषु। निपुणानर्थकार्य्येषु।
शूरान् संग्रामकर्म्मसु। उग्रानुग्रेषु षण्ढान् स्त्रीषु।
प्रजाभ्यो वल्यर्थं सम्वत्सरेण धान्यतः षष्ठमंशमादद्यात्।
सर्वशस्येभ्यश्च द्विकं शतम्। पशुहिरण्येभ्यो वस्त्रेभ्यश्च।

मांसमधुघृतौषधिगन्धमूलफलरसदारु पत्राजिनमृद्भाण्डा-
श्मभाण्डवैदलेभ्यः षष्ठभागम्।
ब्राह्मणेभ्यः करादानं न कुर्यात् ते हि राज्ञो धर्मकरदाः।
राजा च प्रजाभ्यः सुकृतदुष्कृतषष्ठांशभाक्।
स्वदेशपण्याच्च शुल्कांशं दशममादद्यात् परदेशपण्याच्च
विंशतितमम्। शुल्कस्थानमपक्रामन् सर्वापहारित्वमाप्नुयात्।
शिल्पिनः कर्मजीविनश्च शूद्राश्च मासेनैकं राज्ञः कर्म कुर्य्युः।
स्वाम्यमात्यदुर्गकोषदण्डराष्ट्रमित्राणि प्रकृतयः।
तद्दूषकांश्च हन्यात्। स्वराष्ट्रपरराष्ट्रयोश्च चारचक्षुः स्यात्।
साधूनां पूजनं कुर्य्यात्। दुष्टांश्च हन्यात्।
शत्रुमित्रोदासीनमध्यमेषु सामभेददानदण्डान् यथार्हं
यथाकालं प्रयुञ्जीत।
सन्धिविग्रहयानासनसंश्रयद्वैधीभावांश्च यथाकालमाश्रयेत्।
चैत्रे मार्गशीर्षे वा यात्रां यायात्। परस्य व्यसने वा।
परदेशावाप्तौ तद्देशधर्मान्नोच्छिन्द्यात्।
परेणाभियुक्तश्च सर्व्वात्मना राष्ट्रं गोपायेत्।
नास्ति राज्ञां समरे तनुत्यागसदृशोधर्मः।
गोब्राह्मणनृपतिमित्रधनदारजीवितरक्षणाद्ये हतास्ते स्वर्गभाजः।
वर्णशङ्कररक्षणार्थे च।
राजा पुरावाप्तौ तत्र तत्कुलीनमभिषिञ्चेत्॥
न राजकुलमुच्छिन्द्यात्। अन्यत्राकुलीनराजकुलात्।
मृगयाक्षस्त्रीपानेष्वभिरतिं न कुर्य्यात्।

वाक्पारुष्यदण्डपारुष्ये च नार्थदूषणं कुर्य्यात्।
आयद्वाराणि नोच्छिन्द्यात्। नापात्रवर्षी स्यात्।
आकरेभ्यः सर्वमादद्यात्॥
निधिं लब्ध्वा तदर्द्धं ब्राह्मणेभ्यो दद्यात् द्वितीयमर्द्धं कोशे-
प्रवेशयेत्। निधिं ब्राह्मणो लब्ध्वा सर्वमादद्यात्।
क्षत्रियश्चतुर्थमंशं राज्ञे दद्यात् चतुर्थमंशं-
ब्राह्मणेभ्योऽर्द्धमादद्यात्।
वैश्यश्चतुर्थमंशं राज्ञे दद्यात् ब्राह्मणेभ्योऽर्द्धमंशमादद्यात्।
शूद्रश्चावाप्तं द्वादशधा विभज्य पञ्चांशान् राज्ञे दद्यात्
पञ्चांशान् ब्राह्मणेभ्योंऽशद्वयमादद्यात्।
अनिवेदितविज्ञातस्य सर्वमपहरेत्।
स्वनिहिताद्राज्ञे ब्राह्मणवर्ज्जं द्वादशमंशं दद्युः।
परनिहितं स्वनिहितमिति ब्रुवंस्तत्समं दण्डमावहेत्॥
बालानाथस्त्रीधनानि च राजा परिपालयेत्।
चौरहृतं धनमवाप्य सर्वमेव सर्ववर्णेभ्योदद्यात्।
अनवाप्य च स्वकोशादेव दद्यात्।
शान्तिस्वस्त्ययनैर्दैवोपघातान् प्रशमयेत्।
परचक्रोपघातांश्च शस्त्रनित्यतया।
वेदेतिहासधर्मशास्त्रार्थकुशलं कुलीनमव्यङ्गं-
तपस्विनं पुरोहितञ्च वरयेत्।
शुचीनलुब्धानवहिताञ्छक्तिसम्पन्नान् सर्व्वार्थेषु च-
सहायान् स्वयमेव व्यवहारान् पश्येद्विद्वद्भिर्ब्राह्मणैः सार्द्धम्।

व्यवहारदर्शने ब्राह्मणं वा नियुञ्ज्यात्।
जन्मकर्मव्रतोपेताश्च राज्ञा सभासदः कार्य्यारिपौ मित्रे च–
ये समाः कामक्रोधलोभादिभिः कार्य्यार्थिभिरनाहार्य्याः।
राजा च सर्वकार्य्येषु सम्बत्सराधीनः स्यात्।
देवब्राह्मणान् सततमेवपूजयेत्।
वृद्धसेवी भवेत्। यज्ञयाजी च।
नचास्य विषये ब्राह्मणः क्षुधार्त्तोऽवसीदेत्।
नचान्योऽपि सत्कर्मनिरतः।
ब्राह्मणेभ्यश्च भुवं प्रतिपादयेत्।
येषाञ्च प्रतिपादयेत्तेषां स्ववंश्यानन्तरप्रमाणं दानच्छेदोप-
वर्णनञ्च पटे ताम्रपात्रे वा लिखितं स्वमुद्राङ्कितञ्चा-
गामिनृपविज्ञापनार्थं दद्यात्। परदत्ताञ्च भुवं नापहरेत्।
ब्राह्मणेभ्यः सर्वदायान् प्रयच्छेत्।
सर्वतस्त्वात्मानं गोपायेत् सुदर्शनश्च स्यात्।
विषघ्नागदमन्त्रधारी च। नापरीक्षितमुपयुञ्ज्यात्।
स्मितपूर्व्वाभिभाषी स्यात्। बध्येष्वपि न भ्रुकुटीमाचरेत्।
अपराधानुरूपञ्च दण्डं दण्ड्येषु दापयेत्।
सम्यग्दण्डप्रणयनं कुर्य्यात्। द्वितीयमपराधं न कस्यचित् क्षमेत।
स्वधर्म्ममपालयन्नादण्ड्योनामास्ति राज्ञः।

यत्र श्यामो लोहिताक्षो दण्डश्चरति निर्भरः।
प्रजास्तत्र विबर्द्धन्ते नेता चेत् साधु पश्यति।
स्वराष्ट्रे न्यायदण्डः स्याद्भृशदण्डश्च शत्रुषु।

सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ।
एवं वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः ।
विस्तीर्यते यशोलोके तैलविन्दुरिवाम्भसि ।
प्रजासुखे सुखी राजा तद्दुःखे यश्च दुःखितः ।
स कीर्त्तियुक्तो लोकेऽस्मिन् प्रेत्य स्वर्गे महीयते ॥

इति वैष्णवे धर्मशास्त्रे तृतीयोऽध्यायः ॥

---

॥ अथ चतुर्थोऽध्यायः ॥

जालस्थार्कमरीचिगतं रजस्त्रसरेणुसंज्ञकम् ।
तदष्टकं लिख्या । तत्त्रयं राजसर्षपः । तत्त्रयं गौरसर्षपः ।
तत्षट्कं यवः । तत्त्रयं कृष्णलम् । तत्पञ्चकं माषः ।
तद्द्वादशकमक्षार्द्धम् । अक्षार्द्धमेव सचतुर्माषकं सुवर्णः ।
चतुःसुवर्णकोनिष्कः । द्वे कृष्णले समधृते रूप्यमाषकः ।
तत्षोडशकं धरणम् । ताम्रकार्षिकः कार्षापणः ।

पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः ।
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः ॥

इति वैष्णवे धर्मशास्त्रे चतुर्थोऽध्यायः ॥

अथमहापातकिनो ब्राह्मणवर्ज्जं सर्वे बध्याः।
न शारीरो ब्राह्मणस्य दण्डः।
स्वदेशाद्ब्राह्मणं कृताङ्कं विवासयेत्।
तस्य च ब्रह्महत्यायामशिरस्कं पुरुषं ललाटे कुर्यात्।
सुराध्वजं सुरापाने। श्वपदं स्तेये। भगं गुरुतल्पगमने।
अन्यत्रापि बध्यकर्मणि तिष्ठन्तं समग्रधनमक्षतं विवासयेत्।
कूटशासनकर्तॄंश्च राजा हन्यात्। कूटलेख्यकारांश्च।
गरदाग्निदप्रसह्यतस्करान् स्त्रीबालपुरुषघातिनश्च।
ये च धान्यं दशभ्यः कुम्भेभ्योऽधिकमपहरेयुः।
धरिममेयानां शतादप्यधिकं।
ये चाकुलीना राज्यमभिकामयेयुः।
सेतुभेदकांश्च प्रसह्यतस्कराणाम्बावकाशभक्तप्रदांश्च।
अन्यत्र राजाशक्तेः स्त्रियमशक्तभर्तृकां तदतिक्रमणाश्च।
हीनवर्णोऽधिकवर्णस्य येनाङ्गेनापराधं कुर्यात्तदेवास्य शातयेत्।
एकासनोपवेशी कट्यां कृताङ्को निर्व्वास्यः।
निष्ठीव्योष्ठद्वयविहीनः कार्यः अवशब्दयिता च गुदहीनः।
आक्रोशयिता च विजिह्वः।
दर्पेण धर्मोपदेशकारिणो राजा तप्तमासेचयेत्तैलमास्ये।
द्रोहेण च नामजातिग्रहणे दशाङ्गुलोऽस्य शङ्कुर्निखेयः।
श्रुतदेशजातिकर्मणामन्यथावादी कार्षापणशतद्वयम् दण्ड्यः।
काणखञ्जादिनां तथावाद्यपि कार्षापणद्वयम्।
गुरूनाक्षिपन् कार्षापणशतम्।
परस्य पतनीयाक्षेपे कृते तूत्तमसाहसं।

उपपातकयुक्ते मध्यमम् त्रैविद्यवृद्धाक्षेपे जातिपूगानाञ्च ।

ग्रामदेशयोः प्रथमसाहसम् ।

न्यङ्गतायुक्ताक्षेपे कार्षापणशतम् ।

मातृयुक्ते तूत्तमं सवर्णाक्रोशने द्वादशपणान् दण्ड्यः ।

हीनवर्णाक्रोशने षड्दण्ड्यः ।

यथाकालमुत्तमसवर्णाक्षेपे तत्प्रमाणोदण्डः ।

तयोर्वाकार्षापणास्त्रयः शुष्कवाक्याभिधाने त्वेवमेव ।

पारजायी सवर्णागमने तूत्तमसाहसं दण्ड्यः ।

हीनवर्णागमने मध्यमम् गोगमने च ।

अन्त्यागमने बध्यः पशुगमने कार्षापणशतं दण्ड्यः ॥

दोषमनाख्याय कन्यां प्रयच्छंश्च ताञ्च बिभृयात् ।

अदुष्टां दुष्टामिति ब्रुवन्नुत्तमसाहसम् ।

गजाश्वोष्ट्रगोघाती त्वेककरपादः कार्यः ।

विमांसविक्रयी कार्षापणशतम् ग्राम्यपशुघाती च—

पशुस्वामिने तन्मूल्यं दद्यात् ।

आरण्यपशुघाती पञ्चाशतं कार्षापणान् ।

पक्षिघाती मत्स्यघाती च कार्षापणान् ।

फलोपगमद्रुमच्छेदी कीटोपघाती तूत्तमसाहसं दण्ड्यः ।

पुष्पोपगमद्रुमच्छेदी मध्यमम् ।

वल्लीगुल्मलताच्छेदी कार्षापणशतम् ।

तृणच्छेद्येकं सर्वे च तत्स्वामिनां तदुत्पत्तिम् ॥

हस्तेनावगोरयिता दशकार्षापणान् ।

पादेन विंशतिं । काष्ठेन प्रथमसाहसम् ।
पाषाणेन मध्यमम् । शस्त्रेणोत्तमम् ।
पादकेशांशुककरलुण्ठने दशपणान् दण्ड्यः ।
शोणितेन विना दुःखमुत्पादयिता द्वात्रिंशत्पणान् ।
सह शोणितेन चतुःषष्टिं ।
करपाददन्तभङ्गे कर्णनासाविकर्त्तने मध्यमम् ।
चेष्टाभोजनवाग्रोधे प्रहारदाने च ।
नेत्रकन्धराबाहुसक्थ्यंसभङ्गे चोत्तमम् ।
उभयनेत्रभेदिनं राजा यावज्जीवं बन्धनान्न विमुञ्चेत् ।
तादृशमेव वा कुर्यात् ।
एकं बहूनां निघ्नतां प्रत्येकमुक्ताद्दण्डाद्द्विगुणः ।
क्रोशन्तमभिधावतां तत्समीपवर्त्तिनां संसरताञ्च ।
सर्वे च पुरुषपीडाकरास्तदुत्थानव्ययं दद्युः ॥
ग्राम्यपशुपीडाकराश्च ।
गोश्वोष्ट्रगजापहार्य्येकपादकरः कार्यः अजाव्यपहार्य्येककरश्च ।
धान्यापहार्य्येकादशगुणं दण्ड्यः ।
शस्यापहारी च ॥
सुवर्णरजतवस्त्राणां पञ्चाशतस्त्वभ्यधिकमपहरन्-
विकरः तदूनमेकादशगुणं दण्ड्यः ।
सूत्रकार्पासगोमयगुडदधिक्षीरतक्रतृणलवणमृद्भस्मपक्षि-
मत्स्यघृततैलमांसमधुवैदलवेणुमृण्मयलोहदण्डानामपहर्त्ता-
मूल्यात्त्रिगुणंदण्ड्यः ।

पक्वान्नानाञ्चपुष्पहरितगुल्मवल्लीलतापर्णानामपहरणे-
पञ्चकृष्णलान् ।

शाकमूलफलानाञ्च रत्नापहार्युत्तमसाहसम् ।

अनुक्तद्रव्याणा मपहर्त्ता मूल्यसमम् ।

स्तेनाः सर्बमपहृतं धनिकस्य दाप्याः ।

ततस्तेषामभिहितदण्डप्रयोगः ।

येषां देयः पन्थास्तेषामपथदायी कार्षापणानां-
पञ्चविंशति दण्ड्यः आसनार्हस्यासन मदद्च ।

पूजार्हमपूजयंश्च ।

प्रातिवेश्यब्राह्मणे निमन्त्रणातिक्रमे च ।

निमन्त्रयित्वा भोजनादायिनश्च ।

निमन्त्रितस्तथेत्युक्तवानभुञ्जानः
सुवर्णमाषकं निमन्त्रयितुश्च द्विगुणमन्नम् ।

अभक्ष्येण ब्राह्मणदूषयिता षोडशसुवर्णान् ।

जात्यपहारिणा शतं सुरया बध्यः ।

क्षत्रियं दूषयितुस्तदर्द्धं । वैश्यं दूषयितुस्तदर्द्ध मपि ।

शूद्रं दूषयितुः प्रथमसाहसम् ।

कामकारेणास्पृश्यस्त्रैवर्णिकंस्पृशन् बध्यः ।

रजस्वलां शिफाभिस्ताडयेत् ।

पथ्युद्यानोदकसमीपेऽशुचिकारी पणशतं । तच्चापास्यात् ।

गृहभूकुड्याद्युपभेत्ता मध्यमसाहसं दण्ड्यः । तच्च योजयेत् ।

गृहेपीडाकरं द्रव्यं प्रक्षिपन् पणशतं ॥

साधारण्यापलापी च। प्रोषितस्याप्रदाता च।
पितृपुत्राचार्ययाज्यर्त्विजामन्योन्यापतितत्यागी च।
न च तान् जह्यात्।
शूद्रप्रव्रजितानां दैवे पित्र्ये भोजकश्च।
अयोग्यकर्मकारी च। समुद्रगृहभेदकः।
अनियुक्तः शपथकारी पशूनां पुंस्त्वोपघातकारी च।
पितापुत्रविरोधे तु साक्षिणां दशपणो दण्डः।
यस्तयोश्चान्तरः स्यात्तस्योत्तमसाहसम्।
तुलामानकूटकर्मकर्तृश्च।
तदकूटे कूटवादिनश्च द्रव्याणां प्रतिरूपविक्रयिकस्य च।
सम्भूयवणिजां पण्यमनर्घेणावरुन्धतां।
प्रत्येकं विक्रीणताञ्च।
गृहीतमूल्यं पण्यान्तु क्रेतुर्नैव दद्यात्तस्यासौ सोदयं दाप्यः।
राज्ञा च पणशतं दण्ड्यः।
क्रीतमक्रीणतो या हानिः सा क्रेतुरेव स्यात्।
राजबिनिषिद्धं विक्रीणतस्तदपहारः।
तारिकः स्थलजं शुल्कं गृह्णन् दश पणान् दण्ड्यः।
ब्रह्मचारिवानप्रस्थभिक्षुगुर्विणीतीर्थानुसारिणां नाविकः
शौल्किकः शुल्कमाददानश्च।
तच्च तेषां दद्यात्। द्यूते कूटाक्षदेविनां करच्छेदः।
उपधिदेविनां सन्दंशच्छेदः। ग्रन्थिभेदकानां करच्छेदः।
दिवा पशूनां वृकाद्युपघाते पाते त्वनापदि पालदोषः।

विनष्टपशुमूल्यञ्च स्वामिने दद्यात्।
अननुज्ञातां दुहन् पञ्चविंशतिकार्षापणान् दण्ड्यः।
महिषीचेच्छस्यनाशं कुर्य्यात्तत्पालकस्त्वष्टौ माषकान् दण्ड्यः।
अपालायाः स्वामी अश्वस्तूष्ट्रोगर्द्दभो वा।
गौश्चेत्तदर्द्धं तदर्द्धमजाविकं।
भक्षयित्वोपविष्टेषु द्विगुणं।
सर्व्वत्र स्वामिने विनष्टशस्यमूल्यञ्च।
पथिग्रामसीमान्ते न दोषः अनावृते च अल्पकानां उत्सृष्टवृषभसूतिकानाञ्च।
यस्तूत्तमवर्णान् दास्ये नियोजयेत्तस्योत्तमसाहसदण्डः।
त्यक्तप्रव्रज्यो राज्ञोदास्यं कुर्य्यात्।
भृतकश्चापूर्णकाले भृतिं त्यजन् सकलमेव मूल्यं दद्यात्।
राज्ञे च पणशतं दद्यात् तद्दोषेण यद्विनश्येत्तत् स्वामिने।
अन्यत्र दैपोवघातात्।
स्वामी चेद्भृतकमपूर्णे काले जह्यात्तस्य सर्व्वं मूल्यं दद्यात्।
पणशतञ्च राजनि अन्यत्र भृतकदोषात्।
यः कन्यां पूर्व्वदत्तामन्यस्मै दद्यात् स चौरवच्छास्यः।
वरदोषं विना निर्द्दोषां परित्यजन् पत्नीञ्च अजानन्-प्रकाशं यः परद्रव्यं क्रीणीयात्तत्र तस्यादोषः।
स्वामी द्रव्यमाप्नुयात्।
यद्यप्रकाशं हीनमूल्यञ्च क्रीणीयात्तदा क्रेता विक्रेताच चौरवच्छास्यौ।

गणद्रव्यापहर्त्ता विवास्यः तत्सम्बिदं यश्च लङ्घयेत्।
निक्षेपापहार्य्यर्थवृद्धिसहितं धनं धनिकस्य दाप्यः।
राज्ञा चौरवच्छास्यः यश्चानिक्षिप्तं निक्षिप्तमिति ब्रूयात्।
सीमाभेत्तारमुत्तमसाहसं दण्डयित्वा पुनः
सीमां लिङ्गान्वितां कारयेत्।
जातिभ्रंशकरस्याभक्ष्यस्य भक्षयिता विवास्यः।
अभक्ष्यस्याविक्रेयस्य च विक्रयी देवप्रतिमाभेदक-
श्चोत्तमसाहसं दण्डनीयः।
भिषङ्मिथ्याचरन्नुत्तमेषु पुरुषेषु।
मध्यमेषु मध्यमं तिर्य्यक्षु प्रथमम्।
प्रतिश्रुतस्याप्रदायी तद्दापयित्वा प्रथमसाहसं दण्ड्यः।
कूटसाक्षिणां सर्व्वस्वापहारः कार्य्यः।
उत्कोचोपजीविनां सभ्यानाञ्च।
गोचर्ममात्राधिकां भुवमन्यस्याधीकृतां तस्मादानिर्मोच्यान्यस्य
यः प्रयच्छेत् स वध्यः। ऊनाञ्चेत् षोड़शसुवर्णान् दण्ड्यः।

एकोऽश्नीयाद्यदुत्पन्नं नरः सम्वत्सरं फलम्।
गोचर्ममात्रा सा क्षोणी स्तोका वा यदि वा बहुः॥

ययोर्निक्षिप्तआधिस्तौ विवदेतां यदा नरौ।
यस्य भुक्तिः फलं तस्य बलात्कारं विना कृता॥

सागमेन च भोगेन भुक्तं सम्यग्यदा भवेत्।
आहर्त्ता लभते तत्र नापहार्य्यन्तु तत् क्वचित्॥

पित्रा भुक्तन्तु यद्द्रव्यं भुक्त्याचारेण धर्मतः ।
तस्मिन् प्रेते न वाच्योऽसौ भुक्त्या प्राप्तं हि तस्य तत् ॥
त्रिभिरेव च या भुक्ता पुरुषैर्भूर्यथाविधि ।
लेख्याभावेऽपि तां तत्र चतुर्थः समवाप्नुयात् ॥
नखिनां दंष्ट्रिणाञ्चैव शृङ्गिणामाततायिनाम् ।
हस्त्यश्वानां तथान्येषां बधे हन्ता न दोषभाक् ॥
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥
नाततायिबधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति ॥
उद्यतासिविषाग्निञ्च शापोद्यतकरं तथा ।
आथर्व्वणेन हन्तारं पिशुनञ्चैव राजसु ॥
भार्यातिक्रामणञ्चैव विद्यात् सप्ताततायिनः ।
यशोवित्तहरानन्यानाहुधर्मार्थहारकान् ॥
उद्देशतस्ते कथितो धरे ! दण्डविधिर्मया ।
सर्वेषामपराधानां विस्तरादतिविस्तरः ॥
अपराधेषु चान्येषु ज्ञात्वा जातिं धनं वयः ।
दण्डं प्रकल्पयेद्राजा सम्मन्त्र्य ब्राह्मणैः सह ॥
दण्ड्यं प्रमोचयन् दण्ड्याद् द्विगुणं दण्डमावहेत् ।
नियुक्तश्चाप्यदण्ड्यानां दण्डकारी नराधमः ॥
यस्य चौरः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक् ।
न साहसिकदण्डघ्नौ स राजा शक्रलोकभाक् ॥

इति वैष्णवे धर्मशास्त्रे पञ्चमोऽध्यायः ॥

अथोत्तमर्णोऽधमर्णाद्यथादत्तमर्थं गृह्णीयात्।
द्विकं त्रिकंचतुष्कं पञ्चकञ्च शतं वर्णानुक्रमेण
प्रतिमासम् सर्वे वर्णा वा स्वप्रतिपन्नां वृद्धिं दद्युः।
अकृतामपि वत्सराति क्रमेण यथाविहिताम्।
आध्युपभोगेवृद्ध्यभावः।
दैवराजोपघातादृते विनष्टमाधिमुत्तमर्णो दद्यात्।
अन्तवृद्धौ प्रविष्टायामपि।
न स्थावरमाधिमृते वचनात् गृहीतधनप्रवेशार्थमेव
यत् स्थावरं दत्तं तद्गृहीतधनप्रवेशे दद्यात्।
दीयमानं प्रयुक्तमर्थमुत्तमर्णस्यागृह्णतस्ततः परं न वर्द्धते।
हिरण्यस्य परा वृद्धिर्द्विगुणा। धान्यस्य त्रिगुणा।
वस्त्रस्य चतुर्गुणा। सन्ततिः स्त्रीपशूनाम्।
किण्वकार्पाससूत्रचर्मायुधेष्टकाङ्गाराणामक्षया।
अनुक्तानां द्विगुणा।
प्रयुक्तमर्थं यथाकथञ्चित् साधयन्न राज्ञो वाच्यः स्यात्।
साध्यमानश्चेद्राजानमभिगच्छेत्तत्समं दण्ड्यः।
उत्तमर्णश्चेद्राजानमियात्तद्विभावितोऽधमर्णो राज्ञे
धनदशभागसम्मितं दण्डं दद्यात्।
प्राप्तार्थश्चोत्तमर्णो विंशतितममंशम्।
सर्व्वापलाप्येकदेशविभावितोऽपि सर्वं दद्यात्।
तस्य च भावनास्तिस्रो भवन्ति लिखितं साक्षिणः समक्रिया च।
ससाक्षिकमात्तं ससाक्षिकमेव दद्यात्।

लिखितार्थप्रविष्टोलिखितं पाटयेत् ।
असमग्रदाने लेख्यासन्निधाने चोत्तमर्णोलिखितं दद्यात् ।
धनग्राहिणि प्रेते प्रव्रजिते द्विदशसमाः प्रवसिते वा तत्पुत्रपौत्रैर्धनं देयम् । नातः परमनीप्सुभिः ।
सपुत्रस्य वाऽपुत्रस्य वा ऋक्थग्राही ऋणं दद्यात् ।
निर्धनस्य स्त्रीग्राही । न स्त्री पतिपुत्रकृतम् ।
नस्त्रीकृतं पतिपुत्री न पिता पुत्रकृतम् ।
अविभक्तैः कृतमृणं यस्तिष्ठेत् स दद्यात् ।
पैतृकमृणमविभक्तानां भ्रातॄणाञ्च ।
विभक्ताश्च दायानुरूपमंशम् ।
गोपशौण्डिकशैलूषरजकव्याधस्त्रीणां पतिर्दद्यात् ।
वाक्प्रतिपन्नं नादेयं कस्यचित् । कुटुम्बार्थे कृतञ्च ।

यो गृहीत्वा ऋणं सर्वं श्वोदास्यामीतिसामकम् ।
न दद्याल्लोभतः पश्चात्तथा वृद्धिमवाप्नुयात् ॥
दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥
बहवश्चेत् प्रतिभुवो दद्युस्तेऽर्थं यथाकृतम् ।
अर्थेऽविशेषिते तेषु धनिकच्छन्दतः क्रिया ॥
यमर्थं प्रतिभूर्दद्याद्धनिकेनोपपीडितः ।
ऋणिकस्तं प्रतिभुवे द्विगुणं दातुमर्हति ॥

इति वैष्णवे धर्मशास्त्रे षष्ठोऽध्यायः ॥

अथ लेख्यं त्रिविधं राजसाक्षिकं ससाक्षिकमसाक्षिकञ्च।
राजाधिकरणे तन्नियुक्तकायस्थकृतं तदध्यक्षकरचिह्नितं राजसाक्षिकम्।
यत्र क्वचन येन केनचिल्लिखितं साक्षिभिः स्वहस्तचिह्नितं ससाक्षिकम्।
स्वहस्तलिखितमसाक्षिकम्। तद्बलात्कारितमप्रमाणम्।
उपधिकृताश्च सर्व एव।
दूषितकर्म दुष्टसाक्ष्यं तत्ससाक्षिकमपि।
तादृग्विधेनलिखितञ्च।
स्त्रीबालास्वतन्त्रमत्तोन्मत्तभीतताडितकृतञ्च।
देशाचाराविरुद्धं व्यक्ताधिकृतलक्षणमलुप्तक्रमाक्षरं प्रमाणम्।

वर्णैश्च तत्कृतैश्चिह्नैः पत्रैरेव च युक्तिभिः।
सन्दिग्धं साधयेल्लेख्यं तद्युक्तिप्रतिरूपितैः॥
यत्रर्णी धनिको वापि साक्षी वा लेखकोऽपि वा।
म्रियते यत्र तल्लेख्यं तत्स्वहस्तैः प्रसाधयेत्॥

इति वैष्णवे धर्मशास्त्रे सप्तमोऽध्यायः॥

## अथाष्टमोऽध्यायः ।

अथ साक्षिणः न राजश्रोत्रियप्रव्रजितकितवतस्करपराधीन-
स्त्रीबालसाहसिकातिवृद्धमत्तोन्मत्ताभिशस्तपतितक्षु-
तृष्णार्त्तव्यसनिरागान्धाः ।
रिपुमित्रार्थसम्बन्धिविकर्मदृष्टदोषसहायाश्च ।
अनिर्दिष्टस्तु साक्षित्वे यश्चोपेत्य ब्रूयात् । एकश्चासाक्षी ।
स्तेयसाहसवाग्दण्डपारुष्यसंग्रहणेषु साक्षिणो न परीक्ष्याः ।
अथ साक्षिणः कुलजावृत्तवित्तसम्पन्ना यज्वनस्तपस्विनः
पुत्रिणोधर्मज्ञाअधीयानाः सत्यवन्तस्त्रैविद्यवृद्धाश्च ।
अभिहितगुणसम्पन्नउभयानुमतएकोऽपि ।
द्वयोर्विवदमानयोर्यस्य पूर्ववादस्तस्य साक्षिणः प्रष्टव्याः ।
आधर्य्यं कार्यवशाद्यत्र पूर्वपक्षस्यभवेत्तत्र प्रतिवादिनोऽपि ।
उद्दिष्टसाक्षिणि मृते देशान्तरगते वा तदभिहितज्ञातारःप्रमाणम्
समक्षदर्शनात् साक्षी श्रवणाद्वा ।
साक्षिणश्च सत्येन पूयन्ते । वर्णिनां यत्र बधस्तत्रानृतेन ।
तत्पावनाय कुष्माण्डीभिर्द्विजोऽग्निं जुहुयात् ।
शूद्र एकाह्निकं गोदशकस्य ग्रासं दद्यात् ।
स्वभावविकृतौ मुखवर्णविनाशेऽसम्बद्धप्रलापे च
कूटसाक्षिणं विद्यात् ।
साक्षिणश्चाहूयादित्योदये कृतशपथान् पृच्छेत् ।
ब्रूहीति ब्राह्मणं पृच्छेत् । सत्यं ब्रूहीति राजन्यम् ।

गोवीजकाञ्चनैर्वैश्यम् । सर्वमहापातकैस्तु शूद्रम् ।
साक्षिणः श्रावयेत् ।
ये महापातकिनो लोका ये चोपपातकिनस्ते कूटसाक्षिणामपि ।
जननमरणान्तरे कृतहानिश्च ।
सत्येनादित्यस्तपति सत्येन भाति चन्द्रमाः ।
सत्येन वाति पवनः । सत्येन भूर्धारयति ।
सत्येनापस्तिष्ठन्ति । सत्येनाग्निस्तिष्ठति ।
स्वर्गश्च सत्येन । सत्येन देवाः । सत्येन यज्ञाः ॥

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥
जानन्तोऽपि हि ये साक्ष्ये तूष्णीम्भूता उपासते ।
ते कूटसाक्षिणां पापैस्तुल्या दण्डेन चाप्यथ ॥
एवं हि साक्षिणः पृच्छेद्वर्णानुक्रमतो नृपः ।
यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ॥
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ।
बहुत्वं प्रतिगृह्णीयात् साक्षिद्वैधे नराधिपः ॥
समेषु च गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ।
यस्मिन् यस्मिन् विवादे तु कूटसाक्ष्यनृतं वदेत् ।
तत्तत्कार्यं निवर्त्तेत कृतं वाप्यकृतं भवेत् ॥

इति वैष्णवे धर्मशास्त्रेऽष्टमोऽध्यायः ॥

## ॥ अथ नवमोऽध्यायः ॥

### अथ समयक्रिया ॥

राजद्रोहसाहसेषु यथाकामम् । निक्षेपस्तेयेष्वर्थप्रमाणम् ।

सर्वेष्वेवार्थेषु मूल्यं कनकं कल्पयेत् ।

तत्र कृष्णलोने शूद्रं दूर्वाकरं शापयेत् ।

द्विकृष्णलोने तिलकरम् । त्रिकृष्णलोने रजतकरम् ।

चतुःकृष्णलोने सुवर्णकरम् ।

पञ्चकृष्णलोने शीतोद्धृतमहीकरम् ।

सुवर्णार्द्धे कोशो देयः शूद्रस्य ।

ततः परं यथार्हं धटाग्न्युदकविशेषाणामन्यतमम् ।

द्विगुणेऽर्थे यथाभिहिता समयक्रिया वैश्यस्य ।

त्रिगुणे राजन्यस्य । कोशवर्ज्जं चतुर्गुणे ब्राह्मणस्य ।

न ब्राह्मणस्य कोशं दद्यात् ।

अन्यत्रागामिकालसमयनिबन्धनक्रियातः ।

कोशस्थाने ब्राह्मणं शीतोद्धृतमहीकरमेव शापयेत् ।

प्रागदृष्टदोषमल्पेऽप्यर्थे दिव्यानामन्यतम मेव कारयेत् ।

सत्सु विदितसच्चरित्रं न महत्यर्थेऽपि ।

अभियोक्ता वर्त्तयेच्छीर्षं । अभियुक्तश्च दिव्यं कुर्यात् ।

राजद्रोहसाहसेषु विनापि शीर्षवर्त्तनात् ।

स्त्री ब्राह्मणविकलासमर्थरोगिणां तुला देया ।

सा च न वाति वायौ ।

न कुष्ठसमर्थलोहकाराणामग्निर्देयः ।

शरद्ग्रीष्मयोश्च न कुष्ठिपैत्तिकब्राह्मणानां विषं देयं-

प्रावृषि च न श्लेष्मव्याध्यर्दितानां भीरूणां-

श्वासकासिनामम्बुजीविनाञ्चोदकम् ।

हेमन्तशिशिरयोश्च नास्तिकेभ्यः कोशो देयः-

न देशे व्याधिमयकोपसृष्टे च ।

सचैलं स्नातमाहूय सूर्योदय उपोषितम् ।
कारयेत् सर्वदिव्यानि देवब्राह्मणसन्निधौ ॥

इति वैष्णवे धर्मशास्त्रे नवमोऽध्यायः ॥

---

## ॥ अथ दशमोऽध्यायः ॥

### अथ धटः ।

चतुर्हस्तोच्छ्रितो द्विहस्तायतः ।

तत्र सारवृक्षोद्भवपञ्च हस्तायतोभयतः शिक्या तुला ।

ताञ्च सुवर्णकारकांस्यकाराणामन्यतमो विधृयात् ।

तत्र चैकस्मिन् शिक्ये पुरुषमारोपयेद् द्वितीये प्रतिमानं शिलादि ।

प्रतिमानपुरुषौ समधृतौ सुचिह्नितौ कृत्वा पुरुषमवतारयेत् ।

धटञ्च समयेन गृह्णीयात् तुलाधारश्च ॥

ब्रह्मघ्नो ये स्मृता लोका ये लोकाः कूटसाक्षिणः ।
तुलाधारस्य ते लोकास्तुलां धारयतोमृषा ॥
धर्मपर्यायवचनैर्धट इत्यभिधीयते ।
त्वमेव धट ! जानीषे न विदुर्यानि मानुषाः ॥
व्यवहाराभिशस्तोऽयं मानुष स्तुल्यते त्वयि ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ॥
ततस्तमारोपयेच्छिक्ये भूय एवाथ तं नरम् ।
तुलितो यदि वर्द्धेत ततः स धर्मतः शुचिः ॥
शिक्यच्छेदेऽक्षभङ्गेषु भूयस्त्वारोपयेन्नरम् ।
एवं निःसंशयं ज्ञानं यतो भवति निर्णयः ॥

इति वैष्णवे धर्मशास्त्रे दशमोऽध्यायः ॥

---

## ॥ अथ एकादशोऽध्यायः ॥

अथाग्निः ।

षोडशाङ्गुलं तावदन्तरं मण्डलं सप्तकं कुर्यात् ।

ततः प्राङ्मुखस्य प्रसारितभुजद्वयस्य सप्ताश्वत्थ पत्राणि करयोर्दद्यात् ।

तानि च करद्वयसहितानि सूत्रेण वेष्टयेत् ।

ततस्तत्राग्निवर्णं लोहपिण्डं पञ्चाशत्पलिकं संन्यसेत् ।
तमादाय नातिद्रुतं नाविलम्बितं मण्डलेषु पदन्यासं कुर्वन् व्रजेत् ।
ततः सप्तम मण्डलमतीत्य भूमौ पिण्डं जह्यात् ।

यद्यन्यचिह्नितकरस्तमशुद्धं विनिर्दिशेत् ।
न दग्धः सर्वथा यस्तु स वै शुद्धो भवेन्नरः ॥
भयाद्वा पातयेद्यस्तु दग्धो वा न विभाव्यते ।
पुनस्तं धारयेत् पिण्डं समयस्याविशोधनात् ॥
करौ विमृदितव्रीहेस्तस्यादादेव लक्षयेत् ।
अभिमन्त्र्यास्य करयोर्लोहपिण्डं ततो न्यसेत् ॥
त्वमग्ने ! सर्व्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेवाग्ने ! विजानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ॥

इति वैष्णवे धर्मशास्त्रे एकादशोऽध्यायः ॥

॥ अथ द्वादशोऽध्यायः ।

अथौदकम् ।

पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्जितेऽम्भसि । तत्र नाभिमग्नस्यारागद्वेषिणः पुरुषस्यान्यस्य जानुनी गृहीत्वाभिमन्त्रितरतम्भः प्रविशेत् । तत्समकालश्च नातिक्रूरमृदुना धनुषा पुरुषोऽपरः शरक्षेपं कुर्यात् ।

तच्चापरश्च पुरुषो यवेन शरमानयेत् ।
तन्मध्ये यो न दृश्येत स शुद्धः परिकीर्तितः ॥
अन्यथा त्वविशुद्धः स्यादेकाङ्गस्यापि दर्शने ।
त्वमम्भः ! सर्वभूतानामन्तश्चरसि साक्षिवत् ॥
त्वमेवाम्भो ! विजानीषे न विदुर्यानि मानुषाः ।
व्यवहाराभिशस्तोऽयं मानुषस्त्वयि मज्जति ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ॥

इति वैष्णवे धर्मशास्त्रे द्वादशोऽध्यायः ॥

———

## ॥ अथ त्रयोदशोऽध्यायः ॥

### अथ विषम्।

विषाण्यदेयानि सर्व्वाणि ऋते हिमाचलोद्भवाच्छार्ङ्गात्। तस्य च यवसप्तकं घृतप्लुतमभिशस्तायदद्यात्।

विषं वेगक्रमापेतं सुखेन यदि जीर्यते।
विशुद्धं तमिति ज्ञात्वा दिवसान्ते विसर्जयेत्॥
विषत्वाद्विषमत्वाच्च क्रूर! त्वं सर्व्वदेहिनाम्।
त्वमेव विष! जानीषे न विदुर्यानि मानुषाः॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति।
तदेनं संसयादस्माद्धर्मतस्त्रातुमर्हसि॥

इति वैष्णवे धर्मशास्त्रे त्रयोदशोऽध्यायः॥

---

## ॥ अथ चतुर्दशोऽध्यायः ॥

### अथ कोशः।

उग्रान् देवान् समभ्यर्च्चय तत्स्नानोदकात् प्रसृतित्रयं पिवेत्।

इदं मया न कृतमिति व्याहरन् देवताभिमुखः।
यस्य पश्येद्द्विसप्ताहात्त्रिसप्ताहादथापि वा॥
रोगोऽग्निर्ज्ञातिमरणं राजातङ्कमथापि वा।
तमशुद्धं विजानीयात्तथा शुद्धं विपर्यये।
दिव्ये च शुद्धं पुरुषं सत्कुर्याद्धार्मिको नृपः॥

इति वैष्णवे धर्मशास्त्रे चतुर्दशोऽध्यायः॥

## ॥ अथ पञ्चदशोऽध्यायः ॥

अथ द्वादश पुत्रा भवन्ति ।

स्वे क्षेत्रे संस्कृतायामुत्पादितः स्वयमौरसः प्रथमः ।
नियुक्तायां सपिण्डेनोत्तमवर्णेन वोत्पादितः क्षेत्रजो द्वितीयः ।
पुत्रिकापुत्रस्तृतीयः ।
यस्तस्याः पुत्रः स मे पुत्रोभवेदिति या पित्रा दत्ता सा पुत्रिका-
पुत्रिकाविधिना प्रतिपादिता पितृभ्रातृविहीना पुत्रिकैव ।
पौनर्भवश्चतुर्थः अक्षता भूयः संस्कृता पुनर्भूः ।
भूयस्त्वसंस्कृतापि परपूर्वा । कानीनः पञ्चमः ।
पितृगृहेऽसंस्कृतयैवोत्पादितः ।
स च पाणिग्राहस्य गृहे च गूढोत्पन्नः षष्ठः ।
यस्य तल्पजस्तस्यासौ सहोढः सप्तमः ।
गर्भिणी या संस्क्रियते तस्याः पुत्रः स च पाणिग्राहस्य-
दत्तकश्चाष्टमः ।
स च मातापितृभ्यां यस्य दत्तः क्रीतश्च नवमः ।
स च येन क्रीतः स्वयमुपगतो दशमः ।
स च यस्योपगतः अपविद्धस्त्वेकादशः ।
पित्रा मात्रा च परित्यक्तः स च येन गृहीत-
यत्र क्वचनोत्पादितश्च द्वादशः ।
एतेषां पूर्वः पूर्वः श्रेयान् । स एव दायहारः ॥
स चान्यान्विभृयात् ।

अनूढानां स्ववित्तानुरूपेण संस्कारं कुर्यात्।

पतितक्लीवाचिकित्स्यरोगविकला स्वभागहारिणः।

रिक्थग्राहिभिस्ते भर्त्तव्याः।

तेषाञ्चौरसाः पुत्रा भागहारिणः।

न तु पतितस्य पतनीये कर्मणि कृते त्वनन्तरोत्पन्नाः।

प्रतिलोमासु स्त्रीषु चोत्पन्नाश्चाभागिनः

तत्पुत्राः पैतामहेऽप्यर्थे अंशग्राहिभिस्ते भरणीयाः।

यश्चार्थहरः स पिण्डदायी।

एकोढानामप्येकस्याः पुत्रः सर्वासां पुत्र एव च।

भ्रातृणामेकजातानाञ्च।

पुत्रः पितृबित्तालाभेऽपि पिण्डं दद्यात्।

पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा॥
ऋणमस्मिन् सन्नयति अमृतत्वञ्च गच्छति।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतोमुखम्॥
पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपम्॥
पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते।
दौहित्रोऽपि ह्यपुत्रं तं सन्तारयति पौत्रवत्॥

इति वैष्णवे धर्मशास्त्रे पञ्चदशोऽध्यायः॥

.........

॥ अथ षोडशोऽध्यायः ॥

समानवर्णासु पुत्राः सवर्णा भवन्ति।
अनुलोमासु मातृवर्णाः। प्रतिलोमास्वार्य्यविगर्हिताः।
तत्र वैश्यापुत्रः शूद्रेणायोगवः।
पुक्कसमागधौ क्षत्रियापुत्रौ वैश्यशूद्राभ्यां।
चाण्डालवैदेहकसुताश्च ब्राह्मणीपुत्राः शूद्रविट्क्षत्रियैः।
सङ्करसङ्कराश्चासंख्येयाः। रङ्गावतरणमायोगवानां।
व्याधता पुक्कसानां। स्तुतिक्रिया मागधानां।
बध्यघातित्वं चाण्डालानाम्।
स्त्रीरक्षा तज्जीवनञ्च वैदेहकानाम्। अश्वसारथ्यं सूतानां।
चाण्डालानां वहिर्ग्रामनिवसनं मृतचैलधारणमिति विशेषः।
सर्व्वेषाञ्च समानजातिभिर्विवाहाः स्वपितृवित्तानुहरणञ्च।

सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्म्मभिः॥
ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः।
स्त्रीबालाभ्युपपत्तौ च वाह्यानां सिद्धिकारणम्॥

इति वैष्णवे धर्मशास्त्रे षोडशोऽध्यायः॥

—:❀❀:—

॥ अथ सप्तदशोऽध्यायः॥

पिता चेत् पुत्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे।
पैतामहे त्वर्थे पितृपुत्रयोस्तुल्यं स्वामित्वम्।

पितृविभक्ताविभागानन्तरोत्पन्नस्य भागं दद्युः।
अपुत्रस्य धनं पत्न्यभिगामि। तदभावे दुहितृगामि।
तदभावे पितृगामि। तदभावे मातृगामि।
तदभावे भ्रातृगामि। तदभावे भ्रातृपुत्रगामि।
तदभावे बन्धुगामि। तदभावे सकुल्यगामि।
तदभावे सहाध्यायिगामि।
तदभावे ब्राह्मणधनवर्ज्जं राजगामि। ब्राह्मणार्थो ब्राह्मणानाम्।
वानप्रस्थधनमाचार्य्योगृह्णीयात् शिष्योवा।

संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्यादपहरेच्चांशं जातस्य च मृतस्य च॥
पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम्॥

आधिवेदनिकं बन्धुदत्तं शुल्कमन्वाधेयकमिति स्त्रीधनम्।
ब्राह्मादिषु चतुर्षु विवाहेष्वप्रजायामतीतायां तद्भर्त्तुः।
शेषेषु च पिता हरेत्।
सर्वेष्वेव प्रसूतायां यद्धनं तद्दुहितृगामि।

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत्।
न तं भजेरन् दायादा भजमानाः पतन्ति ते॥
अनेकपितृकाणाञ्च पितृतो भागकल्पना।
यस्य यत् पैतृकं रिक्थं स तद्गृह्णीत नेतरः॥

इति वैष्णवे धर्मशास्त्रे सप्तदशोऽध्यायः॥

## ॥ अथ अष्टादशोऽध्यायः ॥

ब्राह्मणस्य चतुर्षु वर्णेषु चेत्पुत्रा भवेयुस्ते पैतृकमृक्थं दशधा-
विभजेयुः तत्र ब्राह्मणीपुत्रश्चतुरोंऽशानादद्यात् ।

क्षत्रियापुत्रस्त्रीन् । द्वावंशौ वैश्यापुत्रः ।

शूद्रापुत्रस्त्वेकं अथ चेच्छूद्रापुत्रवर्ज्जं ब्राह्मणस्य पुत्रत्रयं-
भवेत्तदा तद्धनं नवधा विभजेयुः

वर्णानुक्रमेण चतुस्त्रिद्विभागकृतानंशानादद्युः ।

वैश्यवर्ज्जं मष्टधाकृतं चतुरस्त्रीनेकञ्चादद्युः ।

क्षत्रियवर्ज्जं सप्तधाकृतं चतुरो द्वावेकञ्च ।

ब्राह्मणवर्ज्जं षड्धाकृतं त्रीन् द्वावेकञ्च ।

क्षत्रियस्य क्षत्रियावैश्याशूद्रापुत्रेष्वयमेव विभागः ।

अथ ब्राह्मणस्य ब्राह्मणक्षत्रियौ पुत्रौ स्यातां तदा सप्तधा-
कृताद्धनाद् ब्राह्मणश्चतुरोंऽशानादद्यात्त्रीन् राजन्यः ।

अथ ब्राह्मणस्य ब्राह्मणवैश्यौ तदा षड्धाविभक्तस्य-
चतुरोंऽशान् ब्राह्मण आदद्याद्द्वावंशौवैश्यः ।

अथ ब्राह्मणस्य ब्राह्मणशूद्रौ पुत्रौ स्यातां तदा तद्धनं-
पञ्चधा विभजेयातां चतुरोंऽशान् ब्राह्मणस्त्वादद्यादेकं शूद्रः ।

अथ ब्राह्मणस्य क्षत्रियस्य वा क्षत्रियवैश्यौ स्यातां तदा तद्धनं-
पञ्चधा विभजेयातां त्रीनंशान् क्षत्रियस्त्वादद्याद्द्वावंशौ वैश्यः।

अथ ब्राह्मणस्य क्षत्रियस्य वा क्षत्रियशूद्रौ पुत्रौ स्यातां तदा-
तद्धनं चतुर्द्धा विभजेयातां त्रीनंशान् क्षत्रियस्त्वादद्यादेकं शूद्रः

अथ ब्राह्मणस्य क्षत्रियस्य वैश्यस्य वा वैश्यशूद्रौ पुत्रौ स्याता-

स्यातां तदा तद्धनं त्रिधा विभजेयातां द्वावंशौ वैश्यस्त्वा-
दद्यादेकं शूद्रः ।

अथैकपुत्रा ब्राह्मणस्य ब्राह्मणक्षत्रियवैश्याः सर्वहराः ।

क्षत्रियस्य राजन्यवैश्यौ । वैश्यस्य वैश्याः । शूद्रः शूद्रस्य ।

द्विजातीनां शूद्रस्त्वेकः पुत्रोऽर्द्धहरः ।

अपुत्रमृक्थस्य या गतिः सात्रार्द्धस्य द्वितीयस्य ।

मातरः पुत्रभागानुसारेण भागहारिण्यः ।

अनूढाश्च दुहितरः । समवर्णाः पुत्राः समानंशानादद्युः ।

ज्येष्ठाय श्रेष्ठमुद्धारं दद्युः ।

यदि द्वौ ब्राह्मणीपुत्रौ स्यातामेकः शूद्रापुत्र स्तदा ब्राह्मणपुत्रा-
वष्टौ भागानादद्यातामेकं शूद्रापुत्रः ।

अथ शूद्रापुत्रावुभौ स्यातामेकोब्राह्मणीपुत्रस्तदा षड्विभक्त-
स्यार्थस्य चतुरोऽशान् ब्राह्मणस्त्वादद्याद्द्वावंशौ शूद्रापुत्रौ ।

अनेन क्रमेणान्यत्राप्यंशकल्पना भवति ।

विभक्ताः सहजीवन्तो विभजेरन् पुनर्यदि ।
समस्तत्र विभागः स्याज्ज्यैष्ठं तत्र न विद्यते ॥

अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जितम् ।
स्वयमीहितलब्धंतन्नाकामो दातुमर्हति ॥

पैतृकन्तु यदा द्रव्यमनवाप्य यदाप्नुयात् ।
न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम् ॥

वस्त्रं पत्रामलङ्कारः कृतान्नमुदकं स्त्रियः ।
योगक्षेमं प्रचारञ्च न विभाज्यञ्च पुस्तकम् ॥

इति वैष्णवे धर्मशास्त्रेऽष्टादशोऽध्यायः ॥

## ॥ अथ एकोनविंशोऽध्यायः ॥

मृतं द्विजं न शूद्रेण निर्हारयेत् । न शूद्रं द्विजेन ।

पितरं मातरञ्च पुत्रा निर्हरेयुः ।

न द्विजं पितरमपि शूद्राः ब्राह्मणमनाथं ये ब्राह्मणा-
निर्हरन्ति ते स्वर्गलोकभाजः ।

निर्हृत्य च बान्धवं प्रेतं सत्कृत्याप्रदक्षिणेन चितामभि-
गम्याप्सु सवाससो निमज्जनं कुर्युः ।

प्रेतस्योदकनिर्वपणं कृत्वैकपिण्डं कुशेषु दद्युः ।

परिवर्त्तितवाससश्च निम्बपत्राणि विदश्य द्वार्य्यश्मनि-
पदन्यासं कृत्वा गृहं प्रविशेयुः ।

अक्षतांश्चाग्नौ क्षिपेयुः चतुर्थे दिवसेऽस्थिसञ्चयं कुर्य्युः ।

तेषाञ्च गङ्गाम्भसि प्रक्षेपः ।

यावत् सङ्ख्यमस्थि पुरुषस्य गङ्गाम्भसि तिष्ठति-
तावद्वर्षसहस्राणि स्वर्गलोकमधितिष्ठति ।

यावदाशौचं तावत् प्रेतस्योदकं पिण्डमेकञ्च दद्युः ।

क्रीतलब्धाशनाश्च भवेयुः । अमांसाशनाश्च ।

स्थण्डिलशायिनश्च । पृथक् शायिनश्च ।

ग्रामान्निष्क्रम्याशौचान्ते कृतश्मश्रुकर्म्माणस्तिलकल्कैः-
सर्षपकल्कैर्व्वा स्नाताः परिवर्त्तितवाससो गृहं प्रविशेयुः ।

तत्र शान्तिं कृत्वा ब्राह्मणानाञ्च पूजनं कुर्य्युः ।

देवाः परोक्षदेवाः प्रत्यक्षदेवा ब्राह्मणाः ।

ब्राह्मणैर्लोका धार्यन्ते ।

ब्राह्मणानां प्रसादेन दिवि तिष्ठन्ति देवताः ।
ब्राह्मणाभिहितं वाक्यं न मिथ्या जायते क्वचित् ॥
यद्ब्राह्मणास्तुष्टतमा वदन्ति तद्देवताः प्रत्यभिनन्दयन्ति ।
तुष्टेषु तुष्टाः सततं भवन्ति प्रत्यक्षदेवेषु परोक्षदेवाः ॥
दुःखान्वितानां मृतबान्धवानामाश्वासनं कुर्य्युरदीनसत्त्वाः ।
वाक्यैस्तुयैर्भूमि तवाभिधास्ये वाक्यान्यहं तानि मनोऽभिरामे ॥

इति वैष्णवे धर्मशास्त्रे एकोनविंशोऽध्यायः ॥

—०❀०—

## ॥ अथ विंशोऽध्यायः ॥

यदुत्तरायणं तदहर्देवानाम् । दक्षिणायनं रात्रिः ।
सम्वत्सरोऽहोरात्रः तत्रिंशता मासाः मासा द्वादश वर्षम् ।
द्वादशवर्षशतानि दिव्यानि कलियुगम् । द्विगुणानि द्वापरम् ।
त्रिगुणानि त्रेता चतुर्गुणानि कृतयुगम्-
द्वादशवर्षसहस्राणि दिव्यानि चतुर्युगम् ।
चतुर्युगानामेकसप्ततिर्मन्वन्तरम् । चतुर्युगसहस्रश्चकल्पः ।
स च पितामहस्याहः । तावती चास्य रात्रिः ।
एवंविधेनाहोरात्रेण मासवर्षगणनया सर्व्वस्यैव-
ब्रह्मणोवर्षशतमायुः ।
ब्रह्मायुषा च परिच्छिन्नः पौरुषो दिवसः ।
तस्यान्ते महाकल्पः । तावत्येवास्य निशा ।

पौरुषाणामहोरात्राणामतीतानां संख्यैव नास्ति ।
नच भविष्याणाम् । अनाद्यन्तता कालस्य ॥

एवमस्मिन्निरालम्बे काले सततयायिनि ।
न तद्भूतं प्रपश्यामि स्थितिर्यस्य भवेद्ध्रुवा ॥
गङ्गायाः सिकताधारास्तथा वर्षति वासवे ।
शक्या गणयितुं लोके न व्यतीताः पितामहाः ॥
चतुर्द्दश विनश्यन्ति कल्पे कल्पे सुरेश्वराः ।
सर्वलोकप्रधानाश्च मनवश्च चतुर्द्दश ॥
बहूनीन्द्रसहस्राणि दैत्येन्द्रनियुतानि च ।
विनष्टानीह कालेन मनुजेष्वथ का कथा ॥
राजर्षयश्च बहवः सर्वे समुदिता गुणैः ।
देवा ब्रह्मर्षयश्चैव कालेन निधनं गताः ॥
ये समर्था जगत्यस्मिन् सृष्टिसंहारकारिणः ।
तेऽपि कालेन लीयन्ते कालोहि दुरतिक्रमः ॥
आक्रम्य सर्वः कालेन परलोकञ्च नीयते ।
कर्मपाशवशो जन्तुः का तत्र परिदेवना ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
अर्थे दुष्परिहार्येऽस्मिन्नास्ति लोके सहायता ॥
शोचन्तो नोपकुर्वन्ति मृतस्येह जना यतः ।
अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ॥
सुकृतं दुष्कृतञ्चोभौ सहायौ यस्य गच्छतः ।
बान्धवैस्तस्य किं कार्यं शोचद्भिरथवा न वा ॥

बान्धवानामशौचे तु स्थितिं प्रेतो न विन्दति।
अतस्त्वभ्येति तानेव पिण्डतोयप्रदायिनः॥
अर्वाक् सपिण्डीकरणात् प्रेतो भवति यो मृतः।
प्रेतलोकगतस्यान्नं सोदकुम्भं प्रयच्छत॥
पितृलोकगतश्चान्नं श्राद्धे भुङ्क्ते स्वधामयम्।
पितृलोकगतस्यास्य तस्माच्छ्राद्धं प्रयच्छत॥
देवत्वे यातनास्थाने तिर्य्यग्योनौ तथैव च।
मानुष्ये च तथाप्नोति श्राद्धं दत्तं स्वबान्धवैः॥
प्रेतस्य श्राद्धकर्त्तुश्च पुष्टिः श्राद्धे कृते ध्रुवम्।
तस्माच्छ्राद्धं सदा कार्य्यं शोकं त्यक्त्वा निरर्थकम्॥
एतावदेव कर्त्तव्यं सदा प्रेतस्य बन्धुभिः।
नोपकुर्य्यान्नरः शोकात् प्रेतस्यात्मन एव वा॥
दृष्ट्वा लोकमनाक्रन्दं म्रियमाणांश्च बान्धवान्।
धर्म्ममेकं सहायार्थं वरयध्वं सदा नराः!॥
मृतोऽपि बान्धवः शक्तो नानुगन्तुं नरं मृतम्।
जायावर्ज्जं हि सर्वस्य याम्यः पन्था विरुध्यते॥
धर्मएकोऽनुयात्येनं यत्र क्वचन गामिनम्।
नन्वसारे नृलोकेऽस्मिन् धर्मं कुरुत मा चिरम्॥
श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्।
न हि प्रतीक्षते मृत्युः कृतं वास्य न वाऽकृतम्॥
क्षेत्रापणगृहासक्तमन्यत्र गतमानसम्।
वृकीवोरणमासाद्य मृत्युरादाय गच्छति॥

न कालस्य प्रियः कश्चिद्द्वेष्यश्चास्य न विद्यते ।
आयुष्ये कर्मणि क्षीणे प्रसह्य हरते जनम् ॥
नाप्राप्तकालो म्रियते बिद्धः शरशतैरपि ।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥
नौषधानि न मन्त्राश्च न होमा न पुनर्जपाः ।
त्रायन्ते मृत्युनोपेतं जरया वापि मानवम् ॥
आगामिनमनर्थं हि प्रविधानशतैरपि ।
न निवारयितुं शक्तस्तत्र का परिदेवना ॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म्म कर्त्तारं विन्दते ध्रुवम् ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि चाप्यथ ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥
देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥
गृह्णातीह यथा वस्त्रं त्यक्त्वा पूर्वधृताम्बरम् ।
गृह्णात्येवं नवं देहं देही कर्म्मनिबन्धनम् ॥
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
नचैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सततगः स्थाणुरचलोऽयं सनातनः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हथ ॥

इति वैष्णवे धर्मशास्त्रे विंशोऽध्यायः ॥

अथाशौचव्यपगमे सुस्नातः सुप्रक्षालितपाणिपाद आचान्तस्त्वेवंविधान् ब्राह्मणान् यथाशक्त्युदङ्मुखान् गन्धमाल्यवस्त्रालङ्कारादिभिः पूजितान् भोजयेत् ।

एकवन्मन्त्रानूहेतैकोद्दिष्टे ।

उच्छिष्टसन्निधावेकमेव तन्नामगोत्राभ्यां पिण्डं निर्वपेत् ।

भुक्तवत्सु ब्राह्मणेषु दक्षिणयाभिपूजितेषु प्रेतनामगोत्राभ्यां दत्ताक्षय्योदकश्चतुरङ्गुलपृथ्वीस्तावदन्तरास्तावदधःखाता वितस्त्यायतास्तिस्रः कर्षूः कुर्य्यात् ।

कर्षू समीपे चाग्नित्रयमुपसमाधाय परिस्तीर्य्य तत्रैकैकस्मिन्नाहुतित्रयं जुहुयात् ।

सोमाय पितृमते स्वधा नमः ।

अग्नये कव्यवाहनाय स्वधा नमः ।

यमायाङ्गिरसे स्वधा नमः ।

स्थानत्रये च प्राग्वत्पिण्डनिर्वपणं कुर्य्यात् ।

अन्नदधिघृतमधुमांसैः कर्षू त्रयं पूरयित्वैतदिति जपेत् ।

एवं मृताहे प्रतिमासं कुर्य्यात् ।

सम्वत्सरान्ते प्रेताय तत्पित्रे तत्पितामहाय तत्प्रपितामहाय च ब्राह्मणान् देवपूर्व्वान् भोजयेत् ।

अत्राग्नौकरणमावाहनं पाद्यञ्च कुर्य्यात् ।

संसृजतु त्वा पृथिवीसमानीव इति च प्रेतपाद्यपात्रे पितृपाद्यपात्रत्रये योजयेत् ।

उच्छिष्टसन्निधौ पिण्डचतुष्टयं कुर्य्यात् ।

ब्राह्मणांश्च स्वाचान्तान्दत्तदक्षिणांश्चानुव्रज्य विसर्ज्जयेत् ।

ततः प्रेतपिण्डं पाद्यपात्रोदकवत् पिण्डत्रये निदध्यात् ।

कर्षूत्रयसन्निकर्षेऽप्येवमेव ।

सपिण्डीकरणं मासिकार्थवद्द्वादशाहं श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्य्यात् ।

मन्त्रवर्जं हि शूद्राणां द्वादशेऽह्नि ।

सम्वत्सराभ्यन्तरे यद्यधिमासो भवेत्तदा मासिकार्थे दिनमेकञ्च वर्द्धयेत् ।

सपिण्डीकरणं स्त्रीणां कार्य्यमेवं तथा भवेत् ।
यावज्जीवं तथा कुर्य्याच्छ्राद्धन्तु प्रतिवत्सरम् ॥
अर्वाक् सपिण्डीकरणं यस्य सम्बत्सरात् कृतम् ।
तस्याप्यन्नं सोदकुम्भं दद्याद्वर्षं द्विजन्मने ॥

इति वैष्णवे धर्मशास्त्रे एकविंशोऽध्यायः ॥

---

## ॥ अथ द्वाविंशोऽध्यायः ॥

ब्राह्मणस्य सपिण्डानां जननमरणयोर्द्दशाहमशौचम् ।

द्वादशाहं राजन्यस्य । पञ्चदशाहं वैश्यस्य । मासं शूद्रस्य ।

सपिण्डता च पुरुषे सप्तमे विनिवर्त्तते ।

अशौचे होमदानप्रतिग्रहस्वाध्याया निवर्त्तन्ते ।

नाशौचे कस्यचिदन्नमश्नीयात् ।

ब्राह्मणादीनामशौचे यः सकृदेवान्नमश्नाति तस्य-
तावदशौचं यावत्तेषाम् ।

अशौचापगमे प्रायश्चित्तं कुर्य्यात् ।

सवर्णस्याशौचे द्विजो भुक्त्वा स्रवन्तीमासाद्य तन्निमग्न-
स्त्रिरघमर्षणं जप्त्वोत्तीर्य्य गायत्र्यष्टसहस्रं जपेत्।

क्षत्रियाशौचे ब्राह्मणस्त्वेतदेवोपोषितः कृत्वा शुद्ध्यति।

वैश्याशौचे राजन्यश्च।

वैश्याशौचे ब्राह्मणस्त्रिरात्रोपोषितश्च। ब्राह्मणाशौचे राजन्यः-
क्षत्रियाशौचे वैश्यः स्रवन्ती मासाद्य गायत्रीशतपञ्चकं जपेत्।

वैश्यश्च ब्राह्मणाशौचे गायत्र्यष्टशतं जपेत्।

शूद्राशौचे द्विजो भुक्त्वा प्राजापत्यव्रतञ्चरेत्।

शूद्रश्च द्विजाशौचे स्नानमाचरेत्।

शूद्रः शूद्राशौचे स्नातः पञ्चगव्यं पिबेत्।

पत्नीनां दासानामानुलोम्येन स्वामिनस्तुल्यमशौचम्।

मृते स्वामिन्यात्मीयम्।

हीनवर्णानामधिकवर्णेषु तदपगमे शुद्धिः।

ब्राह्मणस्य क्षत्रविट्शूद्रेषु षड्रात्रत्रिरात्रैकरात्रैः।

क्षत्रियस्य विट्शूद्रयोः षड्रात्रत्रिरात्राभ्याम्।

वैश्यस्य शूद्रेषु षड्रात्रेण। मासतुल्यैरहोरात्रैर्गर्भस्रावे।

जातमृते मृतजाते वा कुलस्य सद्यःशौचम्।

अदन्तजाते बाले प्रेते सद्य एव।

नास्याग्निसंस्कारो नोदकक्रिया।

दन्तजाते त्वकृतचूडे त्वहोरात्रेण।
कृतचूडे त्वसंस्कृते त्रिरात्रेण। ततः परं यथोक्तकालेन।
स्त्रीणां विवाहः संस्कारः।
संस्कृतासु स्त्रीषु नाशौचं भवति पितृपक्षे।
तत्प्रसवमरणे चेत् पितृगृहे स्यातां तदैकरात्रं त्रिरात्रञ्च।
जननाशौचमध्ये यद्यपरं जननाशौचं स्यात्तदा पूर्व्वा-
शौचव्यपगमे शुद्धिः। रात्रिशेषे दिनद्वयेन।
प्रभाते दिनत्रयेण। मरणाशौचमध्ये ज्ञातिमरणेऽप्येवम्।
श्रुत्वा देशान्तरस्थजननमरणे शेषेण शुध्येत्।
व्यतीतेऽशौचे सम्वत्सरान्तस्त्वेकरात्रेण।
ततः परं स्नानेन। आचार्य्ये मातामहे च व्यतीते त्रिरात्रेण॥
अनौरसेषु पुत्रेषु जातेषु च मृतेषु च।
परपूर्व्वासु भार्य्यासु प्रसूतासु मृतासु च।
आचार्य्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्य्यसहाध्यायि-
शिष्येष्वतीतेष्वेकरात्रेण। स्वदेशराजनि च।
असपिण्डे स्ववेश्मनि मृते च।
भृग्वग्न्यनाशकाम्बुसंग्रामविद्युन्नृपहतानां नाशौचम्।
न राज्ञां राजकर्म्मणि। न व्रतिनां व्रते।
न सत्रिणां सत्रे। न कारूणां स्वकर्म्मणि।
न राजाज्ञाकारिणां तदिच्छया।
न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोः।
न देशविप्लवे। आपद्यपि च कष्टायाम्।

आत्मत्यागिनः पतिताश्च नाशौचोदकभाजः।

पतितस्य दासी मृतेऽह्निपादाभ्यां घटमपवर्ज्जयेत्।

उद्बन्धनमृतस्य यः पाशं च्छिन्द्यात् स तप्तकृच्छ्रेण शुध्यति।

आत्मघातिनां संस्कर्त्ता च। तदश्रुपातकारी च।

सर्वस्यैव प्रेतस्य बान्धवैः सहाश्रुपातं कृत्वा स्नानेन।

अकृते त्वस्थिसञ्चये सचैलस्नानेन।

द्विजः शूद्रप्रेतानुगमनं कृत्वा स्रवन्तीमासाद्य तन्निमग्न-स्त्रिरघमर्षणं जप्त्वोत्तीर्य्य गायत्र्यष्टसहस्रं जपेत्।

द्विजप्रेतस्याष्टशतम्।

शूद्रः प्रेतानुगमनं कृत्वा स्नानमाचरेत्।

चिताधूमसेवने सर्वे वर्णाः स्नानमाचरेयुः।

मैथुने दुःस्वप्ने रुधिरोपगतकण्ठे वमनविरेकयोश्च।

श्मश्रुकर्म्मणि कृते च।

शवस्पृशञ्च स्पृष्ट्वा रजखलाचाण्डालयूपांश्च।

भक्ष्यवर्ज्जं पञ्चनखशवं तदस्थि सस्नेहञ्च।

सर्वेष्वेतेषु स्नानेषु पूर्वं वस्त्रं नाप्रक्षालितं बिभृयात्।

रजस्वला चतुर्थेऽह्नि स्नानाच्छुध्यति।

रजस्वला हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धा।

सवर्णामधिकवर्णां वा स्पृष्ट्वा स्नात्वाश्नीयात्।

क्षुत्वा सुप्त्वा भोजनाध्ययने पीत्वा स्नात्वा निष्ठीव्य-वासः परिधाय रथ्यामाक्रम्य मूत्रपुरीषे कृत्वा पञ्चनखस्य-सस्नेहास्थि स्पृष्ट्वा चाचामेत्।

चाण्डालम्लेच्छसम्भाषणे च ।

नाभेरधस्तात् प्रवाहेषु च कायिकैर्मलैः सुराभिर्व्वोपहतो-
मृत्तोयैस्तदङ्गं प्रक्षाल्य शुध्यति ।

अन्यत्रोपहतो मृत्तोयैस्तदङ्गं प्रक्षाल्य स्नानेन ।

वक्त्रोपहतस्तूपोष्य स्नात्वा पञ्चगव्येन ।

दशनच्छदोपहतश्च ॥

वसा शुक्रमसृङ्मज्जामूत्रविट्कर्णविङ्नखाः ।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः ॥
गौड़ी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा ।
यथैवैका तथा सर्व्वा न पातव्या द्विजातिभिः ॥
माधूकमैक्षवं टाङ्कं कौलं खार्ज्जूरपानसे ।
मृद्विकारसमाध्वीके मैरेयं नारिकेलजम् ॥
अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य च ।
राजन्यश्चैव वैश्यश्च स्पृष्ट्वैतानि न दुष्यतः ॥
गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् ।
प्रेताहारैः समं तत्र दशरात्रेण शुध्यति ॥
आचार्य्यं स्वमुपाध्यायं पितरं मातरं गुरुम् ।
निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ॥
आदिष्टी नोदकं कुर्य्यादाव्रतस्य समापनात् ।
समाप्ते तूदकंकृत्वा त्रिरात्रेण विशुध्यति ॥
ज्ञानंतपोऽग्निराहारो मृण्मनोवार्य्युपाञ्जनम् ।
वायुः कर्म्मार्ककालौ च शुद्धिकर्तॄणि देहिनाम् ॥

सर्वेषामेव शौचानामन्नशौचं परं स्मृतम्।
योऽन्ने शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः॥
क्षान्त्या शुद्ध्यन्ति विद्वांसो दानेनाकार्यकारिणः।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः॥
मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुद्ध्यति।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमाः॥
अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति॥
एष शौचस्य ते प्रोक्तः शारीरस्य विनिर्णयः।
नानाविधानां द्रव्याणां शुद्धेः शृणु विनिर्णयम्॥

इति वैष्णवे धर्मशास्त्रे द्वाविंशोऽध्यायः॥

## ॥ अथ त्रयोविंशोऽध्यायः॥

शारीरैर्मलैः सुराभिर्मद्यैर्व्वा यदुपहतं तदत्यन्तोपहतम्।
अत्यन्तोपहतं सर्व्वं लोहभाण्डमग्नौ प्रक्षिप्तं शुद्ध्येत्।
मणिमयमश्ममयमब्जञ्च सप्तरात्रं महीनिखनेन।
शृङ्गदंष्ट्रास्थिमयं तक्षणेन। दारवं मृण्मयञ्च जह्यात्।
अत्यन्तोपहतस्य वस्त्रस्य यत्प्रक्षालितं विरज्येत तच्छिन्द्यात्।
सौवर्णराजताब्जमणिमयानां निर्लेपानामद्भिः शुद्धिः।
अश्ममयानाञ्चमसानां प्रहाणाञ्च।
चरुस्त्रुक्स्त्रुवाणामुष्णेनाम्भसा।

यज्ञकर्मणि यज्ञपात्राणां पाणिना संमार्ज्जनेन ।

स्फ्यशूर्पशकटमुषलोलूषलानां प्रोक्षणेन ।

शयनयानासनानाञ्च ।

बहूनाञ्च धान्याजिनरज्जुतान्तववैदलसूत्रकार्पासवाससाञ्च ।

शाकमूलफलपुष्पाणाञ्च । तृणकाष्ठशुष्कपलाशानां च ।

एतेषां प्रक्षालनेन । अल्पानाञ्च । ऊषैः कौशेयाविकयोः ।

अरिष्टकैः कुतपानाम् । श्रीफलैरंशुपदानाम् ।

गौरसर्षपैः क्षौमाणाम् शृङ्गास्थिदन्तमयानाञ्च ।

पद्माक्षैर्मृगलोमिकानाम् ।

ताम्ररीतित्रपुसीसमयानामम्लोदकेन ।

भस्मना कांस्यलौहयोः । तक्षणेन दारवाणाम् ।

गोवालैः फलसम्भवानाम् । प्रोक्षणेन संहतानाम् ।

उत्पवनेन द्रव्याणाम् ।

गुड़ादीनामिक्षुविकाराणां प्रभूतानां गृहनिहितानां-
वार्य्यग्निदानेन ।

सर्वलवणानाञ्च । पुनः पाकेन मृण्मयानाम् ।

द्रव्यवत्कृतशौचानां देवतार्च्चानां भूयः प्रतिष्ठापनेन ।

असिद्धस्यान्नस्य यावन्मात्रमुपहतं तन्मात्रं परित्यज्य-
शेषस्य कण्डनप्रक्षालने कुर्यात् ।

द्रोणाद्यधिकं सिद्धमन्नमुपहतं न दुष्यति ।

तस्योपहतमात्रमपास्य गायत्र्याभिमन्त्रितं सुवर्णाम्भः-
प्रक्षिपेत् वस्तस्य च प्रदर्शयेदग्नेः ।

पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् ।
दूषितं केशकीटैश्च मृदः क्षेपेण शुद्ध्यति ॥
यावन्नापैत्यमेध्याक्ताद्गन्धो लेपश्च तत्कृतः ।
तावन्मृद्वारि देयं स्यात् सर्वासु द्रव्यशुद्धिषु ॥
अजाश्वं मुखतो मेध्यं न गौर्नंनरजा मलाः ।
पन्थानश्च विशुद्ध्यन्ति सोमसूर्यांशुमारुतैः ॥
रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः ।
मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च ॥
प्राणिनामथ सर्वेषां मृद्भिरद्भिश्च कारयेत् ।
अत्यन्तोपहतानाञ्च शौचं नित्यमतन्द्रितः ॥
भूमिष्ठमुदकं पुण्यं वैतृष्ण्यं यत्र गोर्भवेत् ।
अव्याप्तञ्चेदमेध्येन तद्वदेव शिलागतम् ॥
वह्निप्रज्वालनं कुर्य्यात् कूपे पक्वेष्टकाचिते ।
पञ्चगव्यं न्यसेत् पश्चान्नवतोयसमुद्भवे ॥
जलाशयेष्वथाल्पेषु स्थावरेषु वसुन्धरे ! ।
कूपवत् कथिता शुद्धिर्महत्सु च न दूषणम् ॥
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् ।
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥
नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् ।
ब्राह्मणान्तरितं भोक्ष्यमाकराः सर्व एव च ॥
नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने ।
प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥

श्वभिर्हतस्य यन्मांसं शुचि तत् परिकीर्त्तितम् ।
क्रव्याद्भिश्च हतस्यान्यैश्चाण्डालाद्यैश्च दस्युभिः ॥
ऊर्द्धं नाभेर्यानि खानि तानि मेध्यानि निर्दिशेत् ।
यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः ॥
मक्षिका विप्रुषश्छाया गौर्गजाश्वमरीचयः ।
रजोभूर्वायुरग्निश्च मार्जारश्च सदा शुचिः ॥
नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गे न यान्ति याः ।
न श्मश्रूणि गतान्यास्यं न दन्तान्तरवेष्टितम् ॥
स्पृशन्ति बिन्दवः पादौ य आचामयतः परान् ।
भौमिकैस्ते समाज्ञेया न तैरप्रयतो भवेत् ॥
उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथञ्चन ।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥
मार्ज्जनोपाञ्जनैर्वेश्म प्रोक्षणेन च पुस्तकम् ।
समार्ज्जनेनाञ्जनेन सेकेनोल्लेखनेन च ॥
दाहेन च भुवः शुद्धिर्वासेनाप्यथवा गवाम् ।
गावः पवित्रं मङ्गल्यं गोषु लोकाः प्रतिष्ठिताः ।
गावो वितन्वते यज्ञं गावः सर्व्वाघसूदनाः ॥
गोमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना ।
षडङ्गमेतत्परमं मङ्गल्यं सर्वदा गवाम् ॥
शृङ्गोदकं गवां पुण्यं सर्व्वाघविनिसूदनम् ।
गवां कण्डूयनञ्चैव सर्वकल्मषनाशनम् ।
गवां ग्रासप्रदानेन स्वर्गलोके महीयते ॥

गवां हि तीर्थे वसतीह गङ्गा पुष्टिस्तथा सा रजसि प्रवृद्धा।
लक्ष्मीः करीषे प्रणतौ च धर्म्मस्तासां प्रणामं सतञ्च कुर्य्यात्॥

इति वैष्णवे धर्म्मशास्त्रे त्रयोविंशोऽध्यायः॥

---

## ॥ अथ चतुर्विंशोऽध्यायः ॥

अथ ब्राह्मणस्य वर्णानुक्रमेण चतस्रो भार्य्या भवन्ति-

तिस्रः क्षत्रियस्य। द्वे वैश्यस्य। एका शूद्रस्य।

तासां सवर्णावेदने पाणिर्ग्राह्यः।

असवर्णावेदने शरः क्षत्रियकन्यया।

प्रतोदो वैश्यकन्यया। वसनदशान्तः शूद्रकन्यया।

न सगोत्रां न समानार्षप्रवरां भार्य्यां विन्देत्-

मातृतस्त्वा पञ्चमात् पुरुषात् पितृतश्चासप्तमात्।

नाकुलीनाम् न च व्याधिताम्। नाधिकाङ्गीम्।

न हीनाङ्गीम्। नातिकपिलाम्। न वाचाटाम्।

अथाष्टौ विवाहा भवन्ति।

ब्राह्मो दैव आर्षः प्राजापत्यो गान्धर्व आसुरो-

राक्षसः पैशाचश्चेति। आहूय गुणवते कन्यादानं ब्राह्मः।

यज्ञस्थऋत्विजे दैवः। गोमिथुनग्रहणेनार्षः।

प्रार्थिताप्रदानेन प्राजापत्यः।

द्वयोः सकामयोर्म्मातापितृरहितो योगो गान्धर्वः।

क्रयेणासुरः । युद्धहरणेन राक्षसः ।
सुप्तप्रमत्ताभिगमनात् पैशाचः ।
एतेष्वाद्याश्चत्वारो धर्म्याः । गान्धर्व्वोऽपि राजन्यानाम् ।
ब्राह्मीपुत्रः पुरुषानेकविंशतिं पुनीते । दैवीपुत्रश्चतुर्द्दश ।
आर्षीपुत्रश्च सप्त । प्राजापत्यश्चतुरः ।
ब्राह्मेण विवाहेन कन्यां ददद्ब्रह्मलोकं गमयति ।
दैवेन स्वर्गम् । प्राजापत्येन देवलोकम् ।
गान्धर्वेण गन्धर्वलोकं गच्छति
पिता पितामहो भ्राता सकुल्यो मातामहो माता-
चेति कन्याप्रदाः । पूर्व्वाभावे प्रकृतिस्थः परः परः ।

ऋतुत्रयमुपास्यैव कन्या कुर्य्यात् स्वयम्बरम् ।
ऋतुत्रये व्यतीते तु प्रभवत्यात्मनः सदा ॥
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया हरंस्तां न विदुष्यति ॥

इति वैष्णवे धर्म्मशास्त्रे चतुर्विंशोऽध्यायः ॥

—:❀:—

अथ स्त्रीणां धर्म्माः ।

भर्त्तुः समानव्रतचारित्वम् ।

श्वश्रुश्वशुरगुरुदेवतातिथिपूजनम् । सुसंस्कृतोपस्करता ।

अमुक्तहस्तता । सुगुप्तभाण्डता ।

मूलक्रियास्वनभिरतिः । मङ्गलाचारतत्परता ।

भर्त्तरि प्रवासितेऽप्रतिकर्म्मक्रिया । परगृहेष्वनभिगमनम् ।

द्वारदेशगवाक्षकेषु नावस्थानम् । सर्व्वकर्म्मस्वस्वतन्त्रता ।

बाल्ययौवनवार्द्धकेष्वपि पितृभर्त्तृपुत्राधीनता ।

मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा ।

नास्ति स्त्रीणां पृथक्यज्ञो न व्रतं नाप्युपोषणम् ।
पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते ॥

पत्यौ जीवति या योषिदुपवासव्रतञ्चरेत् ।
आयुः सा हरते भर्त्तुर्नरकञ्चैव गच्छति ॥

मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥

इति वैष्णवे धर्म्मशास्त्रे पञ्चविंशोऽध्यायः ॥

## ॥ अथ षड्विंशोऽध्यायः ॥

सवर्णासु बहुभार्य्यासु विद्यमानासु ज्येष्ठया सहधर्म्मं कार्य्यं कुर्य्यात् ।

मिश्रासु च कनिष्ठयापि समानवर्णया ।

समानवर्णाभावे त्वनन्तरयैवापदि च । नन्वेव द्विजः शूद्रया ।

द्विजस्य भार्य्या शूद्रा तु धर्म्मार्थे न भवेत् क्वचित् ।
रत्यर्थमेव सा तस्य रागान्धस्य प्रकीर्तिता ॥
हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः ।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥
दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु ।
नादन्ति पितृदेवास्तु न च स्वर्गं स गच्छति ॥

इति वैष्णवे धर्म्मशास्त्रे षड्विंशोऽध्यायः ॥

—:o:—

## ॥ अथ सप्तविंशोऽध्यायः ॥

गर्भस्य स्पष्टताज्ञाने निषेककर्म्म ।

स्पन्दनात् पुरा पुंसवनम् षष्ठेऽष्टमे वा सीमन्तोन्नयनं ।

जाते च दारके जातकर्म । अशौचव्यपगमने नामधेयं ।

मङ्गल्यं ब्राह्मणस्य । बलवत् क्षत्रियस्य । धनोपेतं वैश्यस्य ।

जुगुप्सितं शूद्रस्य । चतुर्थे मास्यादित्यदर्शनम् ।

षष्ठेऽन्नप्राशनम् । तृतीयेऽब्दे चूडाकरणम् ।

एता एव क्रियाः स्त्रीणाममन्त्रकाः ।
तासां समन्त्रको विवाहः ।
गर्भाष्टमेऽब्दे ब्राह्मणस्योपनयनं । गर्भैकादशे राज्ञः ।
गर्भद्वादशे विशः । तेषां मुञ्जज्यावल्वजमय्यो मौञ्ज्यः ।
कार्पासशणाविकान्युपवीतानि वासांसि च ।
मार्गवैयाघ्रवास्तानि चर्म्माणि ।
पालाशखादिरौडुम्बरा दण्डाः ।
केशान्तललाटनासादेशतुल्याः सर्व्वं एव वा ।
भवदाद्यं भवन्मध्यं भवदन्तञ्च भैक्ष्यचरणम् ।

आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते ।
आद्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥
अत ऊर्द्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्री पतिता व्रात्या भवन्त्यार्य्यविगर्हिताः ॥
यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला ।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि ॥
मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥

इति वैष्णवे धर्मशास्त्रे सप्तविंशोऽध्यायः ॥

---

## ।। अथ अष्टाविंशोऽध्यायः ।।

अथ ब्रह्मचारिणां गुरुकुले वासः । सन्ध्याद्वयोपासनम् ।

पूर्वां सन्ध्यां जपेत्तिष्ठन् पश्चिमामासीनः ।

कालद्वयमभिषेकाग्निकर्मकरणम् ।

अप्सु दण्डवन्मज्जनम् । आहूताध्ययनम् ।

गुरोः प्रियहिताचरणम् । मेखलादण्डाजिनोपवीतधारणम् ।

गुरुकुलवर्जं गुणवत्सु भैक्ष्याचरणम् ।

गुर्वनुज्ञातो भैक्ष्याभ्यवहरणम् ।

श्राद्धकृतलवणशुक्तपर्युषितनृत्यगीतस्त्रीमधुमांसाञ्जनोच्छिष्ट-
प्राणिहिंसाशील परिवर्ज्जनम् ।

अधः शय्या । गुरोः पूर्वोत्थानं चरमं संवेशनम् ।

कृतसन्ध्योपासनश्च गुर्वभिवादनं कुर्यात् ।

तस्य च व्यत्यस्तकरः पादावुपस्पृशेत् ।

दक्षिणं दक्षिणेनेतरमितरेण ।

स्वञ्च नामास्याभिवादनान्ते भोः शब्दान्तं निवेदयेत् ।

तिष्ठन्नासीनः शयानो भुञ्जानः पराङ् मुखश्च-
नास्याभिभाषणं कुर्यात् ।

आसीनस्योपस्थितः कुर्यात्तिष्ठतोऽभिगच्छन्नागच्छतः-
प्रत्युद्गम्य पश्चाद्धावन् धावतः ।

पराङ् मुखस्याभिमुखः दूरस्थस्यान्तिकमुपेत्य ।

शयानस्य प्रणम्य ।

तस्य च चक्षुर्विषये न यथेष्टासनः स्यात् ।

नचास्य केवलं नाम ब्रूयात्।
गतिचेष्टाभाषितादिकं नास्य कुर्यात्।
तत्रास्य निन्दापरीवादी स्यातां न तत्र तिष्ठेत्।
नास्यैकासनो भवेत्। ऋते शिलाफलकनौयानेभ्यः।
गुरोर्गुरौ सन्निहिते गुरुवद्वर्त्तेत।
अनिर्दिष्टो गुरुणा स्वान् गुरूनाभिवादयेत्।
बाले समानवयसि वाध्यापके गुरुपुत्रे गुरुवद्वर्त्तेत।
नास्य पादौ प्रक्षालयेत् नोच्छिष्टमश्नीयात्।
एवं वेदं वेदौ वेदान् वा स्वीकुर्यात्। ततो वेदाङ्गानि।
यस्त्वनधीतवेदोऽन्यत्र श्रमं कुर्यादसौ ससन्तानः शूद्रत्वमेति।
मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धनम्।
तत्रास्य माता सावित्री भवति पिता त्वाचार्य्यः।
एतेनैव तेषां द्विजत्वम्।
प्राङ्मौञ्जीबन्धनाद्द्विजः शूद्रसमो भवति।
ब्रह्मचारिणा मुण्डेन जटिलेन वा भाव्यम्।
वेदस्वीकरणादूर्ध्वं गुर्व्वनुज्ञातस्तस्मै वरं दत्त्वा स्नायात्।
ततो गुरुकुल एव जन्मनः शेषं नयेत्।
तत्राचार्य्ये प्रेते गुरुवद्गुरुपुत्रे वर्त्तेत।
गुरुदारेषु सवर्णेषु वा।
तदभावेऽग्निशुश्रूषुर्नैष्ठिको ब्रह्मचारी स्यात्॥

एवञ्चरति यो विप्रो ब्रह्मचर्यमतन्द्रितः।
स गच्छत्युत्तमं स्थानं न चेहा जायते पुनः॥

कामतो रेतसः सेको व्रतस्थस्य द्विजन्मनः ।
अतिक्रमं व्रतस्याहुर्ब्रह्मज्ञा ब्रह्मवादिनः ॥
एतस्मिन्नेनसि प्राप्ते वसित्वा गर्द्दभाजिनम् ।
सप्तागारं चरेद्भैक्ष्यं स्वकर्म परिकीर्त्तयन् ॥
तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नेककालिकम् ।
उपस्पृशंस्त्रिषवणमब्देन स विशुद्ध्यति ॥
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ।
स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ॥
अकृत्वा भैक्ष्यचरणमसमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णी व्रतञ्चरेत् ॥
तञ्चेदभ्युदियात् सूर्यः शयानं कामकातरः ।
निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम् ॥

इति वैष्णवे धर्मशास्त्रेऽष्टाविंशोऽध्यायः ॥

—❀०❀—

॥ अथ एकोनत्रिंशोऽध्यायः ॥

यस्तूपनीय व्रतादेशं कृत्वा वेदमध्यापयेत्तमाचार्यं विद्यात् ।
यस्त्वेनमल्पेनाध्यापयेत्तमुपाध्यायमेकादेशं वा ।
यो यस्य यज्ञे कर्म्माणि कुर्य्यात्तमृत्विजं विद्यात् ।
नापरीक्षितं याजयेत् नाध्यापयेत् नोपनयेत् ॥

अधर्मेण च यः प्राह यश्च धर्मेण पृच्छति ।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति ॥
धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वक्तव्या शुभं वीजमिवोषरे ॥
विद्याह वै ब्राह्मणमाजगाम गोपाय मां शेवधिस्तेहमस्मि ।
असूयकायानृजवेऽयताय न मां ब्रूया वीर्य्यवती तथा स्याम् ॥
यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्य्योपपन्नम् ।
यस्तेन द्रुह्येत् कतमांश्च नाह तस्मै मां ब्रूया बिधिपाय ब्रह्मन् ! ॥

इति वैष्णवे धर्मशास्त्रे एकोनत्रिंशोऽध्यायः ॥

---

## ॥ अथ त्रिंशोऽध्यायः ॥

श्रावण्यां पौष्ठपद्यां वा छन्दांस्युपाकृत्यार्द्ध पञ्चमान्-
मासानधीयीत ।
ततस्तेषामुत्सर्गं वहिः कुर्यान्नानुपाकृतानां ।
उत्ससर्गोपाकर्मणोर्मध्ये वेदाङ्गाध्ययनं कुर्यात् ।
नाधीयीताहोरात्रं चतुर्द्दश्यष्टमीषु च ।
नत्वन्तरग्रहसूतके । नेन्द्रियप्रयाणे ।
न वाति चण्डपवने । नाकालवर्षविद्युत्स्तनितेषु ।
न भूकम्पोल्कापातदिग्दाहेषु ।

नान्तःशवे ग्रामे। न शस्त्रसंपाते।

न श्वशृगालगर्द्दभनिह्रादे। न वादित्रशब्दे।

न शूद्रपतितयोः समीपे।

न देवतायतनश्मशानचतुष्पथरथ्यासु। नोदकान्तः।

न पीठोपहितपादः। न हस्त्यश्वोष्ट्रनौगोयानेषु। न वान्तः।

न विरिक्तः। नाजीर्णी। न पश्वनखान्तरागमने।

न राजश्रोत्रियगोब्राह्मणव्यसने। नोपाकर्म्मणि।

नोत्सर्गे न सामध्वनावृग्यजुषी। नापररात्रमधीत्य शयीत।

अभियुक्तोऽप्यनध्यायेष्वध्ययनं परिहरेत्।

यस्मादनध्ययनाधीतं नेहनामुत्र फलदम्।

तदध्ययनेनायुषः क्षयो गुरुशिष्ययोश्च।

तस्मादनध्यायवर्जं गुरुणा ब्रह्मलोककामेन विद्या-

सच्छिष्यक्षेत्रेषु वक्तव्या।

शिष्येण ब्रह्मारम्भावसानयोर्गुरोः पादोपसंग्रहणं कार्य्यम्।

प्रणवश्च व्याहर्त्तव्यः।

तत्र च यदृचोऽधीते तेनास्याज्येन पितॄणां तृप्तिर्भवति।

यद्यजूंषि तेन मधुना। यत्सामानि तेन पयसा।

यच्चाथर्व्वणन्तेन मांसेन।

यत्पुराणेतिहासवेदाङ्गधर्म्मशास्त्राण्यधीते तेनास्यान्नेन-

यश्च विद्यामासद्यास्मिंल्लोके तया जीवेन्न सा तस्य-

परलोके फलप्रदा भवेत्।

यश्च विद्यया यशः परेषां हन्ति।

अनुज्ञातश्चान्यस्मादधीयानान्न विद्यामादद्यात्।
तदादानमस्य ब्रह्मणः स्तेयं नरकाय भवति।

लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा।
आददीत यतो ज्ञानं न तं द्रुह्येत् कदाचन॥
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम्॥
कामान्माता पिता चैनं यदुत्पादयतो मिथः।
सम्भूतिं तस्य तां विद्याद्यद्योनाविह जायते॥
आचार्य्यस्तस्य यां जातिं बिधिवद्वेदपारगः।
उत्पादयति सावित्र्या सा सत्या साजरामरा॥
य आवृणोत्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन्।
तं वै मन्येत् पितरं मातरञ्च तस्मै न द्रुह्येत् कृतमस्य जानन्।

इति वैष्णवे धर्म्मशास्त्रे त्रिंशोऽध्यायः॥

—:०:—

## ॥ अथ एकत्रिंशोऽध्यायः ॥

त्रयः पुरुषस्यातिगुरवो भवन्ति।
माता पिता आचार्य्यश्च।
तेषां नित्यमेव शुश्रूषुणा भवितव्यम्।
यत्ते ब्रूयुस्तत्कुर्य्यात्। तेषां प्रियहितमाचरेत्।
न तैरननुज्ञातः किञ्चिदपि कुर्य्यात्।

एत एव त्रयोवेदा एत एव त्रयः सुराः ।
एत एव त्रयो लोका एत एवा त्रयोऽग्नयः ॥
पितागार्हपत्योऽग्निर्दक्षिणाग्निर्माता गुरुराहवनीयः ।
सर्वं तस्यादृता धर्म्मा यस्यै ते त्रय आदृताः ॥
अनादृतास्तु यस्यै ते सर्व्वास्तस्याफलाः क्रियाः ।
इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ॥
गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते ।

इति वैष्णवे धर्म्मशास्त्रे एकत्रिंशोऽध्यायः ॥

---

## ॥ अथ द्वात्रिंशोऽध्यायः ॥

राजर्त्विक्श्रोत्रियाधर्म्मप्रतिषेध्युपाध्यायपितृव्यमातामह-मातुलश्वशुरज्येष्ठभ्रातृसम्बन्धिनश्चाचार्य्यवत् ।

पत्न्या एतेषां सवर्णाः ।

मातृष्वसा पितृष्वसा ज्येष्ठा स्वसा च ।

श्वशुरपितृव्यमातुलर्त्विजां कनीयसां प्रत्युत्थान-मेवाभि वादनम् ।

हीनवर्णानां गुरुपत्नीनां दूरादभिवादनं न पादोपसंस्पर्शनम् ।

गुरुपत्नीनां गात्रोत्सादनाञ्जनकेशसंयमनपादप्रक्षालनं-न कुर्य्यात् ।

असंस्तुतापि परपत्नी भगिनीति वाच्या पुत्रीति मातेति वा।
न च गुरूणां त्वमिति ब्रूयात्।
तदतिक्रमे निराहारो दिवसान्ते तं प्रसाद्याश्नीयात्।
न च गुरुणा सह विगृह्य कथां कुर्य्यात्।
नैव चास्य परीवादम्। न चानभिप्रेतम्।

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः।
पूर्णे विंशतिवर्षे च गुणदोषौ विजानता॥
कामन्तु गुरुपत्नीनां युवतीनां युवा भुवि।
अभिवादनकं कुर्य्यादसावहमिति ब्रुवन्॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्ममनुस्मरन्॥
वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मानस्थानानि गरीयो यद्यदुत्तरम्॥
ब्राह्मणं दशवर्षञ्च शतवर्षञ्च भूमिपम्।
पिता पुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता॥
विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तु वीर्य्यतः।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मनः॥

इति वैष्णवे धर्मशास्त्रे द्वात्रिंशोऽध्याय॥

---

॥ अथ त्रयस्त्रिंशोऽध्यायः ॥

अथ पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं सुघोरं भवति।

परिग्रहप्रसङ्गाद्विशेषेण गृहाश्रमिनः।

तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोप-
पातकेषु प्रवर्त्तते।

जातिभ्रंशकरेषु सङ्करीकरणेष्वपात्रीकरणेषु च।

मलावहेषु प्रकीर्णकेषु च।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामक्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥

इति वैष्णवे धर्मशास्त्रे त्रयस्त्रिंशोऽध्यायः॥

---

॥ अथ चतुस्त्रिंशोऽध्यायः॥

मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानि।

अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनम्।

नह्यन्या निस्कृतिस्तेषां विद्यते हि कथञ्चन।

इति वैष्णवे धर्मशास्त्रे चतुस्त्रिंशोध्यायः॥

---

## ॥ अथ पञ्चत्रिंशोऽध्यायः ॥

ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदारगमनमिति-
महापातकानि । तत्संयोगश्च ।
सम्वत्सरेण पतति पतितेन सहाचरन् ।
एकयानभोजनाशनशयनैः ।
यौनस्रौवमौखसम्वन्धात् सद्य एव ।

अश्वमेधेन शुद्धेयुर्महापातकिनस्त्विमे ।
पृथिव्यां सर्वतीर्थानां तथानुसरणेन वा ॥

इति वैष्णवे धर्मशास्त्रे पञ्चत्रिंशोऽध्यायः ॥

---

## ॥ अथ षट्त्रिंशोऽध्यायः ॥

यागस्थस्य क्षत्रियस्य वैश्यस्य च रजस्वलायाश्चान्तर्व्व-
त्न्याश्चात्रिगोत्रायाश्चाविज्ञातस्य गर्भस्य शरणागतस्य च-
घातनं ब्रह्महत्यासमानीति ।
कौटसाक्ष्यं सुहृद्बध एतौ सुरापानसमौ ।
ब्राह्मणस्य भूम्यपहरणं निक्षेपापहरणं सुवर्णस्तेयसमम् ।
पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं-
गुरुदारगमनसमम् । पितृष्वसृमातृष्वसृस्वसृगमनञ्च ।

श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनञ्च ।
स्वसुः सख्याः स गोत्राया उत्तमवर्णायाः कुमार्य्या-
अन्त्यजाया रजस्वलायाः शरणागतायाः प्रव्रजिताया-
निक्षिप्तायाश्च ।

अनुपातकिनस्त्वेते महापातकिनो यथा ।
अश्वमेधेन शुद्ध्यन्ति तीर्थानुसरणेन वा ॥

इति वैष्णवे धर्मशास्त्रे षट्त्रिंशोऽध्यायः ॥

.........

## ॥ अथ सप्तत्रिंशोऽध्यायः ॥

अनृतवचनमुत्कर्षे । राजगामि च पैशुन्यम् ।
गुरोश्चालीकनिर्बन्धः । वेदनिन्दा । अधीतस्य च त्यागः ।
अग्निमातृपितृसुतदाराणाञ्च । अभोज्यान्नाभक्ष्यभक्षणम् ।
परस्वापहरणम् । परदाराभिगमनम् । अयाज्ययाजनम् ।
विकर्मणाजीवनञ्च असत्प्रतिग्रहश्च । क्षत्त्रविट्शूद्रगोबधः ।
अविक्रेयविक्रयः । परिवित्तितानुजेन ज्येष्ठस्य परिवेदनम् ।
तस्य च कन्यादानम् । याजनञ्च । व्रात्यता ।
भृतकाध्यापनम् । भृताच्चाध्ययनादानम् ।
सर्वाकरेष्वधिकारः । महायन्त्रप्रवर्त्तनम् ।
द्रुमगुल्मवल्लीलतौषधीनां हिंसा । स्त्रीजीवनम् ।

अभिचारबलकर्मसु प्रवृत्तिः। आत्मार्थे क्रियारम्भः। अनाहिताग्निता। देवर्षिपितृऋणानामनपाक्रिया। असच्छास्त्राभिगमनम्। नास्तिकता। कुशीलवता। मद्यपस्त्रीनिषेवणम्। इत्युपपातकानि।

उपपातकिनस्त्वेते कुर्युश्चान्द्रायणं नराः।
पराकञ्च तथा कुर्युर्यजेयुर्गोमखेन वा॥

इति वैष्णवे धर्मशास्त्रे सप्तत्रिंशोऽध्यायः॥

... ......

## ॥ अथ अष्टात्रिंशोऽध्यायः ॥

ब्राह्मणस्य रुजः करणम्। अपेयमद्ययोर्घ्रातिः जैह्म्यम्। पशुषु मैथुनाचरणं पुंसि च। इति जातिभ्रंशकराणि।

जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया।
कुर्यात् सान्तपनंकृच्छ्रं प्राजापत्यमनिच्छया॥

इति वैष्णवे धर्मशास्त्रे अष्टात्रिंशोऽध्यायः॥

—❀❀—

## ॥ अथ एकोनचत्वारिंशत्तमोऽध्यायः ॥

ग्राम्यारण्यानां पशूनां हिंसा सङ्करीकरणम् ।

सङ्करीकरणं कृत्वा मासमश्नीत यावकम् ।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तन्तु कारयेत् ॥

इति वैष्णवे धर्मशास्त्रे एकोनचत्वारिंशत्तमोऽध्यायः ॥

---

## ॥ अथ चत्वारिंशत्तमोऽध्यायः ॥

निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनमसत्यभाषणं-शूद्रसेवनमित्यपात्रीकरणम् ।

अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुद्ध्यति ।
शीतकृच्छ्रेण वा भूयो महासान्तपनेन वा ॥

इति वैष्णवे धर्मशास्त्रे चत्वारिंशत्तमोऽध्यायः ॥

---

## ॥ अथ एकचत्वारिंशत्तमोऽध्यायः ॥

पक्षिणां जलचराणां जलजानाञ्च घातनम् ।

कृमिकीटानाञ्च । मद्यानुगतभोजनम् ।

इति मलावहानि ।

मलिनीकरणीयेषु तप्तकृच्छ्रं विशोधनम् ।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं विशोधनम् ॥

इति वैष्णवे धर्मशास्त्रे एकचत्वारिंशत्तमोऽध्यायः ॥

यदनुक्तं तत्प्रकीर्णकम् ।

प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम् ।
प्रायश्चित्तं बुधः कुर्याद् ब्राह्मणानुमतः सदा ॥

इति वैष्णवे धर्मशास्त्रे द्विचत्वारिंशत्तमोऽध्यायः ॥

—:❀:—

## ॥ अथ त्रिचत्वारिंशत्तमोऽध्यायः ॥

अथ नरकाः । तामिस्रम् । अन्धतामिस्रम् । रौरवम् । महारौरवम् । कालसूत्रम् । महानरकम् । संजीवनम् । अवीचि । तापनम् । सम्प्रतापनम् । संघातकम् । काकोलम् । कण्डूलम् । कुट्टानम् । पूतिमृत्तिकम् । लोहशङ्कुः । ऋचीसम् । विषमपन्थानम् । कण्टकशाल्मलिः । दीपनदी । असिपत्रवनम् । लोहचारकमिति ।

एतेष्वकृतप्रायश्चित्ता अतिपातकिनः पर्यायेण कल्पं पच्यन्ते । महापातकिनो मन्वन्तरम् । अनुपातकिनश्चातुर्युगम् । कृतसङ्करीकरणाश्च सम्वत्सरसहस्रम् । कृतजातिभ्रंशकरणाश्च । कृतापात्रीकरणाश्च । कृतमलिनीकरणाश्च । प्रकीर्णकपातकिनश्च बहून् वर्षयुगान् ।

कृतपातकिनः सर्वे प्राणत्यागादनन्तरम् ।
याम्यं पन्थानमासाद्य दुःखमश्नन्ति दारुणम् ॥

यमस्य पुरुषैर्घोरैः कृष्यमाणा यतस्ततः।
सुकृच्छ्रेणानुकारेण नीयमानाश्च ते यथा॥
श्वभिः शृगालैः क्रव्यादैः काककङ्कबकादिभिः।
अग्नितुण्डैर्भक्ष्यमाणा भुजङ्गैर्वृश्चिकैस्तथा॥
अग्निना दह्यमानाश्च नुद्यमानाश्च कण्टकैः।
क्रकचैः पाट्यमानाश्च पीड्यमानाश्च तृष्णया॥
क्षुधया व्यथमानाश्च घोरैर्व्याघ्रगणैस्तथा।
पूयशोणितगन्धेन मूर्च्छमानाः पदे पदे॥
परान्नपानं लिप्सन्तस्ताड्यमानाश्च किङ्करैः।
काककङ्कबकादीनां भीमानां सदृशाननैः॥
क्वचित् क्वाथ्यन्ति तैलेन ताड्यन्ते मुषलैः क्वचित्।
आयसीषु च बिध्यन्ते शिलासु च तथा क्वचित्॥
क्वचिद्वान्तमथाश्नन्ति क्वचित् पूयमसृक् क्वचित्।
क्वचिद्विष्ठां क्वचिन्मांसं पूयगन्धि सुदारुणम्॥
अन्धकारेषु तिष्ठन्ति दारुणेषु तथा क्वचित्।
कृमिभिर्भक्ष्यमाणाश्च वह्नितुण्डैश्च दारुणैः॥
क्वचिच्छीतेन बाध्यन्ते क्वचिद्वा मेध्यमध्यगाः।
परस्परमथाश्नन्ति क्वचित् प्रेताः सुदारुणाः॥
क्वचिद्भूतेन ताड्यन्ते लम्बमानास्तथा क्वचित्।
क्वचित् क्षिप्यन्ति बाणौघैरुत्कृत्यन्ते तथा क्वचित्।
कण्ठेषु दत्तपादाश्च भुजङ्गाभोगवेष्टिताः।
पीड्यमानास्तथा यन्त्रैः कृष्यमाणाश्च जानुभिः॥

भग्नपृष्ठशिरोग्रीवाः सूचीकण्ठाः सुदारुणाः।
कूटागारप्रमाणैश्च शरीरैर्यातनाक्षमैः॥
एवं पातकिनः पापमनुभूय सुदुःखिताः।
तिर्यग्योनौ प्रपद्यन्ते दुःखानि विविधानि च॥

इति वैष्णवे धर्मशास्त्रे त्रिचत्वारिंशत्तमोऽध्यायः॥

—❀❀—

## ॥ अथ चतुश्चत्वारिंशत्तमोऽध्यायः ॥

अथ पापात्मनां नरकेष्वनुभूतदुःखानां तिर्य्यग्योनयो भवन्ति।
अतिपातकिनां पर्यायेण सर्वाः स्थावरयोनयः।
महापातकिनाञ्च कृमियोनयः।
उपपातकिनां जलजयोनयः।
कृतजातिभ्रंशकराणां जलचरयोनयः।
कृतसङ्करीकरणकर्मणां मृगयोनयः।
कृतापात्रीकरणकर्मणां पशुयोनयः।
कृतमलिनीकरणकर्मणां मनुष्येष्वस्पृश्ययोनयः।
प्रकीर्णेषु प्रकीर्णा हिंस्राः क्रव्यादा भवन्ति।
अभोज्यान्नाभक्ष्याशी कृमिः। स्तेन श्येनः।
प्रकृष्टवर्त्मापहारी विलेशयः। आखुर्धान्यहारी।

हंसः कांस्यापहारी । जलं हृत्वाभिप्लवः । मधु दंशः ।
पयः काकः । रसं श्वा । घृतं नकुलः । मांसं गृध्रः ।
वसां मद्गुः । तैलं तैलपायिकः । लवणं चीचिवाक् ।
दधि वलाका । कौशेयं हृत्वा भवति तित्तिरिः ।
क्षौमं दर्दुरः । कार्पासतान्तवं क्रौञ्चः । गोधा गाम् ।
वान्तुदो गुड़म् । छुच्छुन्दरिर्गन्धान् । पत्रशाकं वर्ही ।
कृतान्नं श्वावित् । अकृतान्नं शल्लकः । अग्निं वकः ।
गृहकार्यपस्करम् । रक्तवासांसि जविञ्जविकः ।
गजं कूर्म्मः । अश्वं व्याघ्रः । फलं पुष्पं वा मर्कटः ।
ऋक्षः स्त्रियम । यानमुष्ट्रः । पशूनजः । प्रेतः पारजायी ।

यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः ।
अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुतं हविः ॥
स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः ।
एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः ॥

इति वैष्णवे धर्मशास्त्रे चतुश्चत्वारिंशत्तमोऽध्यायः ॥

॥ अथ पञ्चचत्वारिंशोऽध्यायः ॥

अथ नरकानुभूत दुःखानां तिर्य्यक्त्वमुत्तीर्णानां-मनुष्येषु लक्षणानि भवन्ति ।

कुष्ठ्यतिपातकी। ब्रह्महा यक्ष्मी। सुरापः श्यावदन्तकः।
सुवर्णहारः कुनखः। गुरुतल्पगो दुश्चर्म्मा।
पूतिनासः पिशुनः। पूतिवक्त्रः सूचकः।
धान्यचौरोऽङ्गहीनः। मिश्रचौरोऽतिरिक्ताङ्गः।
अन्नापहारकस्त्वामयावी। वागपहारको मूकः।
वस्त्रापहारकः श्वित्री। अश्वापहारकः पङ्गुः।
देवब्राह्मणक्रोशको मूकः। लोलजिह्वो गरदः।
उन्मत्तोऽग्निदः। गुरुप्रतिकूलोऽपस्मारी।
गोघ्नस्त्वन्धः। दीपापहारकश्च। काणश्च दीपनिर्व्वापकः।
त्रपुचामरसीसकविक्रयी रजकः।
एकशफविक्रयी मृगव्याधः। कुण्डाशी भगास्यः।
वाण्टिकः स्तेनः। वार्द्धुषिको भ्रामरी।
मिष्टाश्येकाकीवातगुल्मी। समयभेत्ता खल्वाटः।
श्लीपद्यवकीर्णी। परवृत्तिघ्नो दरिद्रः।
परपीडाकरो दीर्घरोगी।

एवं कर्मविशेषेण जायन्ते लक्षणान्विताः।
रोगान्वितास्तथाऽन्धाश्च कुब्जखञ्जैकलोचनाः॥
वामना वधिरा मूका दुर्बलाश्च तथापरे।
तस्मात् सर्वः प्रयत्नेन प्रायश्चित्तं समाचरेत्॥

इति वैष्णवे धर्मशास्त्रे पञ्चचत्वारिंशत्तमोऽध्यायः॥

—:०००:—

## ।। अथ षट्चत्वारिंशोऽध्यायः ।।

अथ कृच्छ्राणि भवन्ति ।

त्र्यहं नाश्नीयात् प्रत्यहञ्च त्रिषवणं स्नानमाचरेत्त्रिः प्रति-
स्नानमप्सु मज्जनं मानस्त्रिरघमर्षणं जपेत् दिवास्थित-
स्तिष्ठेत् रात्रावासीनः कर्मणोऽन्ते पयस्विनीं-
दद्यादित्यघमर्षणम् ।

त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमयाचितमश्नीयादेषः प्राजापत्यः ।

त्र्यहमुष्णाः पिवेदपस्त्र्यहमुष्णं घृतं त्र्यहमुष्णं पयस्त्र्यहञ्च-
नाश्नीयादेष तप्तकृच्छ्रः । एष एव शीतैः शीतकृच्छ्रः ।

कृच्छ्रातिकृच्छ्रः पयसादिवसैकविंशतिक्षपणम् ।

उदकसक्तूनां मासाभ्यवहारेणोदककृच्छ्रः ।

विसाभ्यवहारेण मूलकृच्छ्रः ।

विल्वाभ्यवहारेण श्रीफलकृच्छ्रः पद्माक्षैर्वा ।

निराहारस्य द्वादशाहेनैव पराकः ।

गोमूत्रगोमयक्षीरदधिसर्पिः कुशोदकान्येकदिवसमश्नीयाद्-
द्वितीयमुपवसेदेतत्सान्तपनम् ।

गामूत्रादिभिः प्रत्यहाभ्यस्तैर्महासातपनम् ।

त्र्यहाभ्यस्तैश्चातिसन्तपनम् ।

पिण्याकाचमतक्रोदकसक्तूनामुपवासान्तरितोऽभ्य-
वहारस्तुलापुरुषः ।

कुशपलाशोडुम्बरपद्मशङ्खपुष्पीवटब्रह्मसुवर्च्चलानां पत्रैः-
कथितस्याम्भसः प्रत्येकं पानेन पर्णकृच्छ्रः ।।

कृच्छ्राण्येतानि सर्व्वाणि कुर्व्वीत कृतपावनः ।
नित्यं त्रिषवणस्नायी अधःशायी जितेन्द्रियः ॥
स्त्रीशूद्रपतितानाञ्च वर्ज्जयेच्चाभिभाषणम् ।
पवित्राणि जपेन्नित्यं जुहुयाच्चैव शक्तितः ॥

इति वैष्णवे धर्मशास्त्रे षट्चत्वारिंशत्तमोऽध्यायः ॥

---

## ॥ अथ सप्तचत्वारिंशत्तमोऽध्यायः ॥

### अथ चान्द्रायणम् ।

ग्रासानविकारानश्नीयात्तांश्चन्द्रकलाभिवृद्धौ क्रमेण वर्द्धयेद्धानौ-ह्रासयेदमावास्यां नाश्नीयादेष चान्द्रायणो यवमध्यः ।

पिपीलिकामध्यो वा ।

यस्यामावास्या मध्ये भवति स पिपीलिकामध्यः ।

यस्य पौर्णमासी स यवमध्यः ।

अष्टौ ग्रासान् प्रतिदिवसं मासमश्नीयात् स यतिचान्द्रायणः ।

सायं प्रातश्चतुरश्चतुरः स शिशुचान्द्रायणः यथा कथञ्चित् षट्कोनां त्रिशतीं मासेनाश्नीयात् स सामान्यचान्द्रायणः ।

व्रतमेतत् पुरा भूम कृत्वा सप्तर्षयो वरम् ।
प्राप्तवन्तः परं स्थानं ब्रह्मा रुद्रस्तथैव च ॥

इति वैष्णवे धर्मशास्त्रे सप्तचत्वारिंशत्तमोऽध्यायः ॥

---

## ।। अथ अष्टचत्वारिंशत्तमोऽध्यायः ।।

अथ कर्म्मभिरात्मकृतैर्गुरुमात्मानं मन्येतात्मार्थे-
प्रसृतियावकं श्रपयेत् । न ततोऽग्नौ जुहुयात् ।
न चात्र वलिकर्म । अशृतं श्रप्यमाणं शृतञ्चाभिमन्त्रयेत् ।
श्रप्यमाणे रक्षां कुर्य्यात् ।
ब्रह्मा देवानां पदवी कवीनां ऋषिर्विप्राणां श्येनो-
गृध्राणां महिषो मृगाणां स्वधितिर्वनानां सोमः-
पवित्रमभ्येति रेभन्निति दर्भान् वध्नाति ।
शृतञ्च तमश्नीयात् पात्रे निषिच्य ।
ये देवा मनोजाता मनोजुषः सुदक्षा दक्षपितरः ।
ते नः पान्तु ते नोऽवन्तु तेभ्योनमस्तेभ्यः स्वाहेत्यात्मनि-
जुहुयात् । अथाचान्तो नाभिमालभेत ।
धाताः पीता भवन्तो यूयमापोऽस्माकमुदरे यवाः ।
ता अस्मभ्यमनमी वा अपक्ष्या अनागसा सन्तु-
देवीरमृता ऋता वृद्ध इति । त्रिरात्रं मेधावी ।
षड़ात्रं पापकृत् ।
सप्तरात्रं पीत्वा महापातकिनामन्यतमः पुनाति ।
द्वादशरात्रेण पूर्वपुरुषकृतमपि पापं निर्दहति ।
मासं पीत्वा सर्वपपानि ।
गोनिर्हारमुक्तानां यवानामेकविंशतिरात्रञ्च ।

यवोऽसि धान्यराजोऽसि वारुणो मधुसंयुतः ।
निर्णोदः सर्वपापानां पवित्र मृषिभिः स्मृतम् ।।

घृतमेव मधु यवा आपो वा अमृतं यवाः।
सर्वं पुनीत मे पापं यन्मे किञ्चन दुष्कृतम्॥
वाचा कृतं कर्मकृतं मनसा च विचिन्तितम्।
अलक्ष्मीं कालकर्णीञ्च नाशयध्वं यवा! मम॥
श्वशूकरावलीढञ्च उच्छिष्टोपहतञ्च यत्।
मातापित्रोरशुश्रूषां पुनीध्वञ्च यवा! मम॥
गणान्नं गणिकान्नञ्च शूद्रान्नं श्राद्धसूतकम्।
चौरस्यान्नं नवश्राद्धं पुनीध्वञ्च यवा! मम॥

इति वैष्णवे धर्म्मशास्त्रे अष्टाचत्वारिंशत्तमोऽध्यायः॥

---

## अथ उनपञ्चाशत्तमोऽध्यायः।

मार्गशीर्षशुक्लैकादश्यामुपोषितो द्वादश्यां भगवन्तं-वासुदेवमर्च्चयेत्। पुष्पधूपानुलेपनदीपनैवेद्यैर्ब्राह्मणतर्पणैश्च। व्रतमेतत् सम्वत्सरं कृत्वा पापेभ्यः पूतो भवति। यावज्जीवं कृत्वा श्वेतद्वीपमवाप्नोति। उभयद्वादशीष्वेकं स्वर्गलोकं प्राप्नोति यावज्जीवं कृत्वा-विष्णोर्लोकमाप्नोति। एवमेव पञ्चदशीष्वपि।

ब्रह्मभूतममावास्यां पौर्णमास्यान्तथैव च।
योगभूतं परिचरन् केशवं महदाप्नुयात्॥

दृश्येत सहितौ यस्यां दिवि चन्द्र वृहस्पती ।
पौर्णमासी तु महती प्रोक्ता सम्वत्सरे तु सा ॥
तस्यां दानोपवासाद्यमक्षतं परिकीर्त्तितम् ।
तथैव द्वादशी शुक्ला या स्याच्छ्रवणसंयुता ॥

इति वैष्णवे धर्मशास्त्रे एकोनपञ्चाशत्तमोऽध्यायः ॥

---

## ॥ पञ्चाशत्तमोऽध्यायः ॥

वने पर्णकुटीं कृत्वा वसेत् त्रिषवणं स्नायात् स्वकर्म-
चाचक्षाणो ग्रामे ग्रामे भैक्ष्यमाचरेत् तृणशायी च स्यात् ।
एतन्महाव्रतं ब्राह्मणं हत्वा द्वादशसम्वत्सरं कुर्य्यात् ।
यागस्थं क्षत्रियं वा । गुर्व्विणीं रजस्वलां वा ।
अत्रिगोत्रां वा नारीम् । मित्रं वा ।
नृपतिबधे महाव्रतमेव द्विगुणं कुर्य्यात् ।
पादोनं क्षत्रियबधे । अर्द्धं वैश्यबधे । तदर्द्धं शूद्रबधे ।
सर्व्वेषु शवशिरोध्वजी स्यात् । सर्व्वेषु जीवेषु क्षमी स्यात् ।
मासमेकं कृतपावनो गवानुगमनं कुर्य्यात् आसीनास्वासीत-
स्थितासु स्थितः स्यात् अवसन्नाश्चोद्धरेत् भयेभ्यश्च रक्षेत्-
तासां शीतादित्राणमकृत्वा नात्मनः कुर्य्यात् गोमूत्रेण-
स्नायात् गोरसैश्च वर्त्तेत । एतद्गोव्रतं गोवधे कुर्य्यात् ।

गजं हत्वा पञ्च नीलान् वृषभान् दद्यात्।

तुरगं वासः। एकहायनमनड्वाहं खरबधे।

मेषाजबधे च। सुवर्णकृष्णलमुष्ट्रवधे।

श्वानं हत्वा त्रिरात्रमुपवसेत्।

हत्वा मूषकमार्ज्जारनकुलमण्डूकडुण्डुभाजगराणामन्यत-ममुपोषितः कृषरान्नं भोजयित्वा लोहदण्डं दक्षिणां दद्यात्।

गोधोलूककाकमत्स्यबधे त्रिरात्रमुपवसेत्।

हंसबकबलाकमद्गुवानरश्येनभासचक्रवाकानामन्यतमं-हत्वा ब्राह्मणाय गां दद्यात्।

सर्पं हत्वाभ्रींकार्ष्णायसीम्। षण्डं हत्वा पलालभारकम्।

वराहं हत्वा घृतकुम्भम्। तित्तिरिं तिलद्रोणम्।

शुकं द्विहायनं वत्सम्। क्रौञ्चं त्रिहायणम्।

क्रव्यादमृगबधे पयस्विनीं गां दद्यात्।

अक्रव्यादमृगवधे वत्सतरीम्। अनुक्तमृगवधे-त्रिरात्रं पयसा वर्त्तेत।

पक्षिबधे नक्ताशी स्यात् रूप्यमाषकं वा दद्यात्।

हत्वा जलचरमुपवसेत्।

अस्थिमताञ्च सत्वानां सहस्रस्य प्रमापणे।
पूर्णे चानस्यनस्थ्नान्तु शूद्रहत्याव्रतञ्चरेत्॥

किञ्चिदेव तु विप्राय दद्यादस्थिमतां वधे।
अनस्थ्नां चैव हिंसायां प्राणायामेण शुद्ध्यति॥

फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरुधाम्॥
अन्नजानाञ्च सत्वानां रसजानाञ्च सर्वशः।
फलपुष्पोद्भवानाञ्च घृतप्राशो विशोधनम्॥
कृष्टजानामोषधीनां जातानाञ्च स्वयं वने।
वृथालम्भे तु गच्छेद्गां दिनमेकं पयोव्रतम्॥

इति वैष्णवे धर्म्मशास्त्रे पञ्चाशत्तमोऽध्यायः॥

---

॥ अथ-एकपञ्चाशत्तमोऽध्यायः॥

सुरापः सर्वकर्मवर्जितः कणान् वर्षमश्नीयात्।

मलानां मद्यानां चान्यतमस्य प्राशने चान्द्रायणं कुर्य्यात्।

लशुनपलाण्डुगृञ्जनैतद्गन्धिविड्वराहग्राम्यकुक्कुटवानर-
गोमांसभक्षणे च।

सर्वेष्वेतेषु द्विजानां प्रायश्चित्तान्ते भूयः संस्कारं कुर्य्यात्।

वपनमेखलादण्डभैक्ष्यचर्य्याव्रतानि पुनःसंस्कार-
कर्मणि वर्जनीयानि।

शशकशल्लकगोधाखड्गकूर्मवर्जं पञ्चनखमांसाशने-
सप्तरात्रमुपवसेत्।

गणगणिकास्तेनगायनान्नानि भुक्त्वा सप्तरात्रं पयसा वर्त्तेत।

तक्षकान्नं चर्मकर्त्तुश्च।

वार्द्धुषिककदर्य्यदीक्षितबद्धनिगडाभिशस्तषण्डानाञ्च।
पुंश्चलीदाम्भिकचिकित्सकलुब्धकक्रूरोग्रोच्छिष्टभोजिनाञ्च।
अवीरास्त्रीसुवर्णकारसपत्नपतितानाञ्च।
पिशुनानृतवादिक्षतधर्मात्मरसविक्रयिणाञ्च।
शैलूषतन्तुवायकृतघ्नरजकानाञ्च।
कर्मकारनिषादरङ्गावतारिवेणशस्त्रविक्रयिणाञ्च।
श्वजीविशौण्डिकतैलिकचैलनिर्णेजकानाञ्च।
रजस्वलासहोपपतिवेश्मनाञ्च।
भ्रूणघ्नावेक्षितमुदक्या संस्पृष्टं पतत्रिणावलीढं-
शुना संस्पृष्टं गवाघ्रातञ्च।
कामतो यदा संस्पृष्टमवक्षुतम्।
मत्तक्रुद्धातुराणाञ्च। नार्च्चितं वृथामांसं च।
पाठीनरोहितराजीवसिंहतुण्डशकुलवर्जं-
सर्वमत्स्यमांसाशने त्रिरात्रमुपवसेत्।
सर्वजलजमांसाशनेषु च।
आपः सुराभाण्डस्थाः पीत्वा सप्तरात्रं शङ्खपुष्पीशृतम्पयःपिबेत्।
मद्यभाण्डस्थाश्च पञ्चरात्रम्।
सोमपः सुरापस्याघ्रायास्यगन्धमुदकमग्नस्त्रिरघमर्षणं-
जप्त्वा घृतप्राशनो भवेत्।
खरोष्ट्रकाकमांसाशने चान्द्रायणं कुर्य्यात्।
प्राश्याज्ञातं सूनास्थं शुष्कमांसञ्च।
क्रव्यादमृगपक्षिमांसाशने तप्तकृच्छ्रम्।

कलविङ्कप्लवचक्रवाकहंसरज्जुदालसारसदात्यूहशुकसारिका-
वकबलाकाकोकिलखञ्जरीटाशने त्रिरात्रमुपवसेत्।

एकशफोभयदन्ताशने च।

तित्तिरिकापिञ्जललावकवर्त्तिकामयूरवर्ज्जं सर्वपक्षिमांसाशने-
चाहोरात्रम्।

कीटाशने दिनमेकं ब्रह्मसुवर्च्चलां पिवेत्।

शुनां मांसाशने च। च्छत्राककरकाशने सान्तपनम्।

यवगोधूमपयोविकारं स्नेहाक्तं शुक्तं खाण्डवञ्च-
वर्जयित्वा पर्य्युषितं तत्प्राश्योपवसेत्।

ब्रश्चनामेध्यप्रभवाँल्लोहितांश्च वृक्षनिर्यासान्।

शालूकवृथाकृसरसंयावपायसापूपशष्कुलीदेवान्नानि हवींषि च।

गोऽजामहिषीवर्ज्जं सर्वपयांसि च।

अनिर्दशाहानि तान्यपि।

स्यन्दिनीसन्धिनीविवत्साक्षीरञ्च।

अमेध्यभुजश्च। दधिवर्ज्जं केवलानि च शुक्तानि।

ब्रह्मचर्य्याश्रमी श्राद्धभोजने त्रिरात्रमुपवसेत् दिनमेकं-
चोदके वसेत्।

मधुमांसाशने प्राजापत्यम्।

विडालकाकनकुलाखूच्छिष्टभक्षणे ब्रह्मसुवर्च्चलां पिवेत्।

श्वोच्छिष्टाशने दिनमेकमुपोषितः पञ्चगव्यं पिवेत्।

पञ्चनखविण्मूत्राशने सप्तरात्रम्।

आमश्राद्धाशने त्रिरात्रं पयसा वर्त्तेत।

ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रम्।
वैश्योच्छिष्टाशने पञ्चरात्रम्।
राजन्योच्छिष्टाशने त्रिरात्रम्।
ब्राह्मणोच्छिष्टाशने त्वेकाहम्।
राजन्यः शूद्रोच्छिष्टाशी पञ्चरात्रम्।
वैश्योच्छिष्टाशी त्रिरात्रम्। वैश्यः शूद्रोच्छिष्टाशी च।
चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत्।
सिद्धं भुक्त्वा पराकः।

असंस्कृतान् पशून्मन्त्रैर्नाद्याद्विप्रः कथञ्चन।
मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः॥
यावन्ति पशुरोमाणि तावत् कृत्वेह मारणम्।
वृथा पशुघ्नः प्राप्नोति प्रेत्य चेह च निष्कृतिम्॥
यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा।
यज्ञोहि भूत्यै सर्वस्य तस्माद्यज्ञे बधोऽवधः॥
न तादृशं भवत्येनो मृगं हन्तुर्धनार्थिनः।
यादृशं भवति प्रेत्य वृथामांसानि खादतः॥
औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा।
यज्ञार्थे निधनं प्राप्ताः प्राप्नुवन्त्युत्थितीः पुनः॥
मधुपर्के च यज्ञे च पितृदैवतकर्मणि।
अत्रैव पशवो हिंस्या नान्यत्रेति कथञ्चन॥
यज्ञार्थेषु पशून् हिंसन् वेदतत्त्वार्थविद्द्विजः।
आत्मानञ्च पशूंश्चैव गमयत्युत्तमां गतिम्॥

गृहे गुरावरण्ये वा निवसन्नात्मवान् द्विजः ।
नावेदविहितां हिंसामापद्यपि समाचरेत् ॥
या वेदविहिता हिंसा नियतास्मिंश्चराचरे ।
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ॥
योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया ।
स जीवंश्च मृतश्चैव न क्वचित् सुखमेधते ॥
यो बन्धनबधक्लेशान् प्राणिनां न चिकीर्षति ।
स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते ॥
यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च ।
तदवाप्नोति यत्नेन यो हिनस्ति न किञ्चन ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिबधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥
समुत्पत्तिञ्च मांसस्य बधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्त्तेत सर्वमांसस्य भक्षणात् ॥
न भक्षयति यो मांसं बिधिं हित्वा पिशाचवत् ।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ॥
अनुमन्ता बिशसिता निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ॥
स्वमांसं परमांसेन यो बर्द्धयितुमिच्छति ।
अनभ्यर्च्च्य पितॄन् देवांस्ततोऽन्यो नास्त्यपुण्यकृत् ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तस्य पुण्यफलं समम् ॥

फलमूलाशनैर्दिव्यैर्मुन्यन्नानाञ्च भोजनैः ।
न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ॥
मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥

इति वैष्णवे धर्मशास्त्रे एकपञ्चाशत्तमोऽध्यायः ॥

---

## ॥ अथ द्विपञ्चाशत्तमोऽध्यायः ॥

सुवर्णस्तेयकृद्राज्ञे कर्म्माचक्षाणो मुषलमर्पयेत् ।

बधात्त्यागाद्वा प्रयतो भवति ।

महाव्रतं द्वादशाब्दानि वा कुर्य्यात् ।

निक्षेपापहारी च । धान्यधनापहारी च कृच्छ्रमब्दम् ।

मनुष्यस्त्रीकूपक्षेत्रवापीनामपहरणे चान्द्रायणम् ।

द्रव्याणामल्पसाराणां सान्तपनम् ।

भक्ष्यभोज्यपानशय्यासनपुष्पमूलफलानां पञ्चगव्यपानम् ।

तृणकाष्ठद्रुमशुष्कान्नगुडवस्त्रचर्म्मामिषाणां त्रिरात्रमुपवसेत् ।

मणिमुक्ताप्रवालताम्ररजतायःकांस्यानां द्वादशाहं-
कणानश्नीयात् ।

कार्पासकीटजोर्णाद्यपहरणे त्रिरात्रं पयसा वर्त्तेत ।

द्विशफैकशफहरणे त्रिरात्रमुपवसेत् ।

पक्षिगन्धौषधिरज्जुवैदलानामपहरणे दिनमुपवसेत् ॥

दत्त्वैवापहृतं द्रव्यं धनिकस्याप्युपायतः ।
प्रायश्चित्तं ततः कुर्य्यात् कल्मषस्यापनुत्तये ॥
यद्यत्परेभ्य आदद्यात् पुरुषस्तु निरङ्कुशः ।
तेन तेन विहीनः स्याद्यत्र यत्राभिजायते ॥
जीवितं धर्म्मकामौ च धने यस्मात् प्रतिष्ठितौ ।
तस्मात् सर्वप्रयत्नेन धनहिंसा विवर्जयेत् ॥
प्राणिहिंसापरो यस्तु धनहिंसापरस्तथा ।
महादुःख मवाप्नोति धनहिंसापरस्तयोः ॥

इति वैष्णवे धर्म्मशास्त्रे द्विपञ्चाशत्तमोऽध्यायः ॥

---

## ॥ अथ त्रिपञ्चाशत्तमोऽध्यायः ॥

अथागम्यागमने महाव्रतविधानेनाब्दं चीरवासा वने-प्राजापत्यं कुर्य्यात् । परदारगमने च । गोव्रतं गोगमने च । पुंस्ययोनावाकाशेऽप्सु दिवा गोयाने च सवासाः स्नानमाचरेत् ।
चाण्डालीगमने तत्साम्यमवाप्नुयात् ।
अज्ञानतश्चान्द्रायणद्वयं कुर्य्यात् ।
पशुवेश्यागमने प्राजापत्यम् ।
सकृद्दुष्टा स्त्री यत् पुरुषस्य परदारे तद्व्रतं कुर्य्यात् ।

यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः।
तद्भैक्षभुग् जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति॥

इति वैष्णवे धर्म्मशास्त्रे त्रिपञ्चाशत्तमोऽध्यायः॥

---

॥ अथ चतुःपञ्चाशत्तमोऽध्यायः॥

यः पापात्मा येन सह संयुज्यते स तस्यैव प्रायश्चित्तं कुर्य्यात्। मृतपञ्चनखात् कूपादत्यन्तोपहताच्चोदकं पीत्वा-ब्राह्मणस्त्रीरात्रमुपवसेत्। द्व्यहं राजन्यः। एकाहं वैश्यः। शूद्रो नक्तम्। सर्वे चान्ते व्रतस्य पञ्चगव्यं पिवेयुः॥

पञ्चगव्यं पिवेच्छूद्रो ब्राह्मणस्तु सुरां पिवेत्।
उभौ तौ नरकं यातो महारौरवसंज्ञितम्॥

पर्व्वानारोग्यवर्जमृतावगच्छन् पत्नीं त्रिरात्रमुपवसेत्।
कूटसाक्षी ब्रह्महत्याव्रतञ्चरेत्।
अनुदकमूत्रपुरीषकरणे सचैलस्नानं महाव्याहृतिहोमश्च।
सूर्य्याभ्युदितनिर्म्मुक्तः सचैलस्नातः सावित्र्यष्टशतमावर्त्तयेत्।
श्वशृगालविड्वराहखरवानरवायसपुंश्चलीभिर्दष्टः-स्रवन्तीमासाद्य षोड़श प्राणायामान् कुर्य्यात्।
वेदाग्न्युत्सादी त्रिषवणस्नाय्यधःशायी सम्वत्सरं-सकृद्भैक्ष्येण वर्त्तेत।

समुत्कर्षानृते गुरोश्चालीकनिर्बन्धे तदाक्षेपणे च मासं पयसा वर्त्तेत ।

नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी-ब्राह्मणवृत्तिघ्नश्चैते सम्वत्सरं भैक्ष्येण वर्त्तेरन् ।

परिवित्तिः परिवेत्ता या च परिवेत्ता या च परिविद्यते-दाता याजकश्च चान्द्रायणं कुर्य्यात् ।

प्राणिभूपुण्यलोमविक्रयी तप्तकृच्छ्रं कुर्य्यात् ।

आर्द्रौषधिगन्धपुष्पफलमूलचर्म्मवेत्रवैदलतुषकपालकेश-भस्मास्थिगोरसपिण्याकतिलतैलविक्रयी प्राजापत्यम् ।

श्लेष्मजतुमधूच्छिष्टशङ्खत्रपुशुक्तिसीसकृष्णलोहो-डुम्बरखड्गपात्रविक्रयी चान्द्रायणं कुर्य्यात् ।

रक्तवस्त्ररङ्गरत्नगन्धगुड़मधुरसोर्णाविक्रयी त्रिरात्रमुपवसेत् ।

मांसलवणलाक्षाक्षीरविक्रयी चान्द्रायणं कुर्य्यात् ।

तश्च भूयश्चोपनयेत् ।

उष्ट्रेण खरेण वा गत्वा नग्नः स्नात्वा सुप्त्वा भुक्त्वा-प्राणायामत्रयं कुर्यात् ॥

जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः ।
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥
अयाज्ययाजनं कृत्वा परेषामन्त्यकर्म्म च ।
अभिचारमहीनञ्च त्रिभिः कृच्छ्रैर्व्यपोहति ॥
येषां द्विजानां सावित्री नानूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत् ॥

प्रायश्चित्तं चिकीर्षन्ति विकर्म्मस्थास्तु ये द्विजाः।
ब्राह्मण्याच्च परित्यक्तास्तेषामप्येतदादिशेत्॥
यद्गर्हितेनार्जयन्ति कर्म्मणा ब्राह्मणा धनम्।
तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसा तथा॥
वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्॥
अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने।
कृच्छ्रातिकृच्छ्रं कुर्व्वीत विप्रस्योत्पाद्य शोणितम्।
एनस्विभिरनिर्णिक्तैर्नार्थं कश्चित् समाचरेत्॥
कृतनिर्णेजनांश्चैतान्न जुगुप्सेत धर्म्मवित्।
बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्म्मतः।
शरणागतहन्तृंश्च स्त्रीहन्तृंश्च न संवसेत्॥
अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च॥
अनुक्तनिष्कृतीनाञ्च पापानामपनुत्तये।
शक्तिञ्चावेक्ष्य पापञ्च प्रायश्चित्तं प्रकल्पयेत्॥

इति वैष्णवे धर्म्मशास्त्रे चतुःपञ्चाशत्तमोऽध्यायः॥

---

## ॥ अथ पञ्चपञ्चाशत्तमोऽध्यायः ॥

### अथ रहस्यप्रायश्चित्तानि भवन्ति ।

स्रवन्तीमासाद्य स्नातः प्रत्यहं षोड़श प्राणायामान्-कृत्वैककालं हविष्याशी मासेन पूतोब्रह्महा भवति ।
कर्म्मणोऽन्ते पयस्विनीं गां दद्यात् ।
व्रतेनाघमर्षणेन च सुरापः पूतो भवति ।
गायत्रीदशसाहस्रजपेन सुवर्णस्तेयकृत त्रिरात्रोपोषितः
पुरुषसूक्तजपहोमाभ्यां गुरुतल्पगः ॥

यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः ।
तथाघमर्षणं सूक्तं सर्वपापापनोदनम् ॥

प्राणायामं द्विजः कुर्य्यात् सर्वपापापनुत्तये ।
दह्यन्ते सर्वपापानि प्राणायामैर्द्विजस्य तु ॥

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥

अकारश्चाप्युकारश्च मकारश्च प्रजापतिः ।
वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीति च ॥

त्रिभ्य एव च वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥

एतदक्षरमेताञ्च जपन् व्याहृतिपूर्विकाम् ।
सन्ध्ययोर्वेदविदुषो वेदपुण्येन युज्यते ॥

सहस्रकृत्वस्त्वभ्यस्य वहिरेतत्त्रिकं द्विजः ।
महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥
एतयाऽपरिसंयुक्ता काले च क्रियया स्वया ।
विप्रक्षत्रियविड्जातिर्गर्हणं याति साधुषु ॥
ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणोमुखम् ॥
योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः ।
स ब्रह्म परमभ्येति वायुभूतः खमूर्त्तिमान् ॥
एकाक्षरं परं ब्रह्म प्राणायामः परन्तपः ।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते ॥
क्षरन्ति सर्ववैदिक्यो जुहोति यजतिक्रियाः ।
अक्षरं त्वक्षरं ज्ञेयं ब्रह्मा चैव प्रजापतिः ॥
विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः ॥
ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥
जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः ।
कुर्य्यादन्यन्नवा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ॥

इति वैष्णवे धर्म्मशास्त्रे पञ्चपञ्चाशत्तमोऽध्यायः ॥

---

॥ अथ षट्पञ्चाशत्तमोऽध्यायः ॥

अथातः सर्ववेदपवित्राणि भवन्ति।

येषां जपैश्च होमैश्च द्विजातयः पापेभ्यः पूयन्ते।

अघमर्षणं देवकृतं शुद्धवत्यः तरत्सम्मदीयं कुष्माण्ड्यः-पावमान्यः दुर्गासावित्री अनीषङ्गाः पदस्तोमाः सामानि-व्याहृतयः भारुण्डानि चन्द्रसामपुरुषव्रते मासं वार्हस्पत्यं-गोसूक्तं अश्वसूक्तं सामनीचन्द्रसूक्ते च शतरुद्रीयं अथर्व-शिरः त्रिसुपर्णं महाव्रतं नारायणीयं पुरुषसूक्तञ्च।

त्रीण्याज्यदोहानि रथन्तरञ्च अग्निव्रतं वामदेव्यं वृहच्च।

एतानि गीतानि पुनन्ति जन्तून् जातिस्मरत्वं लभते य इच्छेत्।

इति वैष्णवे धर्म्मशास्त्रे षट्पञ्चाशत्तमोऽध्यायः॥

---

अथ सप्तपञ्चाशत्तमोऽध्यायः ॥

अथ त्याज्याः।

व्रात्या पतितास्त्रिपुरुषं मातृतः पितृतश्चाशुद्धाः-सर्व एवाभोज्याश्चाप्रतिग्राह्याः।

अप्रतिग्राह्येभ्यश्च प्रतिग्रहप्रसङ्गं वर्जयेत्।

प्रतिग्रहेण ब्राह्मणानां ब्राह्मं तेजः प्रणश्यति।

द्रव्याणां वाऽविज्ञाय प्रतिग्रहविधिं यः प्रतिग्रहं कुर्य्यात्-स दात्रा सह निमज्जति।

प्रतिग्रहसमर्थश्च यः प्रतिग्रहं वर्ज्जयेत् स दातृलोकमवाप्नोति ।
एधोदकमूलफलाभयामिषमधुशय्यासनगृहपुष्पदधि-
शाकांश्चाभ्युद्यतान्न निर्णुदेत ॥

आहूयाभ्युद्यतां भिक्षां पुरस्तादनुचोदिताम् ।
ग्राह्यां प्रजापतिर्मेने अपि दुष्कृतकर्म्मणः ॥
नाश्नन्ति पितरस्तस्य दशवर्षाणि पञ्च च ।
नच हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥
गुरून् भृत्यानुज्जिहीर्षुरर्चिष्यन् पितृदेवताः ।
सर्वतः प्रतिगृह्णीयान्नतु तृप्येत् स्वयं ततः ॥
एतेष्वपि च कार्येषु समर्थस्तत्प्रतिग्रहे ।
नाद्यात् कुलटाषण्डपतितेभ्यस्तथा द्विषः ॥
गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन् ।
आत्मनोवृत्तिमन्विच्छन् गृह्णीयात् साधुतः सदा ॥
अर्द्धिकः कुलमित्रश्च दासगोपालनापिताः ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥

इति वैष्णवे धर्मशास्त्रे सप्तपञ्चाशत्तमोऽध्यायः ॥

---

॥ अथ अष्टपञ्चाशत्तमोऽध्यायः ॥

अथ गृहाश्रमिणस्त्रिविधोऽर्थो भवति ।
शुक्लः शवलोऽसितश्चार्थः ।

शुल्केनार्थेन यद्दैहिकं करोति तद्देवमासादयति।
यच्छवलेन तन्मानुष्यम्। यत्कृष्णेन तत्तिर्य्यक्त्वम्।
स्ववृत्त्युपार्जितं सर्व्वं सर्व्वेषां शुल्कम्।
अनन्तरवृत्त्युपात्तंशवलम्। अन्तरितवृत्त्युपात्तञ्च कृष्णम्।

क्रमागतं प्रीतिदायं प्राप्तञ्च सह भार्यया।
अविशेषेण सर्वेषां धनं शुल्कं प्रकीर्त्तितम्॥
उत्कोचशुल्कसंप्राप्तमविक्रेयस्य विक्रये।
कृतोपकारादाप्तञ्च शबलं समुदाहृतम्॥
पार्श्विकद्यूतचौर्याप्तं प्रतिरूपकसाहसौ।
व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम्॥
यथाविधेन द्रव्येण यत्किञ्चित् कुरुते नरः।
तथाविधमवाप्नोति स फलं प्रेत्य चेह च॥

इति वैष्णवे धर्मशास्त्रे अष्टपञ्चाशत्तमोऽध्यायः।

—००—

## ॥ अथ एकोनषष्टितमोऽध्यायः ॥

गृहाश्रमी वैवाहिकाग्नौ पाकयज्ञान् कुर्य्यात्।
सायं प्रातश्चाग्निहोत्रम्। देवताभ्योजहुयात्।
चन्द्रार्कसन्निकर्षविप्रकर्षयोर्दर्शपूर्णमासाभ्यां यजेत।
प्रत्ययनं पशुना। शरद्ग्रीष्मयोश्चाग्रहायणेन।

व्रीहियवयोर्वा पाके। त्रैवार्षिकाभ्यधिकान्नः प्रत्यब्दं सोमेन।
वित्ताभावे इष्ट्या वैश्वानर्य्या। शूद्रान्नं यागे परिहरेत्।
यज्ञार्थं भिक्षितमवाप्तमर्थं सकलमेव वितरेत्।
सायं प्रातर्वैश्वदेवं जुहुयात्। भिक्षां च भिक्षवे दद्यात्।
अर्च्चितभिक्षादानेन गोदानफलमवाप्नोति।
भिक्ष्वभावे तन्मात्रं गवां दद्यात्।
वह्नौ वा प्रक्षिपेत्।

भुक्ताऽप्यन्ने विद्यमानेन भिक्षुकं प्रत्याचक्षीत।
कण्डनी पेषणी चुल्ली कुम्भ-उपस्कर इति पञ्चसूना गृहस्थस्य।
तन्निष्कृत्यर्थञ्च ब्रह्मदेवभूतपितृनरयज्ञान् कुर्य्यात्।
स्वाध्यायो ब्रह्मयज्ञः। होमो दैवः। बलिर्भौतः।
पितृ तर्पणं पित्र्यः। नृयज्ञश्चातिथिपूजनम्।

देवतातिथिभृत्यानां पितॄणामात्मनस्तथा।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति॥

ब्रह्मचारी यतिर्भिक्षुर्जीवन्त्येते गृहाश्रमात्।
तस्मादभ्यागतानेतान् गृहस्थो नावमानयेत्॥

गृहस्थ एव यजते गृहस्थस्तप्यते तपः।
ददाति च गृहस्थस्तु तस्माज्ज्येष्ठो गृहाश्रमी॥

ऋषयः पितरो देवा भूतान्यतिथयस्तथा।
आशासते कुटुम्बिभ्यस्तस्माच्छ्रेष्ठो गृहाश्रमी॥

त्रिवर्गसेवां सततान्नदानं सुरार्चनं ब्राह्मणपूजनञ्च ।
स्वाध्यायसेवां पितृतर्पणञ्च कृत्वा गृही शक्रपदं प्रयाति ॥

इति वैष्णवे धर्मशास्त्रे एकोनषष्टितमोऽध्यायः ॥

---

॥ अथ षष्टितमोऽध्यायः ॥

ब्राह्मे मुहूर्त्ते उत्थाय मूत्रपुरीषोत्सर्गं कुर्य्यात् ।

दक्षिणाभिमुखो रात्रौ दिवा चोदङ्मुखः सन्ध्ययोश्च ।

नाप्रच्छादितायां भूमौ । न फालकृष्टायाम् ।

न च्छायायाम् । न चोषरे । न शाद्वले । न ससत्वे ।

न गर्त्ते । न वल्मीके । न पथि । न रथ्यायाम् ।

न पराशुचौ । नोद्याने । नोद्यानोदकसमीपयोः ।

नाङ्गारे । न भस्मनि । न गोमये । न गोव्रजे ।

नाकाशे । नोदके ।

न प्रत्यनिलानलेन्द्वर्कस्त्रीगुरुब्राह्मणानाञ्च ।

नैवावगुण्ठितशिराः ।

लोष्टेष्टकाभिः परिमृज्य गुदं गृहीतशिश्नश्चोत्थायाद्भिर्मृद्भिश्चोद्धृताभिर्गन्धलेपक्षयकरं शौचं कुर्य्यात् ॥

एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयोः सप्त दातव्या मृदस्तिस्रस्तु पादयोः ॥

एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्।
त्रिगुणञ्च वनस्थानां यतीनाञ्च चतुर्गुणम्॥

इति वैष्णवे धर्मशास्त्रे षष्टितमोऽध्यायः॥

—०००—

## ॥ अथ-एकषष्टितमोऽध्यायः॥

अथ पालाशं दन्तधावनं नाद्यात्।
नैव श्लेष्मातकारिष्टविभीतकधववधन्वनजम्।
न च बन्धूकनिर्गुण्डीशिग्रुतिल्वतिन्दुकजम्।
न च कोविदारशमीपीलुपिप्पलेङ्गुदगुग्गुलुजम्।
न पारिभद्रकाम्लिकामोचकशाल्मलीशणजम्।
न मधुरम्। नाम्लम्। नोर्द्ध्वशुष्कम्। न शु(षि)शिरम्।
न पूतिगन्धि। न पिच्छिलम्। न दक्षिणापराभिमुखः।
अद्याच्चोदङ्मुखः प्राङ्मुखोवा।
वटासनार्कखदिरकरञ्जवदरसर्ज्जनिम्वारिमेदापामार्ग-
मालतीककुभविल्वानामन्यतमम्। कषायं तिक्तं कटुकञ्च॥

कनीन्यग्रसमस्थौल्यं सकूर्च्चं द्वादशाङ्गुलम्।
प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनम्॥
प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे प्रयत्नतः।
अमावास्यां न चाश्नीयाद्दन्तकाष्ठं कदाचन॥

इति वैष्णवे धर्मशास्त्रे-एकषष्टितमोऽध्यायः॥

## ॥ अथ द्विषष्टितमोऽध्यायः ॥

अथ द्विजातीनां कनीनिकामूले प्राजापत्यं नाम तीर्थम् ।
अङ्गुष्ठमूले ब्राह्मम् । अङ्गुल्यग्रे दैवम् ।
तर्ज्जनीमूले पित्र्यम् ।
अनग्न्युष्णाभिरफेनिलाभिर्नशूद्रैककरावर्जिताभिरक्षराभि-
रद्भिः शुचौ देशे स्वासीनोऽन्तर्जानुः प्राङ्मुखश्चोदङ्मुखोवा-
तन्मनाः सुमनाश्चाचामेत् ।
ब्राह्मेण तीर्थेन त्रिराचामेत् । द्विःप्रमृज्यात् ।
खान्यद्भिर्मूर्द्धानं हृदयं स्पृशेत् ।

हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ।
शुद्ध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥

इति वैष्णवे धर्मशास्त्रे द्विषष्टितमोऽध्यायः ॥

---

## ॥ अथ त्रिषष्टितमोऽध्यायः ॥

अथ योगक्षेमार्थमीश्वरमुपगच्छेत् । नैकोऽध्वानं प्रपद्येत ।
नाधार्म्मिकैः सार्द्धम् । न वृषलैः । न द्विषद्भिः ।
नातिप्रत्यूषसि । नातिसायम् । न सन्ध्ययोः ।
न मध्याह्ने न सन्निहितपानीयम् । नातितूर्णम् ।
न रात्रौ । न सन्ततं व्याल व्याधितार्त्तैर्वाहनैः ।
न हीनाङ्गैः न रोगिभिः । न दीनैः । न गोभिः ।

नादान्तैः। यवसोदकैर्वाहनानामदत्त्वात्मनःक्षुत्तृष्णापनोदने न कुर्य्यात्। न चतुष्पथमधितिष्ठेत्। न रात्रौ वृक्षमूलम्। न शून्यालयं न तृणम्। न पशूनां बन्धनागारम्। न केशतुषकपालास्थिभस्माङ्गारान्। न कार्पासास्थि। चतुष्पथं प्रदक्षिणीकुर्य्यात् देवताञ्च प्रज्ञातांश्च वनस्पतीन्। अग्निब्राह्मणगणिकापूर्णकुम्भादर्शच्छत्रध्वजपताकाश्रीवृक्ष-वर्द्धमाननन्द्यावर्त्तांश्च तालदन्तचामराश्वगजाजगोदधि-क्षीरमधुसिद्धार्थकांश्च वीणाचन्दनायुधार्द्रगोमयपुष्पशाक-गोरोचनादूर्व्वाप्ररोहांश्च उष्णीषालङ्कारमणिकनकरजत-वस्त्रासनयानामिषांश्च भृङ्गारोद्धृतोर्व्वरारज्जुबद्धपशु-कुमारीमीनांश्च दृष्ट्वा प्रयादिति।

अथमत्तोन्मत्तव्यङ्गान् दृष्ट्वा निवर्त्तेत।

वान्तविविक्तमुण्डमलिनवसनजटिलवामनांश्च।

कषायिप्रव्रजितमलिनांश्च।

तैलगुड़शुष्कगोमयेन्धनतृणकुशपलाशभस्माङ्गारांश्च।

लवणक्लीवासवनपुंसककार्पासरज्जुनिगड़मुक्तकेशांश्च।

वीणाचन्दनार्द्रशाकोष्णीषालङ्करणकुमारीः-प्रस्थानकालेऽभिनन्दयेदिति।

देवब्राह्मणगुरुबभ्रुदीक्षितानां च्छायां नाक्रामेत्।

निष्ठ्यूतवान्तरुधिरविण्मूत्रस्नानोदकानि वा।

न वत्सतन्त्रीं लङ्घयेत्। प्रवर्षति न धावन्।

न वृथा नदीं तरेत्।

न देवताभ्यः पितृभ्यश्चोदकामं प्रदाय। न वाहुभ्याम्।
न भिन्नया नावा। न कच्छमधितिष्ठेत।
न कूपमवलोकयेत् न लङ्घयेत् ॥

वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम्।
पन्था देयो नृपस्त्वेषां मान्यः स्नातश्च भूपतेः ॥

इति वैष्णवे धर्मशास्त्रे त्रिषष्टितमोऽध्यायः ॥

—❀:❀—

॥ अथ चतुःषष्टितमोऽध्यायः ॥

परनिपानेषु न स्नानमाचरेत्।
आचरेत् पञ्चपिण्डानुद्धृत्यापदि। नाजीर्णे।
नचातुरः। न नग्नः। न रात्रौ राहुदर्शनवर्जम्।
न सन्ध्ययोः।
प्रातःस्नाय्यरुणकिरणग्रस्तां प्राचीमवलोक्य स्नायात्।
स्नातः शिरो नावधुनेत्। नाङ्गेभ्यस्तोयमुद्धरेत्।
न तैलवस्तु स्पृशेत्। नाप्रक्षालितं पूर्वधृतं वसनं विभृयात्।
स्नातः सोष्णीषो धौतवाससी विभृयात्।
न म्लेच्छान्त्यजपतितैः सह सम्भाषणं कुर्य्यात्।
स्नायात् प्रस्रवणदेवखातसरोवरेषु।
उद्धृताद्भूमिष्ठमुदकं पुण्यं स्थावरात् प्रस्रवणं तस्मान्नादेयं-
तस्मादपि साधुपरिगृहीतं सर्वत एव गाङ्गम्।

मृत्तोयैः कृतमलापकर्षोऽप्सु निमज्ज्यापोहिष्ठेति तिसृभिर्हिरण्यवर्णा इतिचतसृभिरिदमापः प्रवहत इति चतुर्थमभिमन्त्रयेत्। ततोऽप्सु निमग्नस्त्रिरघमर्षणं जपेत्।
तद्विष्णोः परमं पदमिति वा। द्रुपदां सावित्रीं वा।
युञ्जते मन इत्यनुवाकं वा। पुरुषसूक्तं वा।
स्नातश्चार्द्रवासा देवपितृतर्पणमम्भःस्थ एव कुर्य्यात्।
परिवर्त्तितवासाश्चेत्तीर्थमुत्तीर्य्य।
अकृत्वा देवपितृतर्पणं स्नानवस्त्रादि न पीडयेत्।
स्नात्वाचम्य विधिवदुपस्पृशेत्।
पुरुषसूक्तेन प्रत्यृचं पुरुषाय पुष्पाणि दद्यात्।
उदकाञ्जलिं पश्चात्।
आदावेव दिव्येन तीर्थेन देवतानां कुर्य्यात्।
तदनन्तरं पित्र्येण पितृणाम्।
तत्रादौ स्ववंश्यानां तर्पणं कुर्य्यात्।
ततः सम्बन्धिबान्धवानाम्। ततः सुहृदाम्।
एवं नित्यस्नायी स्यात्।
स्नातश्च पवित्राणि यथाशक्ति जपेत्।
विशेषतः सावित्रीं त्ववश्यं जपेत् पुरुषसूक्तञ्च।
नैताभ्यामधिकमस्ति ॥

स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि।
पवित्राणां तथा जप्ये दाने च विधिनोदिते ॥

अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम् ।
स्नातस्य जलमात्रेण नश्यते इति धारणा ॥
याम्यं हि यातनादुःखं नित्यस्नायी न पश्यति ।
नित्यस्नानेन पूयन्ते येऽपि पापकृतो नराः ॥

इति वैष्णवे धर्मशास्त्रे चतुःषष्टितमोऽध्यायः ॥

## ॥ अथ पञ्चषष्टितमोऽध्यायः ॥

अथातः सुस्नातः प्रक्षालितपाणिपादः स्वाचान्तो देवतार्चायां स्थले वा भगवन्तमनादिनिधनं वासुदेवमभ्यर्चयेत् ।
अश्विनैः प्राणैस्त्वेते इति कीचकीयमन्त्रेणाहूय जीवस्य-भगवतो जीवादानं दत्त्वा युञ्जते मन इत्यनुवाकेनावाहनं-कृत्वा जानुभ्यां पाणिभ्यां शिरसा च नमस्कारं कुर्य्यात् ।
आपोहिष्ठेति तिसृभिरर्घ्यं निवेदयेत् ।
हिरण्यवर्णाइति चतसृभिः पाद्यम् ।
शन्न आपो धन्वन्या इत्याचमनीयम् ।
इदमापः प्रवहत इति स्नानीयम् ।
रथे स्वक्षेषु वृषभराजा इत्यनुलेपना लङ्कारौ ।
युवा सुवासा इतिवासः । पुष्पवतीरितिपुष्पम् ।
धूरसि धूपमितिधूपम् । तेजोऽसि शुक्रमितिदीपम् ।
दधिक्रावण इतिमधुपर्कः । हिरण्यगर्भ इत्यष्टाभिर्नैवेद्यम् ।

चामरं व्यजनं मात्रां छत्रं पानासने तथा ।
सावित्रेणैव तत् सर्व्वं देवाय विनिवेदयेत् ॥
एवमभ्यर्च्च्य च जपेत् सूक्तं वै पौरुषं ततः ।
तेनैव जुहुयादाज्यं य इच्छेत्शाश्वतं पदम् ॥

इति वैष्णवे धर्म्मशास्त्रे पञ्चषष्टितमोऽध्यायः ॥

---

## ॥ अथ षट्षष्टितमोऽध्यायः ॥

न नक्तं गृहीतेनोदकेन देवपितृकर्म्म कुर्य्यात् ।

चन्दनमृगमदागुरुकर्पूरकुङ्कुमजातीफलवर्जमनुलेपनं न दद्यात् ।

न वासो नीलीरक्तम् ।

न मणिसुवर्णयोः प्रतिरूपमलङ्करणम् । नागन्धि ।

नोग्रगन्धि । न कण्टकिजम् ।

कण्टकिजमपि शुक्लं सुगन्धिकं दद्यात् ।

रक्तमपि कुङ्कुमं जलजञ्च दद्यात् ।

न धूपार्थे जीवजातम् । न घृततैलं विना किञ्चन दीपार्थे ।

नाभक्ष्यं नैवेद्यार्थे । न भक्ष्ये अप्यजामहिषीक्षीरे ।

पञ्चनखमत्स्यवराहमांसानि च ।

प्रयतश्च शुचिर्भूत्वा सर्व्वमेव निवेदयेत् ।
तन्मनाः सुमना भूत्वा त्वराक्रोधविवर्जितः ॥

इति वैष्णवे धर्म्मशास्त्रे षट्षष्टितमोऽध्यायः ॥

## ॥ अथ सप्तषष्टितमोऽध्यायः ॥

अथाग्निं परिसमूह्य पर्य्युक्ष्य परिस्तीर्य्य परिषिच्य सर्वतः-पाकादग्रमुद्धृत्य जुहुयात्।

वासुदेवाय सङ्कर्षणाय प्रद्युम्नायानिरुद्धाय पुरुषाय-सत्यायाच्युताय वासुदेवाय।

अथाग्नये सोमाय मित्राय वरुणाय इन्द्रायेन्द्राग्निभ्यां-विश्वेभ्यो देवेभ्यः प्रजापतये अनुमत्यै धन्वन्तरये-वास्तोष्पतये अग्नये स्विष्टिकृते च।

ततोऽन्नशेषेण वलिमुपहरेत्।

भक्ष्योपभक्ष्याभ्यामभितः पूर्व्वेणाग्नेः।

अवानामासीति त्वलानामासीति नितन्तीनामासीति-क्षिप्रणिकानामासीति सर्व्वासाम्।

नन्दिनि सुभगे सुमङ्गलि भद्रकालीतिस्वस्थिष्वभिप्रदक्षिणाम्।

स्थूणायां ध्रुवायां श्रियै। हिरण्यकेश्यै वनस्पतिभ्यः।

धर्म्माधर्म्मयोर्द्वारे मृत्यवे च। उदपाने वरुणाय।

विष्णव इत्युलूखले। मरुद्भ्य इति दृशदि।

उपरिशरणे वैश्रवणाय राज्ञे भूतेभ्यश्च।

इन्द्रायेन्द्रपुरुषेभ्य इतिपूर्व्वार्द्धे।

यमाय यमपुरुषेभ्य इतिदक्षिणार्द्धे।

वरुणाय वरुणपुरुषेभ्य इतिपश्चार्द्धे।

सोमाय सोमपुरुषेभ्य इत्युत्तरार्द्धे

ब्रह्मणे ब्रह्मपुरुषेभ्य इतिमध्ये। ऊर्द्ध्वमाकाशाय।
दिवाचरेभ्यो भूतेभ्य इतिस्थण्डिले। नक्तञ्चरेभ्य इतिनक्तम्।
ततो दक्षिणाग्रेषु दर्भेषु पित्रे पितामहाय प्रपितामहाय-मात्रे पितामह्यै प्रपितामह्यै स्वनामगोत्राभ्याञ्च-पिण्डनिर्व्वपणं कुर्य्यात्।

पिण्डानाञ्चानुलेपनपुष्पधूपनैवेद्यादि दद्यात्।

उदककलशमुपनिधाय स्वस्त्ययनं वाचयेत्।

श्वकाकश्वपचानां भुवि निर्वपेत्। भिक्षाञ्च दद्यात्।

अतिथिपूजने च परं फलमधितिष्ठेत्।

सायमतिथिं प्राप्तं प्रयत्नेनार्चयेत्।

अनाशितमतिथिं गृहे न वासयेत्।

यथा वर्णानां ब्राह्मणः प्रभुर्यथा स्त्रीणां भर्त्ता तथा-गृहस्थस्यातिथिः। तत्पूजायां स्वर्गमाप्नोति॥

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते।
तस्मात् सुकृतमादाय दुष्कृतन्तु प्रयच्छति॥

एकरात्रं हि निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्या हि स्थितिर्यस्मात्तस्मादतिथिरुच्यते॥

नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा।
उपस्थितं गृहे विद्याद्भार्य्या यत्राग्नयोऽपिवा॥

यदि त्वतिथिधर्म्मेण क्षत्रियो गृहमागतः।
भुक्तवत्सु च विप्रेषु कामं तमभिपूजयेत्॥

वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ ।
भोजयेत् सह भृत्यैस्तावानृशंस्यं प्रयोजयन् ॥
इतराण्यपि सख्यादीन् संप्रीत्या गृहमागतान् ।
प्रकृतान्नं यथाशक्ति भोजयेत् सह भार्य्यया ॥
सुवासिनीं कुमारीश्च रोगिणीं गुर्व्विणीं तथा ।
अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन् ॥
अदत्त्वा यस्तु एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः ।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः ॥
भुक्तवत्सु च विप्रेषु भृत्येषु स्वेषु चैव हि ।
भुञ्जयीतां ततः पश्चादवशिष्टन्तु दम्पती ॥
देवान् पितॄन् मनुष्यांश्च भृत्यान् गृह्यांश्च देवताः ।
पूजयित्वा ततः पश्चाद् गृहस्थः शेषभुग्भवेत् ॥
अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् ।
यज्ञ शिष्टाशनं ह्येतत् सतामन्नं विधीयते ॥
स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा ।
न चाप्नोति गृही लोकान् यथा त्वतिथिपूजनात् ॥
सायं प्रातस्त्वतिथये प्रदद्यादासनोदकम् ।
अन्नञ्चैव यथा शक्त्या सत्कृत्य विधिपूर्वकम् ॥
प्रतिश्रयं तथा शय्यां पादाभ्यङ्गं सदीपकम् ।
प्रत्येकदानेनाप्नोति गोप्रदानसमं फलम् ॥

इति वैष्णवे धर्म्मशास्त्रे सप्तषष्टितमोऽध्यायः ॥

चन्द्रार्कोपरागे नाश्नीयात्। स्नात्वा मुक्तयोरश्नीयात्।
अमुक्तयोरस्तंगतयोर्दृष्ट्वा स्नात्वा चापरेऽह्नि।
न गोब्राह्मणोपरागेऽश्नीयात्। न राजव्यसने।
प्रवसिताग्निहोत्री यदाग्निहोत्रं कृतं मन्येत तदाश्नीयात्।
यदा कृतं मन्येत वैश्वदेवमपि।
पर्वणि च यदा कृतं मन्येत पर्व। नाश्नीयाच्चाजीर्णे।
नार्द्धरात्रे। न मध्याह्ने। न सन्ध्योः। नार्द्रवासाः।
नैकवासाः। न नग्नः। न जलस्थः। नोत्कुटुकः।
न भिन्नासनगतः। नच शयनगतः। न भिन्नभाजने।
नोत्सङ्गे। न भुवि। न पाणौ।
लवणञ्च यत्र दद्यात् न चाश्नीयात्।
न वालकान्निर्भर्त्सयेत्। नैको मिष्टम्। नोद्धृतस्नेहम्।
न दिवा धानाः। न रात्रौ तिलसंयुक्तम्। न दधि सक्तून्।
न कोविदारवटपिप्पलशाणशाकम्। नादत्त्वा। नाहुत्वा।
नानार्द्रपादः। नानार्द्रकरमुखश्च।
नोच्छिष्टश्च घृतमादद्यात् न चन्द्रार्कतारका निरीक्षेत।
न मूर्द्धानं स्पृशेत्। न ब्रह्म कीर्त्तयेत्।
प्राङ्मुखोऽश्नीयात् दक्षिणामुखो वा।
अभिपूज्यान्नम्। सुमनाःस्रग्व्यनुलिप्तः। न निःशेषकृत्स्यात्।
अन्यत्र दधिमधुसर्पिःपयःसक्तुपलमोदकेभ्यः।

नाश्नीयाद्भार्य्यया सार्द्धं नाकाशे न तथोत्थितः।
वहूनां प्रेक्षमाणानां नैकस्मिन् वहवस्तथा॥

शून्यागारे वह्निगृहे देवगारे कथञ्चन ।
पिबेन्नाञ्जलिना तोयं नातिसौहित्यमाचरेत् ॥
न तृतीयमथाश्नीयान्नचापथ्यं कथञ्चन ।
नातिप्रगे नातिसायं न सायं प्रातराशितः ॥
न भावदुष्टमश्नीयान्न भाण्डे भावदूषिते ।
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ॥

इति वैष्णवे धर्म्मशास्त्रे अष्टषष्टितमोऽध्यायः ॥

---

॥ अथ एकोनसप्ततितमोऽध्यायः ॥

नाष्टमीचतुर्द्दशीपञ्चदशीषु स्त्रियमुपेयात् । न श्राद्धं भुक्त्वा । न श्राद्धं दत्त्वा । नोपनिमन्त्रितः श्राद्धे । न स्नात्वा । न हुत्वा । न व्रती । नोपोष्य भुक्त्वा वा । न दीक्षितः । न देवायतनश्मशानशून्यालयेषु । न वृक्षमूलेषु । न दिवा । न सन्ध्योः । न मलिनाम् । न मलिनः । नाभ्यक्ताम् । नाभ्यक्तः । न रोगार्त्ताम् । न रोगार्त्तः ।

न हीनाङ्गीं नाधिकाङ्गीं तथैव च वयोधिकाम् ।
नोपेयाद्गुर्विणीं नारीं दीर्घमायुर्जिजीविषुः ॥

इति वैष्णवे धर्म्मशास्त्रे एकोनसप्ततितमोऽध्यायः ॥

—:००:—

नार्द्रपादः स्वप्यात् । नोत्तरापरावाक्शिराः । न नग्नः ।
नार्द्रवंशे । नाकाशे । न पलाश शयने । न पञ्चदारुकृते ।
न गजभग्नकृते । न विद्युद्दग्धकृते न भिन्ने । नाग्निव्युष्टे ।
न घटासिक्तद्रुमजे । न श्मशानशून्यालयदेवतायतनेषु ।
न चपलमध्ये । न नारीमध्ये ।
न धान्यगोगुरुहुताशनसुराणामुपरि ।

नोच्छिष्टो न दिवा स्वप्यात् सन्ध्ययोर्न च भस्मनि ।
देशे न चाशुचौ नार्द्रे न च पर्वतमस्तके ॥

इति वैष्णवे धर्मशास्त्रे सप्ततितमोऽध्यायः ॥

.........

॥ अथ एकसप्ततितमोऽध्यायः ॥

अथ न कञ्चनावमन्येत ।

न च हीनाङ्गाधिकाङ्गान्मूर्खान् धनहीनानवहसेत् ।
न हीनान् सेवेत । स्वाध्यायविरोधि कर्म्म नाचरेत् ।
वयोऽनुरूपं वेशं कुर्य्यात् श्रुतस्याभिजनस्य धनस्य देशस्य च ।
नोद्धतः । नित्यं शास्त्राद्यवेक्षी स्यात् ।
सति विभवे न जीर्णमलवद्वासाः स्यात् ।
न नास्तीत्यभिभाषेत ।
न निर्गन्धोग्रगन्धिरक्तञ्च माल्यं बिभृयात् ।
बिभृयाज्जलजं रक्तमपि । यष्टिञ्च वैणवीम् ।

कमण्डलुञ्च सोदकम् । कार्पासमुपवीतम् ।
रौक्मे च कुण्डले । नादित्यमुद्यन्तमीक्षेत ।
नास्तं यान्तम् । न वाससा तिरोहितम् ।
न चादर्शे जलमध्यगतम् । न मध्याह्ने ।
न क्रुद्धस्य गुरोर्मुखम् । न तैलोदकयोः स्वच्छायाम् ।
न मलवत्यादर्शे । न पत्नीं भोजनसमये ।
न स्त्रियं नग्नाम् । न कञ्चन मेहमानम् ।
न चालानभ्रष्टकुञ्जरम् । न च विषमस्थोवृषादियुद्धम् ।
न मत्तम् । नामेध्यमग्नौ प्रक्षिपेत् । नासृक् ।
न विषम् । नापस्वपि । नाग्निं लङ्घयेत् ।
न पादौ प्रतापयेत् । न कुशैस्तेषु वा परिमृज्यात् ।
न कांस्यभाजने चार्पयेत् । न पादं पादेन ।
न भुवमालिखेत् । न लोष्टमर्द्दी स्यात् ।
न तृणच्छेदी स्यात् । न दन्तैर्नखलोमानि च्छिन्द्यात् ।
द्यूतं वर्जयेत् बालातपसेवाञ्च ।
वस्त्रोपानहमाल्योपवीतान्यन्यधृतानि न धारयेत् ।
न शूद्राय मतिं दद्यात् नोच्छिष्टहविषी न तिलान् ।
न चास्योपदिशेद्धर्म्मं न व्रतम् ।
न संहताभ्यां पाणिभ्यां शिरउदरञ्च कण्डूयेत ।
न दधि सुमनसी प्रत्याचक्षीत ।
नात्मनः स्रजमपकर्षयेत् । सुप्तं न प्रबोधयेत् ।
नोदक्यामभिभाषेत न म्लेच्छान्त्यजान् ।

अग्निदेवब्राह्मणसन्निधौ प्रदक्षिणम् पाणिमुद्धरेत ।
न परक्षेत्रे चरन्तीं गामाचक्षीत न पिवन्तं वत्सकम् ।
नोद्धतान् प्रहर्षयेत् । न शूद्रराज्ये निवसेत् ।
नाधार्म्मिकजनाकीर्णे । न संवसेद्वैद्यहीने ।
नोपसृष्टे । न चिरं पर्वते । न वृथाचेष्टां कुर्य्यात् ।
न नृत्यगीते । नास्फोटनं कार्य्यम् ।
नाश्लीलं कीर्त्तयेत् । नानृतम् । नाप्रियम् ।
न किञ्चन्मर्म्माणि स्पृशेत् ।
नात्मानमवजानीयाद्दीर्घमायुर्जिजीविषुः ।
चिरं सन्ध्योपासनं कुर्य्यात् । न सर्पशस्त्रैः क्रीडेत ।
अनिमित्ततः खानि खानि न स्पृशेत् ।
परस्य दण्डं नोद्यच्छेत । शास्यं शासनार्थं ताडयेत् ।
तन्वा वेणुदलेन रज्ज्वा वा पृष्ठे ।
देवब्राह्मणशास्त्रमहात्मनां परीवादं परिहरेत् ।
धर्मविरुद्धौ चार्थकामौ । लोकविद्विष्टञ्च धर्ममपि ।
पर्वसु शान्तिहोमं कुर्य्यात् । न तृणमपि च्छिन्द्यात् ।
अलङ्कृतश्च तिष्ठेत् । एवमाचारसेवी स्यात् ॥

श्रुतिस्मृत्युदितं सम्यक्साधुभिश्च निषेवितम् ।
तमाचारं निषेवेत धर्मकामो जितेन्द्रियः ॥

आचाराल्लभते चायुराचारादीप्सितां गतिम् ।
आचाराद्धनमक्षय्यमाचाद्धन्त्यलक्षणम् ॥

सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः ।
श्रद्धधानोऽनसूयश्च शतं वर्षाणि जीवति ॥

इति वैष्णवे धर्मशास्त्रे एकसप्ततितमोऽध्यायः ॥

.........

## ॥ अथ द्विसप्ततितमोऽध्यायः ॥

दमयमेन तिष्ठेत् ।

दमश्चेन्द्रियाणां प्रकीर्त्तितः दान्तस्यालं लोकः परश्च ।
नादान्तस्य क्रिया काचित् समृध्यति ॥

दमः पवित्रं परमं मङ्गल्यं परमं दमः ।
दमेन सर्वमाप्नोति यत्किञ्चिन्मनसेच्छति ॥

दशार्द्धयुक्तेन रथेन याति मनोवशेनार्य्यपथानुवर्त्तिना ।
तञ्चेद्रथं नापहरन्ति वाजिनस्तथागतं नावजयन्ति शत्रवः ॥

आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥

इति वैष्णवे धर्मशास्त्रे द्विसप्ततितमोऽध्यायः ॥

—❀❀❀—

## ॥ अथ त्रिसप्ततितमोऽध्यायः ॥

अथ श्राद्धेप्सुः पूर्वेद्युर्ब्राह्मणानामन्त्रयेत् ।

द्वितीयेऽह्निशुक्लपक्षस्य पूर्वाह्णे कृष्णपक्षस्यापराह्णे विप्रान्-

सुस्नातान् स्वाचान्तान् यथाभूयो विद्याक्रमेण कुशोत्तरेष्वासनेषूपवेशयेत् ।
द्वौ दैवे प्राङ्मुखौ त्रींश्च पित्र्ये उदङ्मुखान् एकैकमुभयत्र वेति ।
आमश्राद्धेषु काम्येषु च प्रथम पञ्चकेनाग्निं हुत्वा ।
पशुश्राद्धेषु मध्यमपञ्चकेन । अमावास्यासूत्तमपञ्चकेन ।
आग्रहायण्या उर्द्ध्वं कृष्णाष्टकासु च क्रमेणैव प्रथममध्यमोत्तमपञ्चकैः । अन्वष्टकासु च ।
ततोब्राह्मणानुज्ञातः पितॄनावाहयेत् ।
अपयान्त्वसुरा इति श्राद्धविघ्नकर्त्तॄन् ।
यातुधानानपसार्य्य तिलैर्यातुधानानां विसर्जनं कृत्वा ।
एत पितरः सर्व्वांस्तान् श्रमाय सन्त्वेतद्वः पितर इत्यावाहनंकृत्वा कुश तिलमिश्रेण गन्धोदकेन यस्तिष्ठन्त्यमृतागाविति-यन्मेमातेति च पाद्यं निर्वर्त्य निवेद्यार्घ्यं कृत्वा निवेद्य-चानुलेपनं कृत्वा कुशातिलवस्त्रपुष्पालङ्कारधूपदीपैर्यथाशक्त्या-विप्रान् समभ्यर्च्च वृतष्टुत्मन्द्रमादायादित्यारुद्रावसव इति-बीक्ष्याग्नौ करवाणीत्युक्त्वा तत्र विप्रैः कुर्वित्युक्ते आहुतित्रयं-दद्यात् । ये मामकाः पितर एतद्वः पितरोऽयं यज्ञ इति च-हविरनुमन्त्रणं कृत्वा यथोपपन्नेषु पात्रेषु विशेषाद्रजतमयेष्वन्नं-नमो विश्वेभ्यो देवेभ्य इत्यन्नमादौ प्राङ्मुखयोर्निवेदयेत् ।
पित्रे पितामहाय प्रपितामहाय च नामगोत्राभ्यामुदङ्मुखेषु ।
तद्दत्सु ब्राह्मणेषु यन्मे प्रकामा अहोरात्रैर्यद्वाक्रव्यादिति जपेत् ।
इतिहासपुराणधर्मशास्त्राणि चेति ।

उच्छिष्टसन्निधौ दक्षिणाग्रेषु दर्भेषु पृथिवी दर्व्वी रक्षिता-
इत्येकं पिण्डं पित्रे निदध्यात्।
अन्तरीक्षं दर्व्वी रक्षिता इति द्वितीयं पितामहाय।
द्यौर्दर्व्वी रक्षिता इति तृतीयं प्रपितामहाय।
अत्र पितरः प्रेता इति वासोदेयम्।
वीरान्नः पितरो धत्त इत्यन्नम्।
अत्र पितरो मादयध्वं यथाभागमावृषा यध्वमिति-
दर्भमूले करघर्षणम्।
उर्ज्जं वहन्तीरित्यनेन सोदकेन प्रदक्षिणं पिण्डानां विकरणं-
सेचनं कृत्वा अर्घपुष्पधूपालेपनान्नादिभक्ष्यभोज्यानि च-
निवेदयेत्। उदकपात्रञ्च मधुघृततिलैः संयुक्तञ्च।
भुक्तवत्सु ब्राह्मणेषु तृप्तिमागतेषु मामेश्रेष्ठेत्यन्नं सतृण-
मभ्युक्ष्यान्नविकिरमुच्छिष्टाग्रतः कृत्वा तृप्ताभवन्तः सम्पन्न-
मिति पृष्ट्वोदङ्मुखेष्वाचमनमादौ दत्त्वा ततः प्राङ्मुखेषु दत्त्वा-
ततश्च सुसुप्रोक्षितमिति श्राद्धदेशं संप्रोक्ष्य दर्भपाणिः सर्व्वं-
कुर्य्यात्। ततः प्राङ्मुखाग्रतोयन्मे नाम इति प्रदक्षिणं कृत्वा-
प्रत्येत्य च यथाशक्ति दक्षिणाभिः समभ्यर्च्याभिरमन्तु-
भवन्त इत्युक्त्वा तैरुक्तोऽभिरताः स्म इति देवाश्च पितरश्चेत्यभि-
जपेत्। अक्षय्योदकञ्च नामगोत्राभ्यां दत्त्वा विश्वे देवाः-
प्रीयन्तामिति प्राङ्मुखेभ्यस्ततः प्राञ्जलिरिदं तन्मनाः सुमना-
याचेत। दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च।
श्रद्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति।

तथास्त्विति ब्रूयुः ।　अन्नञ्च नोबहु भवेदतिथींश्च लभेमहि ।
याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ।
इत्येताभ्यामाशिषः प्रतिगृह्य ।
वाजेवाजे इति ततो ब्राह्मणांश्च विसर्जयेत् ।
पूजयित्वा यथान्यायमनुव्रज्याभिवाद्य च ॥

इति वैष्णवे धर्मशास्त्रे त्रिसप्ततितमोऽध्यायः ॥

---

## ॥ अथ चतुःसप्ततितमोऽध्यायः ॥

अष्टकासु दैवपूर्वं शाकमांसापूपैः श्राद्धं त्वन्वष्टकास्वष्टकावद्धुत्वा दैवपूर्वमेवं हुत्वा मात्रे पितामह्यै प्रपितामह्यै च पूर्ववद्ब्राह्मणान् भोजयित्वा दक्षिणाभिश्चाभ्यर्च्यानुव्रज्य विसर्जयेत् ।
ततः कर्षूः कुर्य्यात् ।
तन्मूले प्रागुदगग्न्युपसमाधानं कृत्वा पिण्डनिर्वपणम् ।
कर्षूत्रयमूले पुरुषाणां कर्षत्रयमूले स्त्रीणाम् ।
पुरुषकर्षत्रयं सान्नेनोदकेन पूरयेत् ।
स्त्रीकर्षूत्रयं सान्नेन पयसा ।
दध्ना मांसेन पयसा च प्रत्येकं कर्षत्रयं पूरयित्वा-
जपेद्भवतीभ्योऽस्तु चाक्षरम् ।

इति वैष्णवे धर्मशास्त्रे चतुःसप्ततितमोऽध्यायः ॥

—०❀०—

॥ अथ पञ्चसप्ततितमोऽध्यायः ॥

पितरि जीवति यः श्राद्धं कुर्य्यात् स येषां पिता कुर्य्यात्तेषां-कुर्य्यात्। पितरि पितामहे च जीवति येषां पितामहः-कुर्य्यात्तेषां कुर्य्यात्।

त्रिषु जीवत्सु नैव कुर्य्यात्।

यस्य पिता प्रेतः स्यात् सपित्रे पिण्डं निधाय-प्रपितामहात् परं द्वाभ्यां दद्यात्।

यस्य पिता पितामहश्च प्रेतौ स्यातां स ताभ्यां पिण्डौ दत्त्वा-पितामहपितामहाय दद्यात्।

यस्य पितामहः प्रेतः स्यात् स तस्मै पिण्डं निधाय प्रपिता-महात्परं द्वाभ्यां दद्यात्।

यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स पित्रे पिण्डं निधाय-पितामहात् परं द्वाभ्यां दद्यात्।

मातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः।
मन्त्रोहेण यथान्यायं शेषाणां मन्त्रवर्जितम् ॥

इति वैष्णवे धर्मशास्त्रे पञ्चसप्ततितमोऽध्यायः ॥

॥ अथ षट्सप्ततितमोऽध्यायः ॥

अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टका माघी प्रौष्ठपद्यूर्द्ध्व-कृष्णत्रयोदशी व्रीहियवपाकौ चेति।

एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणोनरकं प्रतिपद्यते ॥

इति वैष्णवे धर्मशास्त्रे षट्सप्ततितमोऽध्यायः ॥

.........

## ॥ अथ सप्तसप्ततितमोऽध्यायः

आदित्यसंक्रमणं विषुवद्वयं विशेषेणायनद्वयं-
व्यतीपातोजन्मर्क्षमभ्युदयश्च ।
एतांस्तु श्राद्धकालान् वै काम्यानाह प्रजापतिः ।
श्राद्धमेतेषु यद्दत्तं तदानन्त्याय कल्पते ।

सन्ध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः ।
तयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनम् ॥
राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम् ।
गुणवत् सर्वकामीयं पितॄणामुपतिष्ठते ॥

इति वैष्णवे धर्मशास्त्रे सप्तसप्ततितमोऽध्यायः ॥

ooooo

## ॥ अथ अष्टसप्ततितमोऽध्यायः ॥

सततमादित्येऽह्नि श्राद्धं कुर्वन्नारोग्यमाप्नोति ।
सौभाग्यं चान्द्रे । समरविजयं कौजे ।

सर्व्वान् कामान् बौधे। विद्यामभीष्टां जीवे।
धनं शौक्रे जीवितं शनैश्चरे। स्वर्गं कृत्तिकासु।
अपत्यं रोहिणीषु। ब्रह्मवर्च्चस्यं सौम्ये कर्मसिद्धिं रौद्रे।
भुवं पुनर्वसौ पुष्टिं पुष्ये। श्रियं सर्पे।
सर्व्वान् कामान् पैत्रे। सौभाग्यं भाग्ये।
धनमार्य्यमणे। ज्ञातिश्रैष्ठं हस्ते। रूपवतः सुतां त्वाष्ट्रे।
वाणिज्यसिद्धिं स्वातौ। कनकं विशाखासु।
मित्राणि मैत्रे। राज्यं शाक्रे। कृषिं मूले।
समुद्रयानसिद्धिमाप्ये। सर्वान् कामान् वैश्वदेवे।
श्रैष्ठमभिजिति। सर्व्वान् कामान् श्रवणे। लवणं वासवे।
आरोग्यं वारुणे। कुप्यद्रव्यमाजे। गृहमाहिर्व्रध्ने।
गाः पौष्णे। तुरङ्गमाश्विने। जीवितं याम्ये।
गृहसुरूपाः स्त्रियः प्रतिपदि। कन्यां वरदां द्वितीयायाम्।
सर्व्वान् कामांस्तृतीयायाम्। पशुंश्चतुर्थ्याम्।
श्रियं पञ्चम्याम्। द्यूत विषयं षष्ठ्याम्। कृषिं सप्तम्याम्।
वाणिज्यमष्टम्याम्। पशून्नवम्याम् वाजिनो दशम्याम्।
ब्रह्मवर्च्चस्विनः पुत्रानेकादश्याम्।
आयुर्वसुराज्यजयान् द्वादश्याम्। सौभाग्यं त्रयोदश्याम्।
सर्वकामान् पञ्चदश्याम् शस्त्रहतानाम्।
श्राद्धकर्मणि चतुर्द्दशी शस्ता।
अपि पितृगीते गाथे भवतः।

अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ।
प्रावृट्काले ऽसिते पक्षे त्रयोदश्यां समाहितः ॥
मधूत्कटेन यः श्राद्धं पायसेन समाचरेत् ।
कार्त्तिकं सकलं मासं प्राक्छाये कुञ्जरस्य च ॥

इति वैष्णवे धर्मशास्त्रे अष्टसप्ततितमोऽध्यायः ॥

—❀❀❀—

## ॥ अथ एकोनाशीतितमोऽध्यायः ॥

अथ न नक्तं गृहीतेनोदकेन श्राद्धं कुर्य्यात् ।
कुशाभावे कुशस्थाने काशान् दुर्वां वा दद्यात् ।
वाससोऽर्थेकार्पासोत्थं सूत्रम् ।
दशां विवर्जयेद् यद्यप्याहतवस्त्रजा स्यात् ।
उग्रगन्धीन्यगन्धीनि कण्टकिजातानि रक्तानि च पुष्पाणि ।
शुक्लानि सुगन्धीनि कण्टकिजातान्यपि जलजानि रक्तान्यपि-
दद्यात् ।　वसां मेदश्च दीपार्थे न दद्यात् ।
घृतं तैलं वा दद्यात् ।　जीवजं सर्वधूपार्थे न दद्यात् ।
मधुघृतसंयुक्तं गुग्गुलुं दद्यात् ।
चन्दनकुङ्कुमकर्पूरागुरुपद्मकान्यनुलेपनार्थे ।
न प्रत्यक्षलवणं दद्यात् हस्तेन च घृतव्यञ्जनादि ।
तैजसानि पात्राणि दद्यात् ।　विशेषतो राजतानि ।

खड्गकुतपकृष्णाजिनतिलसिद्धार्थकाक्षतानि न पवित्राणि-
रक्षोघ्नानि चेति दद्यात् ।
पिप्पलीमुकुन्दकभूस्तृणशिग्रुसर्षपसुरसासर्जकसुवर्चलकुष्माण्डा-
लावुवार्त्ताकुपालङ्क्यपोपोढ़कीतण्डुलीयककुसूम्भपिण्डालुक-
महिषीक्षीराणि वर्जयेत् ।
राजमाषमसूरपर्य्युषितकृतलवणानि च ।
कोपं परिहरेत् । नाश्रुपातयेत् । न त्वरां कुर्य्यात् ।
घृतादिदाने तैजसानि पात्राणि खड्गपात्राणि फल्गुपात्राणि च
प्रशस्तानि । अत्र च श्लोको भवति ।

सौवर्णराजताभ्याञ्च खड्गेनौडुम्बरेण च ।
दत्त मक्षय्यतां याति फल्गुपात्रेण चाप्यथ ॥

इति वैष्णवे धर्मशास्त्रे एकोनाशीतितमोऽध्यायः ॥

---

## ॥ अथाशीतितमोऽध्यायः ॥

तिलैर्व्रीहियवैर्माषैर्मूलफलैः शाकैः श्यामाकैः-
प्रियङ्गुभिर्नीवारैर्मुद्गैर्गोधूमैश्च मासं प्रीयन्ते ।
द्वौ मासौ मत्स्यमांसेन । त्रीन्हारिणेन ।
चतुरश्चौरभ्रेण पञ्च शाकुनेन । षट्छागेन । सप्त रौरवेण ।
अष्टौ पार्षतेन । नव गवयेन । दश माहिषेण ।
एकादश कौर्मेण । सम्वत्सरं गव्येन पयसा तद्विकारैर्व्वा ।
अत्र पितृगीता गाथा भवति ॥

कालशाकं महाशल्कं मांसं वाध्रीणसस्य च ।
विषाणवर्ज्या ये खड्गास्तांस्तु भक्षामहे सदा ॥

इति वैष्णवे धर्मशास्त्रे ऽशीतितमोऽध्यायः ॥

---

॥ अथ एकाशीतितमोऽध्यायः ॥

चान्नमासनमारोपयेत् ।　न पदा स्पृशेत ।
उच्छेषणं भूमिगतमजिह्मस्याशठस्य वा ।
दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते ।

इति वैष्णवे धर्मशास्त्रे एकाशीतितमोऽध्यायः ॥

---

॥ अथ द्व्यशीतितमोऽध्यायः ॥

दैवे कर्म्मणि ब्राह्मणं न परीक्षेत । प्रयत्नात् पित्र्ये परीक्षेत ।
हीनाधिकाङ्गान् वियर्जयेत् ।

विकर्म्मस्थांश्च वैड़ालव्रतिकान् वृथालिङ्गिनो नक्षत्रजीविनो-
देवलकांश्च चिकित्सकान् अनूढ़ापुत्रान् तत्पुत्रान् बहुयाजिनो-
ग्रामयाजिनः शूद्रयाजिनोऽयाज्ययाजिनो व्रात्यांस्तथा-
जिनः पर्वकारान् सूचकान् भृतकाध्यापकान् भृतकाध्यापितान्-
शूद्रान्नपुष्टान् पतितसंसर्गान् अनधीयानान् सन्ध्योपासना-

ननुष्ठान् राजसेवकान् नग्नान् पितृमातृगुर्वग्निस्वाध्याय-त्यागिनश्चेति ॥

ब्राह्मणापसदा ह्येते कथिताः पङ्क्तिदूषकाः।
एतान् विवर्जयच्छेषाच्छ्राद्धकर्म्मणि पण्डितः ॥

इति वैष्णवे धर्म्मशास्त्रे द्व्यशीतितमोऽध्यायः ॥

---

॥ अथ त्र्यशीतितमोऽध्यायः ॥

अथ पङ्क्तिपावनाः।

त्रिणाचिकेतः पञ्चाग्निर्ज्येष्ठसामगो वेदपारगो वेदाङ्गस्याप्येकस्य पारगः पुराणेतिहासव्याकरणपारगो धर्म्मशास्त्रस्याप्येकस्य पारगस्तीर्थपूतो यज्ञपूत स्तपःपूतः सत्यपूतो-मन्त्रपूतो गायत्रीजपनिरतो ब्रह्मदेयानुसन्तानस्त्रिसुपर्णो-जामाता दौहित्रश्चेति।

विशेषेण च योगिनः। अत्र पितृगीता गाथा भवति ॥

अपे स स्यात् कुलेऽस्माकं भोजयेद्यस्तु योगिनम्।
विप्रं श्राद्धे प्रयत्नेन येन तृप्यामहे वयम् ॥

इति वैष्णवे धर्म्मशास्त्रे त्र्यशीतितमोऽध्यायः ॥

॥ अथ चतुरशीतितमोध्यायः ॥

न म्लेच्छविषये श्राद्धं कुर्य्यात् । न गच्छेत्म्लेच्छविषयम् । परनिपानेष्वपः प्रीत्वा तत्साम्यमुपगच्छीति ॥

चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते ।
स म्लेच्छदेशो विज्ञेय आर्य्यावर्त्तस्ततः परः ॥

इति वैष्णवे धर्म्मशास्त्रे चतुरशीतितमोऽध्यायः ॥

---

॥ अथ पञ्चाशीतितमोऽध्यायः ॥

अथ पुष्करेषु श्राद्धम् ।

जप्यहोमतपांसि च ।

पुष्करे स्नानमात्रतः सर्वपापेभ्यः पूतो भवति ।

एवमेव गयाशीर्षे अक्षयवटे अमरकण्टकपर्वते वराह्पर्वते यत्र क्वचन नर्म्मदातीरे यमुनातीरे गङ्गायां-विशेषतः कुशावर्त्ते विल्वके नीलपर्वते कनखले कुजाम्रे-भृगुतुङ्गे केदारे महालये नडन्तिकायां सुगन्धायां-शाकम्भर्य्यां फल्गुतीर्थे महागङ्गायां त्रिहलिकाश्रमे-कुमारधारायां प्रभासे यत्र क्वचन सरस्वत्यां विशेषतः ।

गङ्गाद्वारे प्रयागे च सङ्गासागरसङ्गमे ।
सततं नैमिषारण्ये वाराणस्यां विशेषतः ॥

अगस्त्याश्रमे कण्वाश्रमे कौशिक्यां सरयूतीरे शोणस्य-

ज्योतिषायाञ्च सङ्गमे श्रीपर्वते कालोदके उत्तरमानसे-
वड़वायां मतङ्गवाप्यां सप्तार्षे विष्णुपदे स्वर्गमार्गपदे-
गोदावर्य्यां गोमत्यां वेत्रवत्यां विपाशायां वितस्तायां-
शतद्रुतीरे चन्द्रभागायां इरावत्यां सिन्धोस्तीरे दक्षिणे-
पञ्चनदे औजसे।

एवमादिष्वथान्येषु तीर्थेषु सरिद्वरासु सर्वेष्वपि-
स्वभावेषु पुलिनेषु प्रस्रवणेषु पर्वतेषु निकुञ्जेषु वनेषू-
पवनेषु गोमयोपलिप्तेषु मनोज्ञेषु।

अत्र च पितृगीता गाथा भवन्ति॥

कुलेऽस्माकं स जन्तुः स्याद्यो नो दद्याज्जलाञ्जलीन्।
नदीषु बहुतोयासु शीतलासु विशेषतः॥
अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः।
गयाशीर्षे वटे श्राद्धं यो नः कुर्य्यात् समाहितः॥
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥

इति वैष्णवे धर्म्मशास्त्रे पञ्चाशीतितमोऽध्यायः॥

---

## ॥ अथ षडशीतितमोऽध्यायः॥

अथ वृषोत्सर्गः कार्त्तिक्यमाश्वयुज्यां वा।

तत्रादावेव वृषभं परीक्षेत।

जीवद्वत्सायाः पयस्विन्याः पुत्रं सर्वलक्षणोपेतं नील-

लोहितं वा मुखपुच्छपादशृङ्गशुक्लं यूपस्याच्छादकम्।
ततो गवां मध्ये सुसमिद्धमग्निं परिस्तीर्य्य पौष्णं चरुं
पयसा श्रपयित्वा पूषा गा अन्वेतु न इह रतिरिति च
हुत्वा वृषमयस्कारस्त्वङ्कयेत्।
एकस्मिन् पार्श्वे चक्रेणापरस्मिन् पार्श्वे शूलेन।
अङ्कितञ्च हिरण्यवर्णा इति चतसृभिः शन्नोदेवीति च स्नापयेत्।
स्नातमलङ्कृतं स्नातालङ्कृताभिश्चतसृभिर्वत्सतरीभिः-
सार्द्धमानीय रुद्रान् पुरुषसूक्तं कुष्माण्डीश्च जपेत्।
पिता वत्सेतिवृषभस्य दक्षिणे कर्णे पठेत् इमञ्च।

वृषोहि भगवान् धर्म्मश्चतुष्पादः प्रकीर्त्तितः।
वृणोमि तमहं भक्त्या स मे रक्षतु सर्व्वतः॥
एनं युवानं पतिं वो ददाम्यनेन क्रीड़न्तीश्चरथ प्रियेण।
महामहिप्रजया मातनुभिर्मारधाम द्विषते सोम! राजन्!॥
वृषं वत्सतरीयुक्तमैशान्यां कारयेद्दिशि।
होतुर्वस्त्रयुगं दद्यात् सुवर्णं कांस्यमेव च॥
अयस्कारस्य दातव्यं वेतनं मनसेप्सितम्।
भोजनं बहुसर्पिष्कं ब्राह्मणांश्चात्र भोजयेत्॥
उत्सृष्टो वृषभो यस्मिन् पिवत्यथ जलाशये।
जलाशयं तत्सकलं पितॄंस्तस्योपतिष्ठति॥
शृङ्गेणोल्लिखते भूमिं यत्र क्वचन दर्पितः।
पितॄणामन्नपानं तत् प्रभूतमुपतिष्ठति॥

इति वैष्णवे धर्मशास्त्रे षड़शीतितमोऽध्यायः॥

## ॥ अथ सप्ताशीतितमोऽध्यायः ॥

अथ वैशाख्यां पौर्णमास्यां कृष्णमृगाजिनं सुवर्णशृङ्गं-रौप्यखुरं मौक्तिकलाङ्गूलभूषितं कृत्वा आविके वस्त्रे च प्रसारयेत। ततस्तिलैः प्रच्छादयेत्। सुवर्णनाभिञ्च-कुर्य्यात्। आहतेन वासोयुगेन प्रच्छादयेत्। सर्व्वगन्धरत्नैश्चालङ्कृतं कुर्य्यात्।
चतसृषु दिक्षु चत्वारि तैजसपात्राणि क्षीरदधिमधुघृत-पूर्णानि निधायाहिताग्नये ब्राह्मणायालङ्कृताया-वासोयुगेन प्रच्छादिताय दद्यात्। अत्र च गाथा भवन्ति ॥

यस्तु कृष्णाजिनं दद्यात् सखुरं शृङ्गसंयुतम्।
तिलैः प्रच्छाद्य वासोभिः सर्व्वरत्नैरलङ्कृतम् ॥

ससमुद्रगुहा तेन सशैलवनकानना।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥

कृष्णाजिने तिलान् कृत्वा हिरण्यं मधुसर्पिषी।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥

इति वैष्णवे धर्मशास्त्रे सप्ताशीतितमोऽध्यायः ॥

—:००:—

## ॥ अथाष्टाशीतितमोऽध्यायः ॥

अथ प्रसूयमाना गौः पृथिवी भवति तामलङ्कृतां-ब्राह्मणाय दत्त्वा पृथिवीदानफलमाप्नोति ।

अत्र च गाथा भवति ।

सवत्सा रोमतुल्यानि युगान्युभयतोमुखीम् ।
दत्त्वा स्वर्गमवाप्नोति श्रद्धधानः समाहितः ॥

इति वैष्णवे धर्म्मशास्त्रेऽष्टाशीतितमोऽध्यायः ॥

.........

## ॥ अथ एकोननवतितमोऽध्यायः ॥

मासः कार्त्तिकोऽग्निदैवत्यः । अग्निश्च सर्वदेवानां मुखम् । तस्मात्तु कार्त्तिकं मासं वहिःस्नायी गायत्रीजपनिरतः-सकृदेव हविष्याशी संवत्सरकृतात् पापात् पूतो भवति ।

कार्त्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः ।
जपन् हविष्यभुग्दाता सर्वपापैः प्रमुच्यते ॥

इति वैष्णवे धर्म्मशास्त्रे—एकोननवतितमोऽध्यायः ॥

.........

## ॥ अथ नवतितमोऽध्यायः ॥

मार्गशीर्षशुक्लपक्षदश्यां मृगशिरःसंयुक्तायां चूर्णित लवणस्य-सुवर्णनाभं प्रस्थमेकं चन्द्रोदये ब्राह्मणाय प्रदापयेत् ।

अनेन कर्म्मणा रूपसौभाग्यवानभिजायते।

पौषीचेत् पुष्ययुक्ता स्यात्तस्यां गौरसर्षपकल्कोद्वर्त्तित-शरीरो गव्यघृतपूर्णकुम्भेनाभिषिक्तः सर्व्वौषधिभिः-सर्वगन्धैः सर्ववीजैश्च स्नातो घृतेन भगवन्तं वासुदेवं-स्नापयित्वा गन्धपुष्पधूपदीपनैवेद्यादिभिश्चाभ्यर्च्च्य वैष्णवैः-शाक्रैर्वार्हस्पत्यैश्च मन्त्रैः पावके हुत्वा ससुवर्णेन घृतेन-ब्राह्मणान् स्वस्ति वाचयेत्।

वासोयुगं कर्त्रे दद्यात्। अनेन कर्म्मणा पुष्यते।

माघी मघायुता चेत्तस्यां तिलैः श्राद्धं कृत्वा पूतो भवति।

फाल्गुनी फल्गुनीयुता चेत्स्यात्तस्यां ब्राह्मणाय सुसंस्कृतं-स्वास्तीर्णं शयनं निवेद्य भार्य्यां मनोज्ञां रूपवतीं द्रविण-वतीञ्चाप्नोति। नार्य्यपि भर्त्तारम्।

चैत्री चित्रायुता स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति।

वैशाखी विशाखायुता चेत्तस्यां ब्राह्मणसप्तकं क्षौद्रयुक्तैस्तिलैः-सन्तर्प्य धर्मराजानं प्रीणयित्वा पापेभ्यः पूतो भवति।

ज्यैष्ठी ज्येष्ठायुता चेत्तस्यां छत्रोपानह्प्रदानेन गवाधिपत्यं-प्राप्नोति। आषाढ्यामाषाढायुक्तायामन्नपानदानेन-तदेवाक्षय्यमाप्नोति।

श्रावण्यां श्रवणयुक्तायां जलधेनुं सान्नां वासोयुगाच्छादितां-दत्त्वा स्वर्गमाप्नोति।

प्रौष्ठपद्यां प्रौष्ठपदायुक्तायां गोदानेन सर्वपापविनिर्मुक्तो भवति।

आश्वयुज्यामश्विनीगते चन्द्रमसि घृतपूर्णं भाजनं सुवर्णयुतं-

विप्राय दत्त्वा दीप्ताग्निर्भवति ।

कार्त्तिकी कृत्तिकायुता चेत्तस्यां सितमुक्षाणमन्यवर्णं वा शशाङ्कोदये सर्वशस्यरत्नगन्धोपेतं दीपमध्ये ब्राह्मणाय दत्त्वा कान्तारभयं नश्यति ।

वैशाखशुक्लतृतीयायामुपोषितोऽक्षतैर्वासुदेवमभ्यर्च्य तानेव हुत्वा दत्त्वा च सर्वपापेभ्यः पूतो भवति ।

यच्च तस्मिन्नहनि प्रयच्छति तदक्षय्यमाप्नोति ।

पौष्यां समतीतायां कृष्णपक्षद्वादश्यां सोपवासस्तिलैः स्नातस्तिलोदकं दत्त्वा तिलैर्वासुदेवमभ्यर्च्य तानेव हुत्वा दत्त्वा भुक्त्वा च पापेभ्यः पूतो भवति ।

माघ्यां समतीतायां कृष्णद्वादश्यां सोपवासः श्रवणं प्राप्य वासुदेवाग्रतोमहावर्त्तिद्वयेन दीपद्वयं दद्यात् ।

दक्षिणपार्श्वे महारजनरक्तेन समग्रेण वाससा घृततुलामष्टाधिकां दत्त्वा वामपार्श्वे तिलतैलतुलां साष्टां दत्त्वा श्वेतेन समग्रेण वाससा ।

एतत्कृत्वा कृतकृत्यो यस्मिन् राष्ट्रेऽभिजायते यस्मिन् देशे यस्मिन् कुले स तत्रोज्ज्वलो भवति ।

आश्विनं सकलं मासं ब्राह्मणेभ्यः प्रत्यहं घृतं प्रदद्याश्विनौ प्रीणयित्वा रूप भाग्भवति ।

तस्मिन्नेव मासि प्रत्यहं गोरसैर्ब्राह्मणान् भोजयित्वा राज्यभाग्भवति ।

प्रतिमासं रेवतीयुते चन्द्रमसि मधुघृतयुतं रेवतीप्रीत्यै

परमान्नं ब्राह्मणान् भोजयित्वा रेवतीं प्रीणयित्वा रूपभाग्भवति।

माघे मासेऽग्निं प्रत्यहं तिलैर्हुत्वा सघृतं कुल्माषं ब्राह्मणान् भोजयित्वा दीप्ताग्निर्भवति।

सर्व्वां चतुर्द्दशीं नदीजले स्नात्वा धर्मराजानं पूजयित्वा सर्व्वपापेभ्यः पूतो भवति।

यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपगान्।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥

इति वैष्णवे धर्मशास्त्रे नवतितमोऽध्यायः॥

---

## ॥ अथ एकनवतितमोऽध्यायः ॥

अथ कूपकर्त्तुस्तत्प्रवृत्ते पानीये दुष्कृतस्यार्द्धं विनश्यति।

तड़ागकृन्नित्यतृप्तो वारुणं लोकमश्नुते।

जलप्रदः सदा तृप्तो भवति।

वृक्षारोपयितुर्वृक्षाः परलोके पुत्रा भवन्ति।

वृक्षप्रदो वृक्षप्रसूनैर्देवान् प्रीणयति फलैश्चातिथीन् छायया-चाभ्यागतान् देवे वर्षत्युदकेन पितॄन्।

सेतुकृत् स्वर्गमाप्नोति देवायतनकारुर्यस्य देवायतनं करोति-तस्यैव लोकमाप्नोति।

सुधासिक्तं कृत्वा यशसा विराजते।

विविक्तं कृत्वा गन्धर्वलोकमाप्नोति।
पुष्पप्रदानेन श्रीमान् भवति।
अनुलेपनप्रदानेन कीर्त्तिमान् भवति।
दीपप्रदानेन चक्षुष्मान् सर्वतोज्वलश्च।
अन्नप्रदानेन बलवान्। धूपप्रदानेनोद्र्ध्वं गच्छति।
देवनिर्म्माल्यापनयनाद्गोप्रदानफलमाप्नोति।
देवायतनमार्जनात्तदुपलेपनाद्ब्राह्मणोच्छिष्टमार्जनात्
पादादिशौचोदकल्पपरिचरणाच्च॥

कूपारामतड़ागेषु देवतायतनेषु च।
पुनः संस्कारकर्त्ता च लभते मौलिकं फलम्॥

इति वैष्णवे धर्मशास्त्रे एकनवतितमोऽध्यायः॥

---

॥ अथ द्विनवतितमोऽध्यायः॥

सर्वदानाधिकमभयप्रदानम्।
तत्प्रदानेनाभीप्सितं लोकमाप्नोति भूमिप्रदानेन च।
गोचर्म्ममात्रमपि भुवं प्रदाय सर्वपापेभ्यः पूतो भवति।
गोप्रदानेन स्वर्गलोकमाप्नोति। दशधेनुप्रदो गोलोकान्।
शतधेनुप्रदो ब्रह्मलोकान्।
सुवर्णशृङ्गीं रौप्यखुरां मुक्तालाङ्गुलां कांस्योपदोहां वस्त्रोत्तरीयां
दत्त्वा धेनुरोमसंख्यानि वर्षाणि स्वर्गलोकमाप्नोति।

विशेषतः कपिलाम्। दान्तं धुरन्धरं दत्त्वा दशधेनुप्रदो भवति।
अश्वदः सूर्यसालोक्यमाप्नोति। वासोदश्चन्द्रसालोक्यम्।
सुवर्णदानेनाग्निसालोक्यम्। रूप्यप्रदानेन रूप्यम्।
तैजसानां पात्राणां प्रदानेन पात्रं भवेत्
सर्वकामानामौषधप्रदानेन च।
लवणप्रदानेन च लावण्यम्।
धान्यप्रदानेन तृप्तिं शस्यप्रदानेन च।
अन्नदः सर्वम्। धान्यप्रदानेन सौभाग्यम्।
अकीर्त्तितानामन्येषां दानात् स्वर्गमवाप्नुयादिति।
तिलप्रदः प्रजामिष्टां इन्धनप्रदानेन दीप्ताग्निर्भवति।
आसनप्रदानेन स्थानम्। शय्याप्रदानेन भार्य्याम्।
उपानत्प्रदानेनाश्वतरीयुक्तं रथम्। छत्रप्रदानेन स्वर्गम्।
तालवृन्तचामरप्रदानेनाध्वसुखित्वम्।
वास्तुप्रदानेन नगराधिपत्यम्॥

यद्यदिष्टतमं लोके यच्चास्ति दयितं गृहे।
तत्तद्गुणवते देयं तदेवाक्षय्यमिच्छता॥

इति वैष्णवे धर्मशास्त्रे त्रयोदशोऽध्यायः॥

---

अब्राह्मणे दत्तं तत्सममेव पारलौकिकम् ।
द्विगुणं ब्राह्मणब्रुवे । सहस्रगुणं प्राधीते ।
अनन्तं वेदपारगे । पुरोहितस्त्वात्मन एव पात्रम् ।
स्वसा दुहिता जामातरश्च पात्रम् ॥

न वार्य्यपि प्रयच्छेत वैड़ालव्रतिके द्विजे ।
न वकव्रतिके पापे नावेदविदि धर्मवित् ॥
धर्मध्वजी सदालुब्धश्छाद्मिको लोकदाम्भिकः ।
वैडालव्रतिको ज्ञेयो हिंस्रः सर्व्वाभिसन्धिकः ॥
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च वकव्रतपरो द्विजः ॥
ये वकव्रतिनो लोके ये च मार्जारलिङ्गिनः ।
ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा ॥
न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ।
व्रतेन पापं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदम्भनम् ॥
प्रेत्येह चेदृशो विप्रो गृह्यते ब्रह्मवादिभिः ।
छद्मनाचरितं यच्च तद्वै रक्षांसि गच्छति ॥
अलिङ्गी लिङ्गिवेशेन यो वृत्तिमुपजीवति ।
स लिङ्गिनाहरत्येनस्तिर्य्यग्योनौ प्रजायते ॥
न दानं यशसे दद्यान्न भयान्नोपकारिणे ।
न नृत्यगीतशीलेभ्यो धर्मार्थमिति निश्चितम् ॥

इति वैष्णवे धर्मशास्त्रे त्रिनवतितमोऽध्यायः ॥

.........

## ॥ अथ चतुर्नवतितमोऽध्यायः ॥

गृही वलीपलितदर्शने वनाश्रयो भवेत् ।

अपत्यस्य चापत्यदर्शनेन वा ।

पुत्रेषु भार्य्यां निक्षिप्य तयानुगम्यमानो वा ।

तत्राप्यग्नीनुपचरेत् । अफालकृष्णेन पञ्चयज्ञान्न हापयेत् ।

स्वाध्यायं च न जह्यात् । ब्रह्मचर्य्यं पालयेत् ।

चर्म्मचीरवासाः स्यात् । जटाश्मश्रुलोमनखांश्च बिभृयात् ।

त्रिषवणस्नायी स्यात् ।

कपोतवृत्तिर्मासनिचयः सम्वत्सरनिचयो वा ।

सम्वत्सरनिचयो पूर्वनिचितमाश्वयुज्यां जह्यात् ॥

ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् ।
पुटेनैव पलाशेन पाणिना शकलेन वा ॥

॥इति वैष्णवे धर्मशास्त्रे चतुर्नवतितमोऽध्यायः॥

## ॥ अथ पञ्चनवतितमोऽध्यायः ॥

वानप्रस्थस्तपसा शरीरं शोषयेत् । ग्रीष्मे पञ्चतपाः स्यात् ।

आकाशशायी प्रावृषि । आर्द्रवासा हेमन्ते ।

नक्ताशी स्यात् । एकान्तरद्व्यन्तरत्र्यन्तराशी वा स्यात् ।

पुष्पाशी । फलाशी । शाकाशी । पर्णाशी । मूलाशी ।

यवान्नं पक्षान्तयोर्व्वा सकृदश्नीयात् । चान्द्रायणैर्वा वर्त्तेत ।
अश्मकुट्टः । दन्तोलूखलिको वा ॥

तपोमूलमिदं सर्वं दैवमानुषजं जगत् ।
तपोमध्यं तपोऽन्तञ्च तपसा च तथावृतम् ॥
यद्दुश्चरं यद्दुरापं यद्दूरं यच्च दुष्करम् ।
सर्वं तत्तपसा साध्यं तपोहि दुरतिक्रमम् ॥

इति वैष्णवे धर्मशास्त्रे पञ्चनवतितमोऽध्यायः ॥

अथ त्रिष्वाश्रमेषु पक्वकषायः प्राजापत्यामिष्टिं कृत्वा सर्वं वेदं दक्षिणां दत्त्वा प्रव्रज्याश्रमी स्यात् ।
आत्मन्यग्नीनारोप्य भिक्षार्थं ग्राममियात् ।
सप्तागारिकं भैक्ष्यमादद्यात् । अलाभे न व्यथेत ।
न भिक्षुकं भिक्षेत ।
भुक्तवति जनेऽतीते पात्रसम्पाते भैक्ष्यमादद्यात् ।
मृण्मये दारुपात्रेऽलावपात्रे वा ।
तेषाञ्च तस्याद्भिः शुद्धिः स्यात् ।
अभिपूजितलाभादुद्विजेत । शून्यागारनिकेतनः स्यात् ।
वृक्षमूलनिकेतनो वा । न ग्रामे द्वितीयां रात्रिमावसेत् ।
कौपीनाच्छादनमात्रमेव वसनमाददात् ।
दृष्टिपूतं न्यसेत् पादम् । वस्त्रपूतं जलमाददात् ।

सत्यपूतं वदेत्। मनःपूतं समाचरेत्।
मरणं नाभिकामयेत जीवितञ्च। अतिवादांस्तितिक्षेत।
न कञ्चनावमन्येत। निराशीः स्यात्। निर्नमस्कारः॥

वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः।
नाकल्याणं च कल्याणं तयोरपि च चिन्तयेत्॥

प्राणायामधारणाध्याननित्यः स्यात्।
संसारस्यानित्यतां पश्येत्। शरीरस्याशुचिभावम्।
जरया रूपविपर्य्ययम्।
शारीरमानसागन्तुकव्याधिभिश्चोपतापम्। सहजैश्च।
नित्यान्धकारे गर्भे वसतिं मूत्रपुरीषमध्ये च।
तत्र च शीतोष्णदुःखानुभवनम्।
जन्मसमये योनिसङ्कटनिर्गमान्महद्दुखानुभवनम्।
बाल्ये मोहं गुरुपरवश्यताम्। अध्ययनादनेकक्लेशम्।
यौवने च विषयप्राप्तावमार्गेण तदवाप्तौ
विषयसेवनान्नरके पतनम्।
अप्रियैर्वसतिं प्रियैश्च विप्रयोगम्।
नरकेषु च सुमहद्दुःखम्। संसारसंसृतौ तिर्य्यग्योनिषु च।
एवमस्मिन् सततपापिनि संसारे न किञ्चित्।
यदपि किञ्चिद्दुःखापेक्षया सुखसंज्ञं तदप्यनित्यम्।
तत्सेवाशक्तावलाभेनवा महद्दुःखम्।
शरीरं चेदं सप्तधातुकं पश्येत् वसारुधिरमांसास्थिमेदोमज्जा-

शुक्रात्मकं चर्म्मावनद्धं दुर्गन्धि च मलायतनं सुखशतैरपि वृत्तं विकारि प्रयत्नाद् धृतमपि विनाशि कामक्रोधलोभमोहमद-मात्सर्य्यस्थानं पृथिव्यप्तेजोवाय्वाकाशात्मकं अस्थिशिरा-धमनिश्नायुयुतं रजस्वलं षट् त्वक्पेशि अस्थ्नां त्रिभिः शतैः षष्ठ्यधिकैर्धार्य्यमाणम् । तेषां विभागः ।

सूक्ष्मैः सह चतुःषष्टिर्दशनाः, विंशतिर्नखाः,
पाणिपादशलाकाश्च, षष्टिरङ्गुलीनां पर्व्वाणि, द्वे पार्ष्ण्योः,
चतुष्टयं गुल्फेषु, चत्वार्य्यरत्न्योः, चत्वारि जङ्घयोः, द्वे द्वे,
जानुकपोलयोः द्वे द्वे अक्षतालूषकश्रोणिफलकेषु, भगास्थ्येकं,
पृष्ठास्थि पञ्चचत्वारिंशद्भागं, पञ्चदशास्थीनि ग्रीवा,
जान्वेकं, तथा हनुः, तन्मूले च द्वे, द्वे ललाटाक्षिगण्डे,
नासा घनास्थिका, अर्बुदैः स्थानकैश्च सार्द्धं द्विसप्ततिः
पार्श्वकाः, उरः सप्तदश, द्वौ शङ्खकौ, चत्वारि कपालानि
शिरश्चेति । शरीरेऽस्मिन् सप्तशिराशतानि ।
नव स्नायुशतानि । धमनीशते द्वे । पञ्चपेशीशतानि ।
क्षुद्रधमनीनामेकोनत्रिंशल्लक्षाणि नवशतानि षट्पञ्चाशद्धमन्यः ।
लक्षत्रयं श्मश्रुकेशकूपानाम् । सप्तोत्तरं मर्म्मशतम् ।
सन्धिशते द्वे । चतुःपञ्चाशद्रोमकोटयः सप्तषष्टिश्च लक्षाणि ।
नाभिरोजोगुदं शुक्रं शोणितं शङ्खको मूर्द्धा कण्ठो हृदयञ्चेति
प्राणायतनानि । बाहुद्वयं जङ्घाद्वयं मध्यं शीर्षमिति षडङ्गानि ।
वसा वपा अवहननं नाभिः क्लोमो यकृत् प्लीहा-
क्षुद्रान्त्रं वृक्की वस्तिः पुरीषाधानमामाशयो हृदयं स्थूलान्त्रं-

गुदमुदरं गुदकोष्ठम् । कनीनिके अक्षिकूटे शष्कुली-कर्णौ कर्णपत्रकौ गण्डौ भ्रुवौ शङ्खकौ दन्तवेष्टावोष्ठौ-ककुन्दरे वंक्षणौ वृषणौ वृक्कौ श्लेष्मसङ्घातकौ स्तनौ-उपजिह्वा स्फिचौ बाहू जङ्घे ऊरूपिण्डिके तालूदरं-वस्तिशीर्षौ चिबुकं गलशुण्डिके अवटश्चेत्यस्मिन् शरीरके स्थानानि ।

शब्दस्पर्शरसरूपगन्धाश्च विषयाः ।

नासिकालोचनत्वग्जिह्वाश्रोत्रमिति बुद्धीन्द्रियाणि ।

हस्तौपादौ पायूपस्थं जिह्वेति कर्मेन्द्रियाणि ।

मनोबुद्धिरात्मा चाव्यक्तमितीन्द्रियातीताः ॥

इदं शरीरं वसुधे ! क्षेत्र मित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः ॥
क्षेत्रज्ञमेव मां विद्धि सर्वक्षेत्रेषु भाविनि ! ।
क्षेत्रं क्षेत्रज्ञविज्ञानं ज्ञेयं नित्यं मुमुक्षुणा ॥

इति वैष्णवे धर्म्मशास्त्रे षणनवतितमोऽध्यायः ॥

---

॥ अथ सप्तनवतितमोऽध्यायः ॥

ऊरुस्थोत्तानचरणः सव्ये करे करमितरं न्यस्य तालुस्थाचलजिह्वोदन्तैर्दन्तानसंस्पृशन् स्वनासिकाग्रं पश्यन् दिशश्चानवलोकयन् विभीः प्रशान्तात्मा चतुर्विंशत्या तत्त्वैर्व्यतीतं चिन्तयेत् ।

नित्यमतीन्द्रियमगुणं शब्दस्पर्शरसरूपगन्धातीतं सर्वज्ञमतिस्थूलं सर्वगमतिसूक्ष्मं सर्वतःपाणिपादं सर्वतोऽक्षिशिरोमुखं सर्वतःसर्वेन्द्रियशक्तिम् । एवं ध्यायेत् ।
ध्याननिरतस्य च संवत्सरेण योगाविर्भावो भवति ।
अथ निराकारे लक्षबन्धं कर्त्तुं न शक्नोति तदा-पृथिव्यप्तेजोवाय्वाकाशमतोबुद्ध्यात्माऽव्यक्तपुरुषाणां पूर्वं पूर्वं ध्यात्वा तत्र तत्र लक्षन्तत् परित्यज्यापरमपरं ध्यायेत् ।
एवं पुरुषध्यानमारभेत ।
अत्राप्यसमर्थः स्वहृदयपद्मस्यावाङ्मुखस्य मध्ये दीपवत् पुरुषं ध्यायेत् ।
तत्राप्यसमर्थोभगवन्तं वासुदेवं किरीटिनं कुण्डलिनमङ्गदिनं श्रीवत्साङ्कं वनमालाविभूषितोरस्कं सौम्यरूपं-चतुर्भुजं शङ्खचक्रगदापद्मधरं चरणमध्यगतभुवं ध्यायेत् ।
यद्ध्यायति तदाप्नोति ध्यानगुह्यम् ।
तस्मात् सर्वमेव क्षरं त्यक्त्वा अक्षरमेव ध्यायेत् ।
न च पुरुषं विना किञ्चिदप्यक्षरमस्ति । तं प्राप्य मुक्तो भवति ॥

पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः ।
तस्मात् पुरुष इत्येवं प्रोच्यते तत्त्वचिन्तकैः ॥
प्राग्रात्रापररात्रेषु योगी नित्यमतन्द्रितः ।
ध्यायेत पुरुषं विष्णुं निर्गुणं पञ्चविंशकम् ॥
तत्त्वात्मानमगम्यञ्च सर्वतत्त्वविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणंगुणभोक्तृ च ॥

बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थञ्चान्तिके च तत्॥
अविभक्तञ्च भूतेन विभक्तमिव च स्थितम्।
भूतभव्यभवद्रूपं ग्रसिष्णु प्रभविष्णु च॥
ज्योतिषामपि तज्जोतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्॥
इति क्षेत्रं तथा ज्ञानं रोयञ्चोक्तं समासतः।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते॥

इति वैष्णवे धर्मशास्त्रे सप्तनवतितमोऽध्यायः॥

—:००:—

## ॥ अथ अष्टनवतितमोऽध्यायः ॥

इत्येवमुक्ता वसुमती जानुभ्यां शिरसा च नमस्कारं कृत्वोवाच। भगवंस्त्वत्समीपे सततमेवं चत्वारि महाभूतालयान्याकाशः शङ्खरूपी वायुश्चक्ररूपी तेजश्च गदारूप्यम्भोऽम्भोरुहरूपि अहमप्यनेनैव रूपेण भगवत्पादमध्यपरिवर्त्तिनी भवितु मिच्छामि।

इत्येवमुक्तोभगवांस्थेत्युवाच।

वसुधापि लब्धकामा तथा चक्रे देवदेवञ्च तुष्टाव।

ओं नमस्ते देवदेव वासुदेव आदिदेव कामदेव महीपाल अनादिमध्यनिधन प्रजापते सुप्रजापते महा-

प्रजापते ऊर्ज्जस्पते वाचस्पते जगत्पते दिवस्पते वनस्पते-पयस्पते पृथिवीपते सलिलपते दिक्पते महत्पते-मरुत्पते लक्ष्मीपते ब्रह्मरूप ब्राह्मणप्रिय सर्वग अचिन्त्य-ज्ञानगम्य पुरुहूत पुरुष्टुत ब्रह्मण्य ब्रह्मप्रिय ब्रह्मकायिक-महाकायिक महाराजिक चतुर्म्महाराजिक भास्वर-महाभास्वर सप्त महाभाग स्वर तुषित महातुषित-प्रतर्द्दन परिनिर्मित अपरिनिर्मित वशवर्त्तिन् यज्ञ-महायज्ञ यज्ञयोग यज्ञगम्य यज्ञनिधन अजित वैकुण्ठ-अपार पर पुराण लेख्य प्रजाधर चित्राशखण्डधर-यज्ञभागहर पुरोड़ाशहर विश्वक् विश्वधर शुचिश्रवः-अच्युतार्च्चन घृतार्च्चिः खण्डपरशो पद्मनाभ पद्मधर-पद्मधाराधर हृषीकेश एकशृङ्ग महावराह द्रुहिण अच्युत-अनन्त पुरुष महापुरुष कपिल सांख्यचार्य्य विश्वक्सेन-धर्म्माधर्म्मद धर्म्माङ्ग धर्मवसुप्रद वरप्रद विष्णो जिष्णो-सहिष्णो कृष्ण पुण्डरीकाक्ष नारायण परायण-जगत्परायण नमोनम इति ॥

स्तुत्वा त्वेवं प्रसन्नेन मनसा पृथिवी तदा ।
उवाच सम्मुखं देवं लब्धकामा वसुन्धरा ॥

इति वैष्णवे धर्मशास्त्रेऽष्टनवतितमोऽध्यायः ॥

—:o:—

## ॥ अथ नवनवतितमोऽध्यायः ॥

दृष्ट्वा श्रियं देवदेवस्य विष्णोर्गृहीत पादां तपसा ज्वलन्तीम् ।
सुतप्तजाम्बूनदचारुवर्णां पप्रच्छ देवीं वसुधाप्रहृष्टा ॥

उन्निद्रकोकनदचारुकरे वरेण्ये ।
उन्निद्रकोकनदनाभि गृहीतपादे ॥
उन्निद्रकोकनदसद्मसदास्थितीते ।
उन्निद्रकोकनदमध्यसमानवर्णे ॥

नीलाञ्जनेत्रे तपनीयवर्णे शुक्लाम्बरे रत्नविभूषिताङ्गि ।
चन्द्रानने सूर्य्यसमानभासे महाप्रभावे जगतःप्रधाने ॥
त्वमेव निद्रा जगतः प्रधाना लक्ष्मीर्धृतिः श्रीर्विरतिर्जया च ।
कान्तिःप्रभा कीर्तिरथो विभूतिः सरस्वती वागथ पावनी च ।
स्वधा तितिक्षा वसुधा प्रतिष्ठा स्थितिःसुदीक्षा च तथा सुनीतिः ।
ख्यातिर्विशाला च तथानसूया स्वाहा च मेधा च तथैव बुद्धिः ॥
आक्रम्य सर्व्वान्नु यथा त्रिलोकीं तिष्ठत्ययं देववरोऽसिताङ्गे ।
तथा स्थिता त्वं वरदे तथापि पृच्छाम्यहंते वसतिं विभूत्याः ॥
इत्येवमुक्तां वसुधां वभाषे लक्ष्मीस्तदा देवरवाग्रतस्था ।
सदा स्थिताहं मधुसूदनस्य देवस्य पार्श्वे तपनीयवर्णे ॥
अस्याज्ञयायं मनसा स्मरामि श्रियायुतं तं प्रवदन्ति सन्तः ।
संस्मारणे वाप्यथ यत्र चाहं स्थिता सदा तच्छृणुलोकधात्रि ॥
वसाम्यथार्के च निशाकरे च तारागणाढ्ये गगने विमेघे ।
मेघे तथालम्बपयोधरे च शक्रायुधाढ्ये च तडित्प्रकाशे ॥

तथा सुवर्णे विमले च रूप्ये रत्नेषु वस्त्रेष्वमलेषु भूमे ।
प्रासादमालासु च पाण्डुरासु देवालयेषु ध्वजभूषितेषु ॥
सद्यः कृते चाप्यथ गोमये च मत्ते गजेन्द्रे तुरगे प्रहृष्टे ।
वृषे तथा दर्पसमन्विते च विप्रे तथैवाध्ययनप्रपन्ने ॥
सिंहासने चामलके च विल्वे च्छत्रे च शङ्खे च तथैव पद्मे ।
दीप्ते हुताशे विमले च खड्गे आदर्शविम्बे च तथास्थिताहम् ।
पूर्णोदकुम्भेषु सचामरेषु सतालवृन्तेषु विभूषितेषु ।
भृङ्गारपात्रेषु मनोहरेषु मृदिस्थिताहञ्च नवोद्धृतायाम् ॥
क्षीरे तथा सर्पिषि शाद्वले च क्षौद्रे तथा दध्नि पुरन्ध्रिगात्रे ।
देहे कुमार्य्याश्च तथा सुराणां तपस्विनां यज्ञभृताञ्च देहे ॥
शरे च संग्रामविनिर्गते च स्थितामृते स्वर्गसदाप्रयाते ।
वेदध्वनौ वाप्यथ शङ्खशब्दे स्वाहास्वधायामथ वाद्यशब्दे ॥
राजाभिषेके च तथा विवाहे यज्ञे वरे स्नातशिरस्यथापि ।
पुष्पेषु शुक्लेषु च पर्वतेषु फलेषु रम्येषु सरिद्वरासु ॥
सरःसु पूर्णेषु तथा जलेषु सशाद्वलायां भुवि पद्मखण्डे ।
वने च वत्से च शिशौ प्रहृष्टे साधौ नरे धर्म्मपरायणे च ॥
आचारसेविन्यथ शास्त्रनित्ये विनीतवेशे च तथा सुवेशे ।
सुशुद्धदान्ते मलवर्जिते च मिष्टाशने चातिथिपूजके च ॥
स्वदारतुष्टे निरते च धर्मे धर्मोत्कटे चात्यशनाद्विरक्ते ।
सदा सुपुष्पे च सुगन्धिगात्रे सुगन्धलिप्ते च विभूषिते च ॥
सत्ये स्थिते भूतहिते निविष्टे क्षमार्चिते क्रोधविवर्जिते च ।
स्वकार्य्यदक्षे परकार्य्यदक्षे कल्याणचित्ते च सदा विनीते ॥

नारीषु नित्यं सुविभूषितासु पतिव्रतासु प्रियवादिनीषु।
अमुक्तहस्तासु सुतान्वितासु सुगुप्तभाण्डासु बलिप्रियासु॥
सम्मृष्टवेश्मासु जितेन्द्रियासु कलिव्यपेतासु बिलोलुपासु।
धर्म्मव्यपेक्षासु दयान्वितासु स्थिता सदाहं मधुसूदने तु॥

इति वैष्णवे धर्म्मशास्त्रे नवनवतितमोऽध्यायः॥

.........

## ॥ अथ शततमोऽध्यायः॥

धर्म्मशास्त्रमिदं श्रेष्ठं स्वयं देवेन भाषितम्।
ये द्विजाधारयिष्यन्ति तेषां स्वर्गे गतिः परा॥
इदं पवित्रं मङ्गल्यं स्वर्गमायुष्यमेव च।
ज्ञानञ्चैव यशस्यं च धनसौभाग्यवर्द्धनम्॥
अध्येतव्यं धारणीयं श्राव्यं श्रोतव्यमेव च।
श्राद्धेषु श्रावणीयं च भूतिकामैर्नरैः सदा।
इदं रहस्यं परमं कथितं वसुधे! तव॥
मया प्रसन्नेन जगद्धितार्थं सौभाग्यमेतत् परमं रहस्यम्।
दुःस्वप्ननाशं बहुपुण्ययुक्तं शिवालयं शाश्वतधर्मशास्त्रम्॥

इति वैष्णवे धर्म्मशास्त्रे शततमोध्यायः॥

---

॥ समाप्ता चेयं श्रीभगवद्विष्णुस्मृतिः॥

ॐ तत्सत्।

॥ अथ ॥

# * सम्वर्त्तस्मृतिः *

अथादौ—ब्रह्मचर्यवर्णनम् ।

॥ श्रीगणेशाय नमः ॥

सम्वर्त्तमेकमासीनमात्मविद्यापरायणम् ।
ऋषयस्तु समागम्य पप्रच्छुधर्मकाङ्क्षिणः ॥१

भगवन्! श्रोतुमिच्छामः श्रेयस्कर्म द्विजोत्तम ! ।
यथावद्धर्ममाचक्ष्व शुभाशुभविवेचनम् ॥२

वामदेवादयः सर्वे तमपृच्छन् महौजसम् ।
तानब्रवीन्मुनीन् सर्वान् प्रीतात्मा श्रूयतामिति ॥३

स्वभावाद् यत्र विचरेत् कृष्णसारः सदा मृगः ।
धर्म्यदेशः स विज्ञेयो द्विजानां धर्मसाधनम् ॥४

उपनीतः सदा विप्रो गुरोस्तु हितमाचरेत् ।
स्रग्गन्धमधुमांसानि ब्रह्मचारी विवर्जयेत् ॥५

सन्ध्यां प्रातः सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्करे ॥६

तिष्ठन् पूर्वां जपं कुर्य्याद्ब्रह्मचारी समाहितः।
आसीनः पश्चिमां सन्ध्यां जपं कुर्य्यादतन्द्रितः ॥७
अग्निकार्य्यं ततः कुर्य्यान्मेधावी तदनन्तरम्।
ततोऽधीयीत वेदन्तु वीक्षमाणो गुरोर्मुखम् ॥८
प्रणवं प्राक् प्रयुञ्जीत व्याहृतिस्तदनन्तरम्।
गायत्रीश्चानुपूर्वेण ततोवेदं समारभेत् ॥९
हस्तौ सुसंयतौ कार्य्यौ जानुभ्यामुपरिस्थितौ।
गुरोरनुमतं कुर्य्यात् पठन्नान्यमतिर्भवेत् ॥१०
सायं प्रातस्तु भिक्षेत ब्रह्मचारी सदा व्रती।
निवेद्य गुरवेऽश्नीयात् प्राङ्मुखो वाग्यतः शुचि ॥११
सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्।
नान्तरा भोजनं कुर्य्यादग्निहोत्रसमो विधिः ॥१२
आचम्यैव तु भुञ्जीत भुक्त्वा चोपस्पृशेद्द्विजः।
अनाचान्तस्तु योऽश्नीयात् प्रायश्चित्तीयते तु सः ॥१३
अनाचान्तः पिवेद्यस्तु योऽपिवा भक्षयेद्द्विजः।
गायत्र्यष्टसहस्रन्तु जपं कृत्वा विशुध्यति ॥१४
अकृत्वा पादशौचन्तु तिष्ठन् मुक्तशिखोऽपिवा।
विना यज्ञोपवीतेन आचान्तोऽथ शुचिर्द्विजः ॥१५
आचामेद् ब्राह्मतीर्थेन सोपवीती ह्युदङ्मुखः।
उपवीती द्विजोनित्यं प्राङ्मुखो वाग्यतः शुचिः ॥१६
जले जलस्थ आचामेत् स्थलाचान्तोवहिः शुचिः।
वहिरन्तस्थ आचान्त एवं शुद्धिमवाप्नुयात् ॥१७

आमणिबन्धनाद्धस्तौ पादावद्भिर्विशोधयेत् ।
अशब्दाभिरनुष्णाभिः स्ववर्णरसगन्धिभिः ॥१८
हृद्गताभिरफेनाभिस्त्रिश्चतुर्वाद्भिराचमेत् ।
परिमृज्य द्विरास्यन्तु द्वादशाङ्गानि च स्पृशेत् ॥१९
स्नात्वा पीत्वा तथा भुक्त्वा स्पृष्ट्वा चैव द्विजोत्तमाः ।
अनेन विधिना विप्र आचान्तः शुचितामियात् ॥२०
शूद्रः शुद्ध्यति हस्तेन वैश्यो दन्तेषु वारिभिः ।
कण्ठागतैः क्षत्त्रियस्तु आचान्तः शुचिता मियात् ॥२१
आसनारूढ़पादश्च कृतावशक्थिकस्तथा ।
आरूढ़पादको वापि न शुद्ध्यति कदाचन ॥२२
उपासीत न चेन् सन्ध्यामग्निकार्य्यं नवा कृतम् ।
गायत्र्यष्टसहस्रन्तु जपेत् स्नात्वा समाहितः ॥२३
सूतकान्नं नवश्राद्धं मासिकान्नं तथैव च ।
ब्रह्मचारी तु योऽश्नीयात्त्रिरात्रेणैव शुध्यति ॥२४
ब्रह्मचारी तु यो गच्छेत् स्त्रियं कामप्रपीड़ितः ।
प्राजापत्यं चरेत् कृच्छ्रमथवैकं सुमन्त्रितः ॥२५
ब्रह्मचारी तु योऽश्नीयान्मधुमांसं कथञ्चन ।
प्राजापत्यन्तु कृत्वासौ मौञ्जीहोमेन शुध्यति ॥२६
निर्वपेच्च पुरोडाशं ब्रह्मचारी च पर्वणि ।
मन्त्रैः शाकलहोमान्तैरग्नावाज्यञ्च होमयेत् ॥२७
ब्रह्मचारी तु यः स्कन्देत् कामतः शुक्रमात्मनः ।
अवकीर्णी व्रतं कुर्य्यात् स्नात्वा शुद्ध्येदकामतः ॥२८

भिक्षाटनमतः कृत्वा स्वस्थो ह्येकात्मनः श्रुतिः ।
अस्नात्वा चैव यो भुङ्क्ते गायत्र्यष्टशतं जपेत् ॥२६

शूद्रहस्तेन योऽश्नीयात् पानीयं वा पिवेत् क्वचित् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥३०

शुष्कपर्य्युषितोच्छिष्टं भुक्त्वान्नं केशदूषितम् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥३१

शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥३२

दिवा स्वपिति यः स्वस्थो ब्रह्मचारी कथञ्चन ।
स्नात्वा सूर्य्यं समभ्यर्च्य गायत्र्यष्टशतं जपेत् ॥३३

एष धर्मः समाख्यातः प्रथमाश्रमवासिनाम् ।
एवं संवर्त्तमानस्तु प्राप्नोति परमां गतिम् ॥३४

अथ द्विजोऽभ्यनुज्ञातः सवर्णां स्त्रियमुद्वहेत् ।
कुले महति सम्भूतां लक्षणैश्च समन्विताम् ।
ब्राह्मेणैव विवाहेन शीलरूपगुणान्विताम् ॥३५

पञ्चयज्ञ विधानञ्च कुर्य्यादहरहर्द्विजः ।
न हापयेत् कचिद्विप्रः श्रेयस्कामः कदाचन ॥३६
हानिं तस्य तु कुर्व्वीत सदा मरणजन्मनोः ॥३७

विप्रो दशाहमासीत दानाध्ययनवर्जितः ।
क्षत्त्रियो द्वादशाहेन वैश्यः पञ्चदशैव तु ।
शूद्रः शुध्यति मासेन सम्वर्त्त वचनं यथा ॥३८

प्रेतस्य तु जलं देयं स्नात्वा च गोत्रजैर्बहिः।
प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ॥३९
चतुर्थे सञ्चयं कुर्य्यात् सर्वैस्तु गोत्रजैः सह।
ततः सञ्चयनादूर्द्ध्वमङ्गस्पर्शो विधीयते ॥४०
चतुर्थेऽहनि विप्रस्य षष्ठे वै क्षत्रियस्य च।
अष्टमे दशमे चैव स्पर्शः स्याद्वैश्यशूद्रयोः ॥४१
जातस्यापि विधिर्दृष्ट एष एव मनीषिभिः।
दशरात्रेण शुध्यन्ति वैश्यदेवविवर्ज्जिताः ॥४२
पुत्रे जाते पितुः स्नानं सचैलन्तु विधीयते।
माता शुध्येद्दशाहेन स्नातस्य स्पर्शनं पितुः ॥४३
होमस्तत्र तु कर्त्तव्यः शुष्कान्नेन फलेन च।
पञ्चयज्ञविधानन्तु न कार्य्यं मृत्युजन्मनोः ॥४४
दशाहात्तु परं सम्यग् विप्रोऽधीयीत धर्मवित्।
दानञ्च विधिना देयमशुभान्तकरं शुभम् ॥४५
यद्यदिष्टतमं लोके यच्चापि दयितं गृहे।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥४६
नानाविधानि द्रव्याणि धान्यानि सुबहूनि च।
समुद्रजानि रत्नानि नरो विगतकल्मषः।
दत्त्वा विप्राय महते प्राप्नोति महतीं श्रियम् ॥४७
गन्धमाभरणं माल्यं यः प्रयच्छति धर्मवित्।
स सुगन्धः सदा हृष्टो यत्र तत्रोपजायते ॥४८

श्रोत्रियाय कुलीनाय त्वर्थिने च विशेषतः ।
यद्दानं दीयते भक्त्या तद्भवेत्तु महत् फलम् ॥४६
आहूय शीलसम्पन्नं श्रुतेनाभिजनेन च ।
शुचिर्विप्रं महाप्राज्ञो हव्यकव्येषु पूजयेत् ॥५०
नानाविधानि द्रव्याणि रसवन्तीप्सितानि च ।
श्रेयस्कामेन देयानि स्वर्गमक्षयमिच्छता ॥५१
वस्त्रदाता सुवेशः स्याद्रौप्यदो रूपमेव हि ।
हिरण्यदो महद्वायुर्लभेत्तेजश्च मानवः ॥५२
भूताभयप्रदानेन सर्वकामानवाप्नुयात् ।
दीर्घमायुश्च लभते सुखी चैव तथा भवेत् ॥५३
धान्योदकप्रदायी च सर्पिर्दः सुखमश्नुते ।
अलङ्कृत्य त्वलङ्कारं दत्त्वा प्राप्नोति तत्फलम् ॥५४
फलमूलानि विप्राय शाकानि विविधानि च ।
सुरभीणि च पुष्पाणि दत्त्वा प्राज्ञश्च जायते ॥५५
ताम्बूलं चैव यो दद्याद्ब्राह्मणेभ्यो विचक्षणः ।
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते ॥५६
पादुकोपानहौ छत्रं शयनान्यासनानि च ।
विविधानि च यानानि दत्त्वा दिव्यगतिर्भवेत् ॥५७
दद्याच्च शिशिरे त्वग्निं बहुकाष्ठं प्रयत्नतः ।
कायाग्निदीप्तिं प्राज्ञत्वं रूपसौभाग्यमाप्नुयात् ॥५८
औषधं स्नेहमाहारं रोगिणां रोगशान्तये ।
दत्त्वा स्याद्रोगरहितः सुखी दीर्घायुरेव च ॥५६

इन्धनानि च योदद्याद्विप्रेभ्यः शिशिरागमे।
नित्यं जयति संग्रामे श्रिया युक्तस्तु दीप्यते॥६०
अलङ्कृत्य तु यः कन्यां वराय सदृशाय वै।
ब्राह्मीयेण विवाहेन दद्यात्तान्तु सुपूजिताम्॥६१
स कन्यायाः प्रदानेन श्रेयो विन्दति पुष्कलम्।
साधुवादं लभेत् सद्भिः कीर्त्तिं प्राप्नोति पुष्कलाम्॥६२
ज्योतिष्टोमादिसत्राणां शतं शतगुणीकृतम्।
प्राप्नोति पुरुषो दत्त्वा होममन्त्रैस्तु संस्कृताम्॥६३
अलङ्कृत्य पिता कन्यां भूषणाच्छादनासनैः।
दत्त्वा स्वर्गमवाप्नोति पूजितस्तु सुरादिषु॥६४
रोमदर्शनसंप्राप्ते सोमो भुङ्क्तेऽथ कन्यकाम्।
रजोदृष्ट्वा तु गन्धर्वः कुचौ दृष्ट्वा तु पावकः॥६५
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत् कन्या अत ऊर्द्ध्वं रजस्वला॥६६
माता चैव पिता चैव ज्येष्ठोभ्राता तथैवच।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्॥६७
तस्माद्विवाहयेत् कन्यां यावन्नर्त्तुमती भवेत्।
विवाहोऽष्टमवर्षीयाः कन्यास्तु प्रशस्यते॥६८
तैलमास्तरणं प्राज्ञः पादाभ्यङ्गं ददाति यः।
प्रहृष्टमानसो लोके सुखी चैव सदा भवेत्॥६९
अनड्वाहौ च यो दद्यात् कीलसीरेण संयुतौ।
अलङ्कृत्य यथाशक्त्या धुर्य्यहौ शुभलक्षणौ॥७०

सर्वपापविशुद्धात्मा सर्वकामसमन्वितः ।
वर्षाणि वसति स्वर्गे रोमसंख्याप्रमाणतः ॥७१
धेनुश्च योद्विजे दद्यादलङ्कृत्य पयस्विनीम् ।
कांस्यवस्त्रादिभिर्युक्तां स्वर्गलोके महीयते ॥७२
भूमिं शस्यवतीं श्रेष्ठां ब्राह्मणे वेदपारगे ।
गां दत्वार्द्धप्रसूताञ्च स्वर्गलोके महीयते ॥७३
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गाञ्च महीञ्च दद्यात्
यावन्ति शस्यमूल्यानि आरोप्याणि च सर्वशः ।
नरस्तावन्ति वर्षाणि स्वर्गलोके महीयते ॥७५
सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥७६
यो ददाति स्वर्णरौप्यैर्हेमशृङ्गीमरोगिणीम् ।
सवत्सां वाससा वीतां सुशीलाङ्गां पयस्विनीम् ॥७७
तस्यां यावन्ति रोमाणि सवत्सायां दिवं गतः ।
तावद्वर्षसहस्राणि स नरो ब्रह्मणोऽन्तिके ॥७८
यो ददाति वलीवर्दमुक्तेन विधिना शुभम् ।
अभ्यङ्गं गोप्रदानेन फलाद्दशगुणं फलम् ॥७९
जलदस्तृप्तिमतुलां वितृष्य सर्ववस्तुषु ।
अन्नदः सुखमाप्नोति सुतृप्तः सर्ववस्तुषु ॥८०
सर्वेषामेव दानानामन्नदानं परं स्मृतम् ।
सर्वेषामेव जन्तूनां यतस्तज्जीवितं फलम् ॥८१

यस्मादन्नात् प्रजाः सर्व्वाः कल्पे कल्पेऽसृजत् प्रभुः।
तस्मादन्नात् परं दानं न भूतो न भविष्यति ॥८२
अन्नदानात् परं दानं विद्यते न हि किञ्चन।
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः ॥८३
मृत्तिकां गोशकृद्दर्भानुपवीतं यथोत्तरम्।
दत्त्वा गुणाग्र्यविप्राय कुले महति जायते ॥८४
मुखवासञ्च यो दद्याद्दन्तधावनमेव च।
शुचिगन्धसमायुक्तो वाक्पटुः स सदा भवेत् ॥८५
पादशौचन्तु योदद्यात्तथा च गुदलिङ्गयोः।
यः प्रयच्छति विप्राय शुद्धबुद्धिः सदा भवेत् ॥८६
औषधं पथ्यमाहारं स्नेहाभ्यङ्गं प्रतिश्रयम्।
यः प्रयच्छति रोगिभ्यः सर्व्वव्याधि विवर्ज्जितः ॥८७
गुड़मिक्षुरसञ्चैव लवणं व्यञ्जनानि च।
सुरभीणि च पानानि दत्त्वात्यन्तसुखी भवेत् ॥८८
दानैश्च विविधैः सम्यक् पुण्यमेददुदाहृतम्।
विद्यादानेन पुण्येन ब्रह्मलोके महीयते ॥८९
अन्योन्यान्नप्रदा विप्रा अन्योन्यप्रतिपूजकाः।
अन्योन्यं प्रतिगृह्णन्ति तारयन्ति तरन्ति च ॥९०
दानान्येतानि देयानि ह्यन्यानि च विशेषतः।
दीनान्धकृपणादिभ्यः श्रेयस्कामेन धीमता ॥९१
ब्रह्मचारियतिभ्यश्च वपनं यस्तु कारयेत्।
नखकर्मादिकञ्चैव चक्षुष्मान् जायते नरः ॥९२

देवागारे द्विजातीनां दीपं दद्याच्चतुष्पथे ।
मेधाविज्ञानसम्पन्नश्चक्षुष्मान् जायते नरः ॥६३
नित्ये नैमित्तिके काम्ये तिलान् दत्वा तु शक्तितः ।
प्रजावान् पशुमांश्चैव धनवान् जायते नरः ॥६४
यो दद्यात्यर्थितोविप्रे यत्तत् संप्रतिपादिते ।
तृणकाष्ठादिकञ्चैव गोप्रदानसमं भवेत् ॥६५
कृत्वा गार्ह्याणि कर्माणि स्वभर्य्यापोषणे नरः ।
ऋतुकालाभिगामी स्यात् प्राप्नोति परमां गतिम् ॥६६
उषित्वैवं गृहे विप्रोद्वितीयादाश्रमात् परम् ।
वलीपलितसंयुक्तस्तृतीयन्तु समाश्रयेत् ॥६७
गच्छेदेवं वनं प्राज्ञः स्वभार्य्यां सहचारिणीम् ।
गृहीत्वा चाग्निहोत्रञ्च होमं तत्र न हापयेत् ॥६८
कुर्य्याच्चैव पुरोडाशं वन्यैर्मेध्यैर्यथाविधि ।
भिक्षाञ्च भिक्षवे दद्याच्छाकमूलफलानि च ॥६९
कुर्य्यादध्ययनं नित्यमग्निहोत्र परायणः ।
इष्टिं पार्व्वायणीयाञ्च प्रकुर्य्यात् प्रतिपर्वसु ॥१००
उषित्वैवं वने सम्यग्विधिज्ञः सर्ववस्तुषु ।
चतुर्थमाश्रमं गच्छेद्धुतहोमोजितेन्द्रियः ॥१०१
अग्निमात्मनि संस्थाप्य द्विजः प्रव्रजितोभवेत् ।
वेदाभ्यासरतो नित्यमात्मविद्यापरायणः ॥१०२
अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा ।
अद्भिः प्रक्षाल्य तत्सर्व्वं भुञ्जीत च समाहितः ॥१०३

अरण्ये निर्जने विप्रः पुनरासीत भुक्तवान् ।
एकाकी चिन्तयेन्नित्यं मनोवाक्कायसंयतः ॥१०४
मृत्युञ्च नाभिनन्देत जीवितं वा कथञ्चन ।
कालमेव प्रतीक्षेत यावद्वायुः समाप्यते ॥१०५
संसेव्य चाश्रमान् विप्रो जितक्रोधोजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति वेदशास्त्रार्थविद्द्विजः ॥१०६
आश्रमेषु च सर्वेषु ह्युक्तः प्रासङ्गिकोविधिः ।
अथाभिवक्ष्ये पापानां प्रायश्चित्तं यथाविधि ॥१०७
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ।
महापातकिनस्त्वेते तत्संयोगी च पञ्चमः ॥१०८
ब्राह्मघ्नस्तु वनं गच्छेत् कल्कवासाजटी ध्वजी ।
वन्यान्येव फलान्यश्नन् सर्व्वं कामविवर्जितः ॥१०९
भिक्षार्थी च चरेद्ग्रामं वन्यैर्यदि न जीवति ।
चातुर्वर्ण्यं चरेद्भैक्षं खट्वाङ्गी संयतः पुमान् ॥११०
भैक्षञ्चैव समादाय वनं गच्छेत्ततः पुनः ।
वनवासी सपापश्च सदाकालमतन्द्रितः ॥१११
ख्यापयन्नेव तत्पापं ब्रह्मघ्नः पापकृन्नरः ।
अनेन तु विधानेन द्वादशाब्दव्रतञ्चरेत् ॥११२
संनियम्येन्द्रियग्रामं सर्वभूतहिते रतः ।
ब्रह्महत्यापनोदाय ततोमुच्येत किल्विषात् ॥११३
अतः परं सुरापस्य प्रवक्ष्यामि विनिष्कृतिम् ।
श्रोतुमिच्छथ भो विप्रा ! वेदशास्त्रानुरूपिकाम् ॥११४

गौड़ी पैष्टी तथा माध्वी विज्ञेया त्रिविधा सुरा।
यथैवैका तथा सर्वा न पातव्या द्विजैः सदा ॥११५

सुरापस्तुसुरां तप्तां पिवेत्तत्पापमोक्षकः।
गोमूत्रमग्निवर्णञ्च गोमयं वा तथा विधम् ॥११६

घृतञ्चैव सुतप्तञ्च क्षीरं वापि तथाविधम्।
वत्सरं वा कणानश्नन् सर्वकामविवर्जितः ॥११७

चान्द्रायणानि वा त्रीणि सुरापी व्रतमाचरेत्।
मुच्यते तेन पापेन प्रायश्चित्ते कृते सति ॥११८

एवं शुद्धिः सुरापस्य भवेदिति न संशयः।
मद्यभाण्डोदकं पीत्वा पुनः संस्कारमर्हति ॥११९

स्तेयं कृत्वा सुवर्णस्य राज्ञे शंसेत मानवः।
ततोमुषलमादाय स्तेनं हन्यात्ततोनृपः ॥११२०

यदि जीवति स स्तेनस्ततस्तेयात् प्रमुच्यते।
अरण्ये चीरवासा वा चरेद्ब्रह्महणोव्रतम् ॥१२१

समालिङ्गेत् स्त्रियं वापि दीप्तां कृत्वायसा कृताम्।
एवं शुद्धिः कृता स्तेये साम्बर्त्तवचनं यथा ॥१२२

गुरुतल्पे शयानस्तु तल्पे स्वप्यादयोमये।
चान्द्रायणानि वा कुर्य्याच्चत्वारि त्रीणि वा द्विजः।
ततोविमुच्यते पापात् प्रायश्चित्ते कृते सति ॥१२३

एभिः सम्पर्कमायाति यः कश्चित् पापमोहितः।
षण्मासादधिकं वापि पूर्वोक्तव्रतमाचरेत् ॥१२४

महापातकिसंयोगे ब्रह्महत्यादिभिर्नरः ।
तत्पापस्य विशुद्ध्यर्थं तस्य तस्य व्रतञ्चरेत् ॥१२५
क्षत्रियस्य बधं कृत्वा त्रिभिः कृच्छ्रैर्विशुध्यति ।
कुर्य्याच्चैवानुरूपेण त्रीणि कृच्छ्राणि संयतः ॥१२६
वैश्यहत्यान्तु संप्राप्तः कथञ्चित् काममोहितः ।
कृच्छ्रातिकृच्छ्रं कुर्वीत स नरो वैश्यघातकः ॥१२७
कुर्य्याच्छूद्रबधं प्राप्तस्तप्तकृच्छ्रं यथाविधि ॥१२८
गोघ्नस्यातः प्रवक्ष्यामि निष्कृतिं तत्त्वतः पुमान् ।
गोघ्नः कुर्वीत संस्थानं गोष्ठे गोरूपसंस्थिते ॥१२९
तत्रैव क्षितिशायी स्यान्मासार्द्धं संयतेन्द्रियः ।
शक्तुयावकपिण्याकपयोदधि सकृन्नर. ॥१३०
एतानि क्रमतोऽश्नीयाद्द्विजस्तु पापमोक्षकः ।
शुद्ध्यते सार्द्धमासेन नखलोमविवर्ज्जितः ॥१३१
स्नानं त्रिषवणं चास्य गवामनुगमस्तथा ।
एतत् समाहितः कुर्य्यान्नरोविगतमत्सरः ॥१३२
सावित्रीञ्च जपेन्नित्यं पवित्राणि च शक्तितः ।
ततश्चीर्णव्रतः कुर्य्याद्विप्राणां भोजनं परम् ॥१३३
भुक्तवत्सु च विप्रेषु गाञ्च दद्यात् सदक्षिणाम् ॥१३४
व्यापादितेषु बहुषु बन्धने रोधनेऽपिवा ।
द्विगुणं गोव्रतं तस्य प्रायश्चित्तं विशुद्धये ॥१३५
एका चेद्बहुभिः कैश्चिद्दैवाद्व्यापादिता क्वचित् ।
पादं पादन्तु हत्यायाश्चरेयुस्ते पृथक् पृथक् ॥१३६

यन्त्रणे गोचिकित्सार्थे मूढगर्भविमोचने ।
यदि तत्र विपत्तिः स्यान्न स पापेन लिप्यते ॥१३७
निशाबन्धनिरुद्धेषु सर्पव्याघ्रहतेषु च ।
अग्निविद्युन्निपातेन प्रायश्चित्तं न विद्यते ॥१३८
प्रायश्चित्तस्य पादन्तु रोधेषु व्रतमाचरेत् ।
द्वौ पादौ बन्धने चैव पादोनं कुट्टने तथा ॥१३९
पाषाणैर्लगुडैर्दण्डैस्तथा शस्त्रादिभिर्नरः ।
निपातने चरेत् सर्वं प्रायश्चित्तं विशुद्धये ॥१४०
गजञ्च तुरगं हत्वा महिषोष्ट्रकपिन्तथा ।
एषु कुर्व्वीत सर्व्वेषु सप्तरात्रमभोजनम् ॥१४१
व्याघ्रं श्वानं तथा सिंहमृक्षं शूकरमेव च ।
एतान् हत्वा द्विजः कृच्छ्रं ब्राह्मणानाञ्च भोजनम् ॥१४२
सर्वासामेव जातीनां मृगाणां वनचारिणाम् ।
त्रिरात्रोपोषितस्तिष्ठेज्जपन् वै जातवेदसम् ॥१४३
हंसं काकं बलाकञ्च पारावतमथापि वा ।
सारसञ्चासभासञ्च हत्वा त्रिदिवसं क्षिपेत् ॥१४४
चक्रवाकं तथा क्रौञ्चं सारिकाशुकतित्तिरिम् ।
श्येनगृध्रावुलूकञ्च कपोतकमथापि वा ॥१४५
टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा ।
एवं पक्षिषु सर्व्वेषु दिनमेकमभोजनम् ॥१४६
मण्डूकञ्चैव हत्वा च सर्पमार्जारमूषिकम् ।
त्रिरात्रोपोषितस्तिष्ठेत् कुर्य्याद्ब्राह्मणभोजनम् ॥१४७

अनस्थीन् ब्राह्मणो हत्वा प्राणायामेन शुध्यति ।
अस्थिमतोवधे विप्रः किञ्चिद्दद्याद्विचक्षणः ॥१४८
चाण्डालीं यो द्विजो गच्छेत् कथञ्चित् काममोहितः ।
त्रिभिः कृच्छ्रैर्विशुद्ध्येत प्राजापत्यानुपूर्वकैः ॥१४६
पुक्कसीगमनं कृत्वा कामतोऽकामतोऽपिवा ।
कृच्छ्रं चान्द्रायणं तस्य पावनं परमं स्मृतम् ॥१५०
नटीं शैलूषिकीञ्चैव रजकीं वेणुजीविनीम् ।
गत्वा चान्द्रायणं कुर्य्यात्तथा चर्म्मोपजीविनीम् ॥१५१
क्षत्रियामथ वैश्यां वा गच्छेद्यः काममोहितः ।
तस्य सान्तपनं कृच्छ्रं भवेत् पापापनोदकम् ॥१५२
शूद्रीं तु ब्राह्मणोगत्वा मासं मासार्द्धमेव वा ।
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥१५३
विप्रस्तु ब्राह्मणीं गत्वा प्राजापत्यं समाचरेत् ।
क्षत्त्रियां क्षत्त्रियोगत्वा तदेव व्रतमाचरेत् ॥१५४
नरोगोगमनं कृत्वा कुर्य्याच्चान्द्रायणं व्रतम् १५५
गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च ।
तस्या दुहितरञ्चैव चरेच्चान्द्रायणं व्रतम् ॥१५६
मातुलानीं सनाभिञ्च मातुलस्यात्मजां स्नुषाम् ।
एता गत्वा स्त्रियो मोहात् पराकेण विशुध्यति ॥१५७
पितृव्यदारगमने भ्रातृभार्य्यागमे तथा ।
गुरुतल्पव्रतं कुर्य्यात्तस्यान्या निष्कृतिर्न च ॥१५८

पितृदाराः समारुह्य मातृवर्जं नराधमः।
भगिनीं मातुलसुतां स्वसारं चान्यमातृजाम्।
एतास्तिस्रः स्त्रियो गत्वा तप्तकृच्छ्रं समाचरेत् ॥१५६
मातरं योऽधिगच्छेच्च सुतां वा पुरुषाधमः।
भगिनीञ्च निजां गत्वा निष्कृतिर्नो विधीयते ॥१६०
कुमारीगमने चैव व्रतमेतत् समादिशेत्।
पशुवेश्याभिगमने प्राजापत्यं विधीयते ॥१६१
सखिभार्य्यां कुमारीञ्च श्वश्रूं वा श्यालिकां तथा।
नियमस्थां व्रतस्थाञ्च योऽभिगच्छेत् स्त्रियं द्विजः।
स कुर्य्यात् प्राकृतं कृच्छ्रं धेनुं दद्यात् पयस्विनीम् ॥१६२
रजस्वलाञ्च योगच्छेद्गर्भिणीं पतितां तथा।
तस्य पापविशुद्ध्यर्थमतिकृच्छ्रं विधीयते ॥१६३
वेश्याञ्च ब्राह्मणोगत्वा कृच्छ्रमेकं समाचरेत्।
एवं शुद्धिः समाख्याता सम्वर्त्तस्य वचोयथा ॥१६४
ब्राह्मणोब्राह्मणीं गत्वा कृच्छ्रेणैकेण शुध्यति ॥१६५
कथञ्चिद्ब्राह्मणीं गत्वा क्षत्रियोवैश्य एव च।
गोमूत्रयावकाहारी मासेनैकेन शुध्यति ॥१६६
ब्राह्मणी शूद्रसम्पर्के कथञ्चित् समुपागते।
कृच्छ्रं चान्द्रायणं कुर्य्यात् पावनं परमं स्मृतम् १६७
चाण्डालं पुक्कशञ्चैव श्वपाकं पतितं तथा।
एतान् श्रेष्ठस्त्रियो गत्वा कुर्य्युश्चान्द्रायणत्रयम् ॥१६८

अतःपरञ्च दुष्टानां निष्कृतिं श्रोतुमर्हथ।
सन्न्यस्य दुर्म्मतिः कश्चिदपत्यार्थं स्त्रियं व्रजेत्।
स कुर्य्यात् कृच्छ्रमश्रान्तः षण्मासन्तदनन्तरम्॥१६९
विषाग्निश्यामशवलास्तेषामेवं विनिर्द्दिशेत्।
स्त्रीणाञ्च तथाचरणे गर्ह्याभिगमनेषु च।
पतनेषु तथैतेषु प्रायश्चित्तविधिः स्मृतः॥१७०
नृणां विप्रतिपत्तौ च पावनः प्रेतराडिह॥१७१
गोभिर्विप्रहते चैव तथाचैवात्मघातिनि।
नाश्रुप्रपातनं कार्य्यं सद्भिः श्रेयोऽनुकाङ्क्षिभि॥१७२
एषामन्यतमं प्रेतं यो वहेत्तदहेतवे।
तथोदकक्रियां कृत्वा चरेच्चान्द्रायणव्रतम्॥१७३
तच्छवं केवलं स्पृष्ट्वा वस्त्रं वा केवलं यदि।
पूर्वः कृच्छ्रापहारी स्यादेकाहक्षपणं तथा॥१७४॥
महापातकिनाञ्चैव तथा चैवात्मघातिनाम्।
उदकं पिण्डदानञ्च श्राद्धं चैव तु यत्कृतम्।
नोपतिष्ठति तत्सर्वं राक्षसैर्विप्रलुप्यते॥१७५
चाण्डालैस्तु हता ये च जलदंष्ट्रिसरीसृपैः।
श्राद्धमेषां न कर्त्तव्यं ब्रह्मदण्डहताश्च ये॥१७६
कृत्वा मूत्रं पूरीषं वा भुक्तोच्छिष्टस्तथा द्विजः।
श्वादि स्पृष्टो जपेद्देव्याः सहस्रं स्नानपूर्वकम्॥१७७
चाण्डालं पतितं स्पृष्ट्वा शवमन्त्यजमेव च।
उदक्यां सूतिकां नारीं सवासाः स्नानमाचरेत्॥१७८

अस्पृश्यं संस्पृशेद्यस्तु स्नानं तेन विधीयते ।
ऊर्द्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा ॥१७९

चाण्डालाद्यैस्तु संस्पृष्ट उच्छिष्टश्च द्विजोत्तमः ।
गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति ॥१८०

शुना पुष्पवती स्पृष्टा पुष्पवत्यान्यया तथा ।
शेषान्यहन्युपवसेत् स्नाता शुध्येद्घृताशनात् ॥१८१

चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् ।
गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति ॥१८२

अन्त्यजैः स्वीकृते तीर्थे तडागेषु नदीषु च ।
शुध्यते पञ्चगव्येन पीत्वा तोयमकामतः ॥१८३

सुराघटप्रपातोयं पीत्वाकाशजलं तथा ।
अहोरात्रोषितोभूत्वा पञ्चगव्यं पिवेद्द्विजः ॥१८४

कूपे विण्मूत्रसंस्पृष्टे प्राश्य चापो द्विजातयः ।
त्रिरात्रेणैव शुध्यन्ति कुम्भे शान्तपनं स्मृतम् ॥१८५

वापीकूपतडागानां दूषितानां विशोधनम् ।
अपां घटशतोद्धारः पञ्चगव्यञ्च निक्षिपेत् ॥१८६

आविकैकशफोष्ट्रीणां क्षीरं प्राश्य द्विजोत्तमः ।
तस्य शुद्धिविधानाय त्रिरात्रं यावकं पिवेत् ॥१८७

स्त्रीक्षीरमाजिकं पीत्वा सन्धिन्याश्चैव गोः पयः ।
तस्य शुद्धिस्त्रिरात्रेण विड्भक्ष्याणाञ्च भक्षणे ॥१८८

विण्मूत्रभक्षणे चैव प्राजापत्यं समाचरेत् ।
श्वकाकोच्छिष्टगोच्छिष्टभक्षणे तु त्र्यहं द्विजः ॥१८९

विडालमूषकोच्छिष्टे पञ्चगव्यं पिबेद् द्विजः।
शूद्रोच्छिष्टं तथा भुक्त्वा त्रिरात्रेणैव शुध्यति ॥१६०
पलाण्डुलशुनं जग्ध्वा तथैव ग्रामकुक्कुटम्।
छत्राकं विड्वराहञ्च चरेच्चान्द्रायणं द्विजः ॥१६१
मानवः श्वखरोष्ट्राणां कपेर्गोमायुकङ्कयोः।
प्राश्य मूत्रं पुरीषं वा चरेच्चान्द्रायणव्रतम् ॥१६२
अन्नं पर्य्युषितं भुक्त्वा केशकीटैरुपद्रुतम्।
पतितैः प्रेक्षितं वापि पञ्चगव्यं पिबेद् द्विजः ॥१६३
अन्त्यजाभाजने भुक्त्वा ह्युदक्याभाजनेऽपिवा।
गोमूत्रयावकाहारी मासार्द्धेन विशुध्यति ॥१६४
गोमांसं मानुषञ्चैव शुनोहस्तात् समाहितम्।
अभक्ष्यमेतत् सर्वन्तु भुक्त्वा चान्द्रायणं चरेत् ॥१६५
चाण्डालस्य करे विप्रः श्वपाके पुक्कशेऽपिवा।
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥१६६
पतितेन सुसम्पर्के मासं मासार्द्धमेव वा।
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥१६७
यत्र यत्र च सङ्कीर्णमात्मानं मन्यते द्विजः।
तत्र कार्य्यस्तिलैर्होमो गायत्र्यावर्त्तनं तथा ॥१६८
एष एव मया प्रोक्तः प्रायश्चित्तविधिः शुभः।
अनादिष्टेषु पापेषु प्रायश्चित्तं तथोच्यते ॥१६९
दानैर्होमैर्जपैर्नित्यं प्राणायामैर्द्विजोत्तमः।
पातकेभ्यः प्रमुच्येत वेदाभ्यासान्न संशयः ॥२००

सुवर्णदानं गोदानं भूमिदानं तथैव च ।
नाशयन्त्याशु पापानि ह्यन्यजन्मकृतान्यपि ॥२०१
तिलधेनुञ्च यो दद्यात् संयताय द्विजन्मने ।
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥२०२
माघमासे तु संप्राप्ते पौर्णमास्यामुपोषितः ।
ब्राह्मणेभ्यस्तिलान् दत्वा सर्वपापैः प्रमुच्यते ॥२०३
उपवासी नरो भूत्वा पौर्णमास्याञ्च कार्त्तिके ।
हिरण्यं वस्त्रमन्नं वा दत्वा मुच्येत दुष्कृतैः ॥२०४
अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः ।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥२०५
अत्र स्नानं जपो होमो ब्राह्मणानाञ्च भोजनम् ।
उपवासस्तथा दानमेकैकं पावयेन्नरम् ॥२०६
स्नातः शुचिर्धौतवासाः शुद्धात्मा विजितेन्द्रियः ।
सात्विकं भावमाश्रित्य दानं दद्याद्विचक्षणः ॥२०७
सप्तव्याहृतिभिर्होमो द्विजैः कार्य्यो हितात्मभिः ।
उपपातकसिद्ध्यर्थं सहस्रपरिसंख्यया ॥२०८
महापातकसंयुक्तो लक्षहोमं सदा द्विजः ।
मुच्यते सर्वपापेभ्यो गायत्र्याश्चैव जापनात् ॥२०९
अभ्यसेच्च महापुण्यां गायत्रीं वेदमातरम् ।
गत्वारण्ये नदीतीरे सर्वपापविशुद्धये ॥२१०
स्नात्वा च विधिवत्तत्र प्राणानायम्य वारयतः ।
प्राणायामैस्त्रिभिः पूतो गायत्रीन्तु जपेद्द्विजः ॥२११

अक्लिन्नवासाः स्थलगः शुचौ देशे समाहितः।
पवित्रपाणिराचान्तो गायत्र्या जपमारभेत् ॥२१२

ऐहिकामुष्मिकं लोके पापं सर्वं विशेषतः।
पञ्चरात्रेण गायत्रीं जपमानो व्यपोहति ॥२१३

गायत्र्यास्तु परं नास्ति शोधनं पापकर्मणाम् ॥२१४

महाव्याहृतिसंयुक्तां प्राणायामेन संयुताम्।
गायत्रीं प्रजपन् विप्रः सर्वपापैः प्रमुच्यते ॥२१५

ब्रह्मचारी मिताहारः सर्वभूतहिते रतः।
गायत्र्या लक्षजप्येन सर्वपापैः प्रमुच्यते ॥२१६

अयाज्ययाजनं कृत्वा भुक्त्वा चान्नं विगर्हितम्।
गायत्र्यष्टसहस्रन्तु जप्यं कृत्वा विमुच्यते ॥२१७

अहन्यहनि योऽधीते गायत्रीं वै द्विजोत्तमः।
मासेन मुच्यते पापादुरगः कञ्चुकाद्यथा ॥२१८

गायत्रीं यः सदा विप्रो जपते नियतः शुचिः।
स याति परमं स्थानं वायुभूतः खमूर्त्तिमान् ॥२१६

प्रणवेन तु संयुक्ता व्याहृतिः सप्त नित्यशः।
गायत्रीं शिरसा सार्द्धं मनसा त्रिः पठेद्द्विजः ॥२२०

निगृह्य चात्मनः प्राणान् प्राणायामो विधीयते।
प्राणायामत्रयं कुर्य्यान्नित्यमेव समाहितः ॥२२१

मानसं वाचिकं पापं कायेनैव तु यत्कृतम्।
तत्सर्वं नश्यते तूर्णं प्राणायामत्रये कृते ॥२२२

ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा ।
सामानि सरहस्यानि सर्वपापैः प्रमुच्यते ॥२२३

पावमानीं तथा कौत्सं पौरुषं सूक्तमेव च ।
जप्त्वा पापैः प्रमुच्येत पित्र्यञ्च मधुच्छन्दसाम् ॥२२४

मण्डलं ब्राह्मणं रुद्रसूक्तोक्ताश्च बृहत्कथाः ।
वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते ॥२२५

चान्द्रायणन्तु सर्वेषां पापानां पावनं परम् ।
कृत्वा शुद्धिमवाप्नोति परमं स्थानमेव च ॥२२६

धर्मशास्त्रमिदं पुण्यं सम्वर्त्तेन तु भाषितम् ।
अधीत्य ब्राह्मणो गच्छेद्ब्रह्मणः सद्म शाश्वतम् ॥२२७

इति श्रीसम्वर्त्तेनोक्तं धर्मशास्त्रं समाप्तम् ॥

ॐ तत्सत् ३

—:❀::❀:—

॥ अथ ॥

# दक्षस्मृतिः ।

—०❁०—

## प्रथमोऽध्यायः ।

—:❁❁:—

श्रीगणेशाय नमः ।

अथादौ—आश्रमवर्णनम् ।

सर्वधर्मार्थतत्त्वज्ञ सर्ववेदविदां वरः ।
पारगः सर्व्वविद्यानां दक्षो नाम प्रजापतिः ॥१
उत्पत्तिः प्रलयश्चैव स्थितिः संहार एव च ।
आत्मा चात्मनि तिष्ठेत आत्मा ब्रह्मण्यवस्थितः ॥२
ब्रह्मचारी गृहस्थश्च वानप्रस्थोयतिस्तथा ।
एतेषान्तु हितार्थाय दक्षः शास्त्रमकल्पयत् ॥३
जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः ।
सहि गर्भसमोज्ञेयोव्यक्तिमात्रप्रदर्शितः ॥४
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते ।
तस्मिन् काले न दोषोऽस्ति स यावन्नोपनीयते ॥५

उपनीतस्य दोषोऽस्ति क्रियमाणैर्विगर्हितैः ।
अप्रामव्यवहारोऽसौ यावत् षोड़शवार्षिकः ।।६
स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च ।
ब्रह्मचारी भवेत्तावदूर्द्धं स्नातो भवेद्गृही ।।७
द्विविधोब्रह्मचारी तु स्मृतः शास्त्रे मनीषिभिः ।
उपकुर्वाणकस्त्वाद्योद्वितीयोनैष्ठिकः स्मृतः ।।८
योगृहाश्रममास्थाय ब्रह्मचारी भवेत् पुनः ।
न यतिर्न वनस्थश्च सर्व्वाश्रमविवर्जितः ।।६
अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः ।।१०
जपे होमे तथा दाने स्वाध्याये च रतस्तु यः ।
नासौ तत्फलमाप्नोति कुर्वाणोऽप्याश्रमाच्च्युतः ।
त्रयाणामानुलोम्यं हि प्रातिलोम्यं न विद्यते ।। ११
प्रातिलोम्येन यो याति न तस्मात् पापकृत्तमः ।
मेखलाजिनदण्डेन ब्रह्मचारी तु लक्ष्यते ।।१२
गृहस्थोदेवयज्ञाद्यैर्नखलोम्ना वनाश्रितः ।
त्रिदण्डेन यतिश्चैव लक्षणानि पृथक् पृथक् ।।१३
यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती नचाश्रमी ।
उक्त कर्म क्रमोनोक्तो न कालो मुनिभिः स्मृतः ।
द्विजानान्तु हितार्थाय दक्षस्तु स्वयमब्रवीत् ।।१४

इति दाक्षे धर्मशास्त्रे प्रथमोऽध्यायः ।

## अथ द्वितीयोऽध्यायः ।

प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने ।
तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम् ॥१
उदयास्तमयं यावन्न विप्रः क्षणिकोभवेत् ।
